# मधुसूदनसरस्वती–कृता *गूढार्थदीपिका* : कर्म–भक्ति–ज्ञानेषु अद्वैततत्त्व–प्रकाशिका

# [Madhusūdanasarasvatī-kṛtā *Gūḍhārthadīpikā* : karma- bhakti- jñāneṣu Advaitatattva-prakāśikā]

पि एइच्. डि. गवेषणामूलकः निबन्धः (आर्ट्स्)

गवेषकः

फणिशंकर–मण्डलः

तत्त्वावधायिका

ड. काकली घोष

अध्यापिका, संस्कृत–विभागः, यादवपुर–विश्वविद्यालयः

२०२२

# Certificate

Certified that the Thesis entitled, मधुसूदनसरस्वती–कृता *गूढार्थदीपिका* : कर्म–भक्ति–ज्ञानेषु अद्वैततत्त्व–प्रकाशिका submitted by me for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my work carried out under the Supervision of Dr. Kakali Ghosh, Professor, Department of Sanskrit, Jadavpur University, And that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere/elsewhere.

Countersigned by the-

| | |
|---|---|
| ------------------------ | --------------------- |
| Supervisor | Candidate |
| Dated: | Dated: |

॥ ॐ नमो भगवते वासुदेवाय ॥

वंशीविभूषितकरान्नवनीरदाभात्
पीताम्बरादरुणबिम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्
कृष्णात् परं किमपि तत्त्वमहं न जाने॥

(*गूढार्थदीपिका, श्रीमद्भगवद्गीताया*ः १८/७८ श्लोकव्याख्यायाम्)

॥ ॐ श्रीकृष्णार्पणमस्तु ॥

# मुखबन्धः

आर्षकाव्य–*महाभारतस्य* भीष्मपर्वान्तर्गतस्य अखिलशास्त्रसारभूतायाः *श्रीमद्भगवद्गीताया* गुणगौरवं सर्वैः स्वीक्रियन्ते। अर्जुनं निमित्तीकृत्य सर्वजनसमुद्धरणाय श्रीभगवत उपदिष्टा स्मृतिप्रस्थानाभिधेया एव *श्रीमद्भगवद्गीता* । गीतामाश्रित्य विभिन्नसंप्रदायेषु विविधा टीकाः विधृताः। तत्र श्रीमन्मधुसूदनसरस्वतीपाद–कृता *गूढार्थदीपिका*–नामधेया टीका अग्रगण्या एव। अष्टादशाध्यायसमन्वितां *श्रीमद्भगवद्गीतां* षट्कत्रयेण विभज्य प्रथमषट्के कर्मयोगतत्त्वं द्वितीयषट्के भक्तियोगतत्त्वं तृतीयषट्के च ज्ञानयोगतत्त्वं विहितमाचार्यपादेन। अद्वैतवेदान्ति–मधुसूदनसरस्वती–पादाचार्यो व्यक्तिगतधर्माचरणे वैष्णवमतादर्शी आसीत्। तत्त्वज्ञानार्थं भगवद्भक्तेरुपयोगित्वं तत्कृतिषु बहुधा प्रपञ्चितम्। भक्तियोगेन सह ज्ञानकर्मयोगयोः सम्यगालोचनमपि अद्वैतवेदान्तदर्शनालोकेन टीकायामस्यां प्रतिपादितम्। कर्म–भक्ति–ज्ञानयोगानाम् अद्वैतपरव्याख्यानं श्रीमन्मधुसूदनसरस्वती–पादस्य स्वकृतमौलिक–व्याख्यानमेव। *गूढार्थदीपिकाया*ः गूढाशयपर्यालोचनानन्तरं तेषामेव व्याख्यानानामेकत्रोप–स्थापनेन समन्वयसाधनप्रयासमात्रं प्रारभ्यते।

मम शोधनिबन्धः संस्कृतेन एव प्रस्तूयते। उल्लेखपञ्जिः प्रत्यध्यायम् अन्त्यटीकारूपेण(Endnote) उपस्थाप्यते। निबन्धान्ते ग्रन्थपञ्जिस्तु आङ्गलेन निवेद्यते। अस्य कृते विशेषज्ञानां परीक्षकानां च सानुग्रहानुमतिः प्रार्थ्यते।

नलिनीकान्त–ब्रह्ममहोदयैः संपादितस्य वङ्गभाषायामनूदितस्य *गूढार्थदीपिका*–व्याख्यासमन्वितस्य *श्रीमद्भगवद्गीता*–ग्रन्थस्य सुललितव्याख्यानाद् महतीं सहायतां प्राप्नोमि। संस्कृतसाहित्यपरिषद् इत्यभिधेये ज्ञानागारे संरक्षिते दुष्प्राप्यग्रन्थराजिपठनेन महान् उपकारो जायते। पुनः यादवपुर–विश्वविद्यालयस्य संस्कृतविभागीय–ग्रन्थागारस्य तथा केन्द्रीय–ग्रन्थागारस्य सहयोगिता अपि प्राप्ता। संस्कृतविभागीयाध्यापकाध्यापिकानामनुप्रेरणा मम

शोधकार्यस्य सहायिका जाता। ममाचार्याः काकलीघोषमहोदयाः सुहृदश्चेतच्छोधकार्योपस्थापने सहृदयं दिग्दर्शनं कुर्वन्ति। नमः पितृभ्यां याभ्यां विना मत्कार्यसंपादनं न संभवेत्। कार्येऽस्मिन् मम अर्धाङ्गिन्या अनुप्रेरणा तथा सहयोगिता अपि सानन्देन स्वीकुर्वे। मुद्रणयन्त्रागारस्य सर्वेभ्यः कर्मिभ्यश्च साग्रहशुभेच्छां ज्ञापयामि। सर्वेभो मम हार्दिककृतज्ञतां समर्पयामीत्यलमतिविस्तरेणेति शम्।

*********

# सूचिपत्रम्


| परिच्छेदनामानि | पृष्ठाङ्कः |
|---|---|
| प्रथमोऽध्यायः– *गूढार्थदीपिका*याः परिचयसामान्यम् | १–८ |
| द्वितीयोऽध्यायः– ग्रन्थकार–परिचयः | ९–२० |
| तृतीयोऽध्यायः– *गूढार्थदीपिका*यां कर्मयोगतत्त्वम् | २१–४९ |
| चतुर्थोऽध्यायः– *गूढार्थदीपिका*यां भक्तियोगतत्त्वम् | ५०–९६ |
| पञ्चमोऽध्यायः– *गूढार्थदीपिका*यां ज्ञानयोगतत्त्वम् | ९७–१४३ |
| षष्ठोऽध्यायः– उपसंहृतिः | १४४–१५६ |
| सन्दर्भग्रन्थानां पञ्जिः | १५७–१६१ |

# प्रथमोऽध्यायः

## *गूढार्थदीपिका*याः परिचयसामान्यम्

### उपोद्घातः

*श्रीमद्भगवद्गीता*या गुणगौरवं कस्य विपश्चितो न विदितम्। *महाभारत*स्य भीष्मपर्वान्तर्गतस्य *श्रीमद्भगवद्गीते*यं न हि केवलं सर्वासामेवोपनिषदामपि तु समग्रस्यापि पूर्ववर्तिनो वाङ्मयस्य सारभागमुपस्थापयति। अत एवोक्तं यथार्थतया–

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥[1] इति।

सर्वविषयावगाहित्वेन ज्ञानविज्ञानसमन्वयात्, अध्यात्मविद्याचरमोत्कर्षेण, जगतो विनश्वरत्व–प्रतिपादनेन, आचारविचारशिक्षया कर्तव्याकर्तव्यप्रबोधनेन, निष्कामकर्मदीक्षया चेयं सर्वेषामपि विपश्चितां हृदयं नितरामानन्दयति। उपनिषत्सु ये भावा निगूढशैल्या दार्शनिकपद्धत्या च समभिहिताः सन्ति गीतायामस्यां त एव भावा भावप्रकाशनशैल्या साधिष्ठया समासतश्च प्रस्तूयन्ते। *श्रीमद्भगवद्गीता*या भाषाशैली एतादृशी मनोरमा माधुर्यावगाहिनी च अत्यल्पशिक्षाप्रबुद्धोऽपि मानवो ग्रन्थस्यास्य सामान्यमर्थम् अवगन्तुं शक्नोति। अत एव 'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः' इति वचनविषयेऽपि संशयकणिका न वर्तते। प्रसङ्गेऽस्मिन् राधाकृष्णनमहाभागानाम् उक्तिरियं स्मर्तव्या–

The Bhagavadgītā which forms part of the Bhīṣma parva of the Mahābhārata is the most popular religious poem of Sanskrit literature. It is said to be the most beautiful perhaps the only true philosophical song existing in any known tongue. (*Indian Philosophy*, Vol. I, pp 519)

श्रीभगवतोऽनन्तमहिमावद् भगवन्माहात्म्यप्रतिपादकशास्त्रस्यापि विशालत्वमनुमीयते। भगवतः श्रीकृष्णस्य परमानुग्रहेण अर्जुनमुद्दिश्य लोककल्याणायोपदिष्टा सर्वशास्त्रसारभूता *श्रीमद्भगवद्गीता*। बहुशास्त्राध्ययनेन तात्पर्यावधारणस्य दुर्गमत्वाच्छ्रुतिमूलशास्त्राणां मूलीभूत–तत्त्वं ग्रन्थेऽस्मिन् गीतम्। शास्त्राध्ययनार्थं श्रद्धा–भक्ति–विश्वास–आचारानुष्ठानानां महदुपयोगित्वमस्ति। आचारवर्जितशुष्कशास्त्रपाठे शास्त्रं प्रति समादराभावाद् आत्मिकोन्नतिर्न भवेत्। यतः श्रुतिस्मृत्युपदिष्टाचार–परिपालनमेव परमधर्मत्वेन विहितम्। मन्वाचार्येणोक्तम्–

आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च। (मनु.– १/१०८) इति।

आचारवर्जितशास्त्राध्ययनं निष्फलपरिश्रममात्रमित्यपि स्मृतिशास्त्रे निगदितम्–

आचाराद् विच्युतो विप्रो न वेदफलमश्नुते। (मनु.– १/१०९) इति।

शास्त्रान्तरेऽपि आचारवर्जित–षडङ्गवेदाध्ययनस्य निष्फलत्वं द्योतितम्–

आचारहीनं न पुनन्ति वेदा
यद्यप्यधीताः सह षड्भिरङ्गैः। इति।

स्वाधिकारानुसारेण सामान्यधर्मस्य पालनं तथा विशेषधर्मस्यानुष्ठानमेव कर्तव्यम्। इदं च चित्तशुद्धेः तथा आध्यात्मिकचरमोत्कर्षस्य सोपानम्। न हि केवलं गीताशास्त्रस्य वेदमूलनिखिलशास्त्रनिचयस्यापि सारतत्त्वमिदम्। सम्यक्तयोक्तं श्रीभगवता–

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः (श्री. म. गी.– १८/४६) इति।

निःश्रेयसलाभ एव सर्वशास्त्राणां मूलोद्देश्यत्वेन भजते। निःश्रेयसस्तु तत्त्वज्ञानात् संभवति। अशुद्धचित्ते तत्त्वज्ञानं नोत्पद्यते। धर्मादृते चित्तशुद्धिरपि न भवेत्। श्रुति–स्मृति–शास्त्रादीनां निर्देशोऽयम्, न तु प्रलापमात्रम्। *तैत्तिरीये आरण्यके* पठितम्– धर्मेण पापमपनुदति। तस्माद्धर्मं परमं वदन्ति।

कोऽयं धर्मः? वेदमूला शास्त्रविधिः यस्य ज्ञापकम्– एतादृशस्य अनिष्टरहितस्य इष्टफलककर्मणः धर्मत्वं निर्दिष्टम्। वेदाविहितनिषिद्धकर्मणश्च अधर्मत्वं ज्ञेयम्। प्रमाणान्तरेणाविज्ञेयत्वाद् धर्माधर्मविषये शास्त्रमेव प्रमाणम्। कस्य कर्मणः स्वर्गजनकत्वं कस्य वा नरकफलजनकत्वं शास्त्रव्यतिरेकेन तन्न परिज्ञायते। शास्त्रविवर्जित–मनुष्यकल्पितयुक्तिसमूहस्य नास्ति किमपि प्रामाण्यम्। महर्षिणा जैमिनिना यथार्थतयोक्तम्– *धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात्*। ( मी. द.– १/१/३) धर्माधर्मतत्त्वविज्ञातार्थं श्रद्धया संपन्नः सन् स्वाधिकारानुसारेण शास्त्रीयविधिनिषेधादिकम् अनुष्ठेयम्। शास्त्रीयविधिमुल्लङ्घ्य यश्च स्वीयप्रवृत्त्यनुसारं प्रवर्तते तस्य सिद्धिः परागतिर्वा नोपलभ्यते। उक्तं च स्वयमेव श्रीभगवता–

> यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
> न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥
>
> तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
> ज्ञात्वा शास्त्रविधानं त्वं कर्म कर्तुमिहार्हसि॥ (श्री. म. गी.– १६/२३–२४) इति।

परमवैदिकैः सायन–शङ्कर–कुमारिल–शवराचार्यपादैः वेदाः तन्मूलकस्मृतिपुराणादीनां च शास्त्रपदवाच्यत्वं निरूपितम्। धर्माचरणार्थं शास्त्रनिर्दिष्टविधिनिषेधादीनां पालनं यथा अवश्यकर्तव्यं तथा गीताशास्त्रस्य पठने पाठने च अनुशासनमिदं पालनीयम्। यतः ग्रन्थोऽयं वर्णाश्रमधर्मस्य न हि विपर्ययबोधकः परं मर्यादास्थापक एव। एतेन *श्रीमद्भगवद्गीता*याः सर्वशास्त्रसारभूतत्वं व्यवस्थापितम्।

## टीकाग्रन्थाः

गीताशास्त्रस्य तात्पर्यावधारणार्थं व्याख्यामूलकग्रन्थानामावश्यकत्वमनुभूयते। प्रस्थानत्रयमध्ये *श्रीमद्भगवद्गीता* स्मृतिप्रस्थानरूपेण परिचीयते। वेदान्तदर्शनस्य विभिन्नसंप्रदायेषु गुरु–शिष्य–

परंपरया प्रस्थानत्रयाणामाश्रित्य विविधाः टीकाः समभूवन्। एतासु स्मृतिप्रस्थानं समाश्रित्य वङ्गजनन्याः वरपुत्रस्य अद्वैतवेदान्ति–श्रीमन्मधुसूदनसरस्वत्याः *गूढार्थदीपिका*नामधेया टीका सर्वातिशायिनी एव। अद्वैतवेदान्ते तस्य व्युत्पत्तिः कीदृशी प्रगाढा आसीत्तद् *अद्वैतसिद्धि*रिति–ग्रन्थाध्ययनेन परिज्ञायते। परमतार्किकोऽद्वैतवादी मधुसूदनस्य मनसि भक्तिरसधारा अपि पदमकरोदिति निश्चप्रचम्। *गूढार्थदीपिका*यां प्रतिपदं भक्तिरसमाधुर्यं प्रेक्ष्य प्रेक्षावन्तोऽस्य प्रशंसन्ति। अस्या रचनाशैली एतादृशी मनोरमा, सुसूक्ष्मविचारसमन्विता यया समेषामपि विपश्चितां हृद्या अपचितिभाक् च संजाता। न हि केवलं भक्तिरसतत्त्वमपि च ज्ञानकर्मयोगयोः सम्यगालोचनमत्राद्वैतवेदान्तदर्शनालोकेन प्रकाशितम्। *गूढार्थदीपिका*याम् अष्टादशाध्याय–समन्वित–गीतोपनिषदं षट्कत्रयेण विभज्य कर्म–भक्ति–ज्ञानयोगानां सम्यक्तत्त्वावलोकनम् आचार्यपादस्य चिन्तनशैल्या अनन्यवैशिष्ट्यम्।

## *गूढार्थदीपिका*याः परिचयसामान्यम्

शास्त्रतत्त्वावधारणं विना अनुभवस्य अत्युच्चे शृङ्गे अवगाहनमसंभवमेव। भगवत्प्रोक्तगीताशास्त्रे कर्म–भक्ति–ज्ञानयोगानाम् अन्तरङ्गसंबन्धादिकमवेक्ष्य गीताव्याख्याने स कृतयत्नो बभूव। *गूढार्थदीपिका*या उपक्रमे मधुसूदनाचार्येण स्वयमेव प्रोक्तम्–

एतत् सर्वं भगवता गीताशास्त्रे प्रकाशितम्।
अतो व्याख्यातुमेतन्मे मन उत्सहते भृशम्॥[2] इति।

तत्र अष्टादशाध्यायानां मध्ये प्रथमषट्कं कर्मयोगपरम्। ज्ञानकर्मयोगयोः आत्यन्तिकविरोधादपि तयोः समन्वयाभावाद् अद्वैतज्ञानप्राप्तये कर्मयोगस्यारादुपकारकत्वं मान्यम्। काम्य–निषिद्ध–कर्मत्यागपुरःसरं निष्कामकर्मानुष्ठानमेव 'कर्म'पदवाच्यम्। तत्र श्रीहरेर्जपादीनां परमधर्मत्वेन निर्णीतमाचार्यपादेन–

निष्कामकर्मानुष्ठानं त्यागात् काम्यनिषिद्धयोः।
तत्रापि परमो धर्मो जपस्तुत्यादिकं हरेः॥[3] इति।

भगवदर्पणबुद्ध्या कृतानि फलाभिसंधिरहितशास्त्रीयकर्माणि योगा इति ह्याचार्यपादेन एवमुक्तम्– योगैरपि भगवदर्पणबुद्ध्या फलाभिसंधिराहित्येन कृतानि कर्माणि शास्त्रीयाणि योगास्ते येषां सन्ति तेऽपि योगा[4] इति।

वेदान्तप्रतिपाद्यज्ञानं भक्तिरसेनाप्लुतम्। परमतत्त्वस्य यथार्थज्ञानं भक्त्या एव संभवति। आचार्यपादमतेन, श्रीकृष्ण एव परमतत्त्वम्। परमतत्त्वं प्रति शुद्धचित्तस्याकर्षणमेव भक्तिः। गम्भीरमिदम् आकर्षणेन चित्तलयात् परं स्वस्वरूपे परमतत्त्वस्य स्थितिवशात् स्वप्रकाशतत्त्वं स्फुरति। एतत्तु ज्ञानपदवाच्यम्। भक्तिविवर्जितशुष्कविचारात्मकं ज्ञानं न वेदान्तशास्त्रप्रतिपाद्यम्। केवलं बुद्धिवृत्त्या तत्त्वविषयिणी विचारधारा वेदान्तप्रतिपाद्यज्ञानपदवाच्यं भवितुं नार्हति इत्यपि प्रतीयते। निरावरणसुन्दरपरमतत्त्वस्य साक्षादपरोक्षानुभूतिरेव ज्ञानम्। एवमद्वैतमतं भक्तिरसधारया सह मध्यमषट्के तृतीयषट्के च आचार्यपादेन प्रतिपादितम्। यथा–

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ (श्री. म. गी.– १८/५५)

इति श्लोकव्याख्यायां केवलं भक्त्या पूर्णसत्यज्ञानानन्दघनरूपं श्रीभगवन्तं साक्षात्क्रियते तदेवमुच्यते– भक्त्या निदिध्यासनात्मिकया ज्ञाननिष्ठया मामद्वितीयमात्मानमभिजानाति साक्षात्करोति। यावान् विभुर्नित्यश्च यश्च परिपूर्णसत्यज्ञानानन्दघनः सदा विध्वस्तसर्वोपाधिरखण्डैकरस एकस्तावन्तं चाभिजानाति। ततो मामेवं ज्ञात्वा अहमस्मि अखण्डानन्दाद्वितीयं ब्रह्मेति साक्षात्कृत्य विशते, अज्ञानतत्कार्यनिवृत्तौ सर्वोपाधिशून्यतया मद्रूप एव भवति[5] इति।

पुनश्च, सर्वदा भागवतधर्मानुष्ठानेन अनुरागोत्पत्त्या श्रीभगवन्तमेव लभत इति विषयेऽपि संशयो न कर्तव्यस्तत्– 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु' (श्री. म. गी.– १८/६५) इति श्लोकव्याख्याने स्पष्टीकृतम्– मां भगवन्तं वासुदेवमेव एष्यसि प्राप्स्यसि वेदान्तवाक्यजनितेन मद्बोधेन। त्वं चात्र संशयं मा कार्षीः[6] इति। भगवच्छरणागतेः भेदत्रयव्याख्यानावसरे

परमानन्देनाप्लुतं रसिकभक्तस्य द्रवीभूतचित्तेन सह भक्तिज्ञानयोगयोः अपूर्वसमन्वयोऽप्यत्र प्रतिष्ठितः–

तस्यैवाहं ममैवासौ स एवाहमिति त्रिधा।

भगवच्छरणत्वं स्यात् साधनाभ्यासपाकतः।।[7] इति।

श्रीकृष्णभिन्नपरमतत्त्वं नास्तीति आचार्यपादेन यदुक्तं तन्नाद्वैतसिद्धान्तविरुद्धम्। आचार्यपादाभिप्रेता साकारकृष्णोपासना उपास्यपरमतत्त्वरूपेण ज्ञेया। उपास्यतत्त्वेषु श्रीहरेः श्रेष्ठत्वं परं तस्य ज्ञेयत्वं निर्गुणं निर्विशेषं च। एतेन श्रीकृष्णतत्त्वेनाद्वैतमतं न खण्डितमिति स्पष्टम्। एवं षट्कत्रये कर्म–भक्ति–ज्ञानयोगानां सम्यगालोचनम् आचार्येण कृतम्।

*गूढार्थदीपिका*यां गीताशास्त्रस्य व्याख्यानावसरे सुयुक्त्या मूलोक्तसिद्धान्त–प्रतिपादनार्थं प्रासङ्गिक–शास्त्रान्तर–सिद्धान्तनिचयस्य विचारोऽपि कृतः। टीकायाः स्थलविशेषः सूक्ष्मविचारसमन्वितोऽपि दृढाभिनिवेशपूर्वकाध्ययनेन अर्थावबोधः भवत्येव। टीकायाः सम्यगध्ययनेन स्मृतिपुराणादीनां तत्त्वेन सह षड्दर्शनविधृतानि मूलतत्त्वानि अप्यवज्ञायते। टीकायामस्यां गीतायाः मूलांशस्य 'च', 'वा', 'तु', 'हि' इत्यादयः शब्दसमूहस्य भावार्थोऽपि निरूप्यते। *गूढार्थदीपिका*याः द्वितीयाध्याये आत्मतत्त्वप्रतिपादकश्लोकानां व्याख्यायां सुयुक्तिद्वारेण अद्वैततत्त्वानि मधुसूदनाचार्येणोपस्थापितानि। *अद्वैतसिद्धिः; सिद्धान्तविन्दुः*– ग्रन्थादौ विधृतयुक्त्यादीनां संक्षिप्तसारोऽत्र *गूढार्थदीपिका*यां उपस्थापितः। टीकेयं प्रयत्नपूर्वकाध्ययनेन भारतीयदर्शनसंप्रदायानां साधनरहस्यम् अवज्ञायते। दर्शनशास्त्रादौ सुव्युत्पत्तिं विना *गूढार्थदीपिका*याः तात्पर्यावधारणं दुरधिगम्यमिति प्रतीयते। गीताव्याख्यानकाले केषांचिद् विषयेषु श्रीभगवता शंकराचार्येण सह आचार्यपादस्य मतवैषम्यं दरीदृश्यते। एकैव तुलायन्त्रे यथा गुञ्जायाः हेम्नश्च परिमाणं क्रियते तथापि द्वयोर्साम्यत्वं कदापि न भवेत्; एवम् उभययोः गीताशास्त्रव्याख्यातृत्वेऽपि शंकराचार्येण सह तस्य तुल्यता कदापि नाशङ्कनीया– इत्येवं प्रकारेण मधुसूदनाचार्यस्य विनयमाहात्म्यं प्रकाशितम्। उक्तं च तेन–

व्याख्यातृत्वेऽपि मे नात्र भाष्यकारेण तुल्यता।
गुञ्जायाः किन्नु हेम्नैकतुलारोहेऽपि॥[8] इति।

*गूढार्थदीपिका*यां सर्वत्र दुरुहतत्त्वानि आलोचितानि इति न सत्यम्। अनायासबोध्य–चमत्कारव्याख्यानान्यपि भिन्नभिन्नस्थानेषूपलभ्यते। दिङ्मात्रमेकमुदाहरणमत्र प्रस्तूयते। तत्र–

दुरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जयः।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥ (श्री. म. गी.– २/४९)

इति श्लोकव्याख्यायां ये फलकामनया निकृष्टं कर्म कुर्वन्ति जन्म–मरणादि–आवर्तनचक्रेण ते अतीवदीना भवन्ति इत्युक्तम्। क्षुद्रफलमात्रलोभेन फलेच्छाविरहित–परमानन्दानुभव–कर्मानुष्ठानविषये वञ्चिता इत्येतत्तासां दौर्भाग्यं 'कृपण'पदेनात्र निर्णीतम्। तत्र मधुसूदनसरस्वत्याः व्याख्यानशैली सहृदयान् भक्तरसिकान् नितरां नन्दयति– यथा हि कृपणा जना अतिदुःखेन धनमर्जयन्तो यत्किंचित् दृष्टसुखमात्रलाभेन दानादिजनितं महत् सुखमनुभवितुं न शक्नुवन्तीत्यात्मानमेव वञ्चयन्ति तथा महता दुःखेन कर्माणि कुर्वाणाः क्षुद्रफलमात्रलोभेन परमानन्दानुभवेन वञ्चिता इत्यहो दौर्भाग्यं मौढ्यं च तेषामिति कृपणपदेन ध्वनितम्[9] इति।

अन्ते वक्तव्यम्, अष्टादशाध्यायविशिष्टायाः *श्रीमद्भगवद्गीता*याः कर्म–भक्ति–ज्ञानकाण्डानां समन्वयग्रन्थरूपेण पर्यालोचनप्रयासः मधुसूदनाचार्यस्य अनन्यकृतिरिति निश्चप्रचम्। *गूढार्थदीपिका*ध्ययनेन संकीर्णसांप्रदायिकभावापनयनाद् गीताशास्त्रस्य यथार्थतात्पर्यावधारणं संभवेदिति मन्ये।

---

[1] गीताध्यानम्– ४

[2] गू. दी.– उपक्रमणिका– ४०

[3] गू. दी.– उपक्रमणिका– १२
[4] गू. दी.– गीता ५/५
[5] गू. दी.– गीता १८/५५
[6] गू. दी.– गीता १८/६५
[7] तत्रैव
[8] गू. दी.– गीता ६/१४
[9] गू. दी.– गीता २/४९

**********

# द्वितीयोऽध्यायः

# ग्रन्थकार–परिचयः

## २.१. उपोद्घातः

रत्नप्रसविनीयं वङ्गभूमिः। अस्यां बहवः कृतिनो जन्म लब्ध्वा जन्मभूमिं गौरवेण समलंकृतवन्तः। तेषां भारतीयमनीषिणां मूर्धन्यरूपः स्वनामधन्यः श्रीमन्मधुसूदनसरस्वती–पादोऽद्वैत–वेदान्तदर्शनस्य सुयोग्यतमः सारथिरासीत्। वङ्गजनन्या वरपुत्रस्य मधुसूदनसरस्वती–पादस्य नाम अस्मिन् वेदान्त–परिमण्डले को वा न जानाति। तत्कृतिषु भक्तिरसधारया आत्मानं परिषिच्य गङ्गा–यमुना–सरस्वतीनां ऊर्मिप्रवाह इव निरन्तरम् अमेयानन्दं को वा नानुभवति। आचार्यपादस्य पुण्यचरितं साहित्य–कृतयश्चात्र सुविस्तृत–रूपेण आलोच्यन्ते।

## २.२. जीवनवृत्तयः

श्रीमन्मधुसूदन–सरस्वती ईशवीये १८२५ अब्दे अधुना वङ्गदेशस्य फरिदपुर–जिलायाः कोटालिपाडा–परगणान्तर्गतमुनशिया–नामकं स्थानं स्वजनुषा अलंचकार। तस्य पितृवर्यः श्रीप्रमोदन–पुरन्दराचार्यः परं तु का नाम तस्य जननी इति न परिज्ञायते। पूर्ववर्तिनि काले कोटालिपाडा–परगणा वङ्गदेशस्य मादारीपुर–नामधेय–स्थानस्यांशरूपेण परिगण्यते। हिमाचलसंभूतगङ्गायाः तथा ब्रह्मपुत्रस्य च पुण्यधारया भूमिरियं पवित्रेति मेने। निरन्तर–नवसर्जन–प्रयासः पललमृत्तिका–समृद्धायाः भूमेरस्या अनन्य–वैशिष्ट्यम्। न हि केवलं जन्मभूमिः वंशानुगत–सृष्टिप्रतिभा अपि श्रीमन्मधुसूदनस्य मनीषाया उपादानभूतमासीत्। ईशवीय–द्वादश–शतकस्यान्तिमभागे साहावुद्दीनघोरी–नामधेय–शासकस्य स्वैराचारिशासने विक्षुब्ध–काण्वकुब्ज–प्रदेशं विहाय पण्डितप्रवर–राममिश्र–अग्निहोत्री स्वजनवर्गेण साकं नवद्वीपधाम्नि आश्रयं लेभे। कालेन ते कोटालिपाडा–परगणायां समुपस्थिताः। वेद–वेदान्त–

न्यायशास्त्रादिषु लब्धकीर्ति–पण्डितनिचयस्य आविर्भावो वंशेऽस्मिन् समवर्तत। वङ्गदेशे वेदानां प्रचारे प्रसारे च राममिश्राचार्यस्यापत्यानां महदवदानं स्वीकर्तव्यम्। अस्मिन्नेव वंशे कविवर–पुरन्दराचार्यस्य चतुर्थपुत्ररूपेण आविर्बभूव श्रीमान् मधुसूदनः। अष्टमवर्षीय–बालकस्य प्रतिभा समन्ततो विस्तृतिं लेभे। ईशवीय–षोडशशताब्द्याः द्वितीयभागे चन्द्रद्वीपेऽधुना वङ्गदेशस्य दक्षिणभागे वरिशाल–मण्डले नृपति–कन्दर्पनारायणस्य शासनं वर्तते। नृपतेः राजधान्यामाडम्बर–बाहुल्यविषये नासीत् कोऽपि शैथिल्यम्। विद्योत्साहि– नरपतिरूपेण चन्द्रद्वीप–राजस्य सुमहती ख्यातिः अश्रूयत। तेन राज्ञः राजसभायां विदग्धपण्डितानां समागमो दृश्यते स्म। कोटालिपाडायाः पण्डिताग्रगण्य–प्रमोदन–पुरन्दराचार्योऽपि वत्सरान्ते भागधेयप्रदानार्थं तत्र समुपस्थितोऽभवत्। एकस्मिन् संवत्सरे पित्रा साकं बालमधुसूदनोऽपि तत्रागमत्। शास्त्रनिष्णात–पुत्रप्रतिभा–वर्णने आचार्यवरस्याग्रहान्वित–चेतसोऽत्युत्साहोऽपि प्रकाशितः। आग्रहातिशयेन मधुसूदनविरचित–श्लोकादिश्रवणार्थं भूयो भूयः राजानम् अन्वरुन्ध पिता पुरन्दराचार्यः। वार्धकजनित–प्रतिबन्धकत्वहेतोः परवर्तिनि संवत्सरादावागमनासामर्थ्यमपि निवेदितम् आचार्येण। अविलम्बितेनैव स्वपुत्रस्य राजसभायां प्रतिष्ठालाभाय स कृतयत्नो बभूव। यथाकालं बालकस्य काव्यं वयं सर्वे श्रोष्याम इत्युक्त्वा राज्ञः सभागृह–त्यागादनन्तरं पुरन्दराचार्योऽपि पुत्रेण सह अतिथि–भवनमुद्दिश्य प्रस्थानमकार्षीत्। अतिक्रान्तेषु च कतिपय–दिवसेषु एकदा मधुसूदनस्य प्रतिभादीप्त–काव्यश्रवणात् परं नृपति–कन्दर्पनारायणः मौखिक–प्रशंसा–व्यतिरेकेन किमपि न कृत्वा रंहसा कार्यान्तरे जगाम। राज्ञः उदासीनत्वेनाभिमानाहत–पुरन्दराचार्येण चिन्तितं किमिदानीं राज्ञः विद्योत्साहित्वं स्तिमितं जातम् उत वा स्वस्य ग्रहवैगुण्य–फलमिदम्? वस्तुतस्तु मुघलशक्त्या आक्रमणाशङ्कया समासन्न–राजनैतिक–संकटाभिभूतस्य राज्ञः चित्तमाकुलीभूतमासीत्। काव्य–साहित्य–शास्त्रालोचनं सुधी–सज्जनसङ्गो वा तत्समीपे नीरसत्वेन प्रतीयमानोऽभवत्। क्रोधेन पुरन्दराचार्यो गृहागमनार्थं पुत्रेण समं नावम् आरोहत्। प्रत्युत कोटालिपाडायाम् अध्यापनादि–कार्यजात–संपादनार्थम् आचार्यसमीपे स्वभूमौ प्रत्यावर्तनमाशु–कर्तव्यत्वेन

निर्णीतम्। यात्राकाले पथिमध्ये वर्षणस्फीत–नद्याः उभयतीरे प्रकृति–शोभाधिक्य–दर्शने बालक–मधुसूदनस्य नासीत् किमपि औत्सुक्यम्। मौनमास्थितस्य बालस्य दृष्टिः नभसि स्थिरीभूता। पुरन्दराचार्योऽपि तूष्णीं स्थितः। सहसा पितृचरण–समीपे उपविश्य बालको दृढकण्ठेनावदत्, पितृदेव! गृहं न गमिष्याम्यहम्। मनुष्याराधनं त्यक्त्वा भगवद्भजनमेव करिष्यामि। राजप्रसादापेक्षया भगवत्प्रसादस्यैव उपजीव्यत्वं स्वीकर्तव्यम्। राजकृतावमानोऽयं न केवलं स्वस्य पितृदेवस्यापि। ब्राह्मण्य–धर्मस्य तथा शास्त्र–धर्मसंस्कृतेः अवमाननेयम्। तेजोदृप्ताभिमानासक्तस्य बालकस्य रोष–कम्पिताधरोष्ठ–स्फुरित–वाक्यमिदम्। दृप्तकण्ठेन स पुनरवदत्, 'पितः! संसार–त्यागपूर्वकमविलम्बितेनैव संन्यासं स्वीकरिष्यामि। भगवत्प्रसादेन यथा जीवामीति तथाशिषा मां बलवन्तं विधेहि। श्रीधाम–नवद्वीपे श्रीगौराङ्ग–महाप्रभोः पादपद्मेऽहं शरणं गमिष्यामि। मम गृहत्यागविषये कृपया तव संमतिं विज्ञापय।' द्वादशवर्षीय–बालकस्य–सोपपत्तिक–प्रस्तावेन वृद्धस्य वाक् रुद्धा। सोऽचिन्तयत्, राजानुग्रहापेक्षया श्रीभगवत्प्रसादस्य अत्युत्कृष्टत्वं नास्वीकारार्हम्। ज्ञानवृद्धाचार्यस्य मायाकृतबन्धन–खण्डनविषये स्वकीयेऽसामर्थ्येऽपि ज्ञानवृद्धाचार्यः पुत्रस्य तद्विषये सामर्थ्यं वैराग्यं चावलोक्य सविस्मयं परमाह्लादं प्राप। आकुल–कण्ठेन वारं वारं स पितृसकाशात् संन्यासग्रहणाय अनुमतिं याचते। पुरन्दराचार्यस्य मुखारविन्दात् सहसा 'सिद्धस्तु ते मनस्काम' इति आशीर्वचनं बहिरगच्छत्। गृहं प्रत्यागत्य श्रीमान् मधुसूदनः जननीमुखादपि वाक्चातुर्येण प्रव्रज्याया अनुज्ञां लेभे। क्रन्दनाकुलां जननीं समाश्वास्य बालकः श्रीगौराङ्गशरणे स्वजीवनमुत्सर्गीकृत्याहं कालम् अतिवाहयिष्यामीति प्रत्यवदत्। यथार्थवैराग्योदयं विना संन्यासस्य नास्ति किमपि सार्थक्यम्; तेन शास्त्रज्ञानार्जनेन लब्धाधिकारेण त्वया संन्यासः स्वीकर्तव्यः इत्युक्त्वा स्वपुत्रमुद्दिश्य वृद्धाचार्यः उपादिदेश। द्वादशवर्षीय–बालकः पुण्यतिथौ सर्वेभ्यः आशीषं लब्ध्वा गृहात् निश्चक्राम। अनेन वृत्तान्तजातेन कोटालिपाडायां सर्वत्रैव प्रभूतम् आलोचनं प्रारब्धम्। फरिदपुरस्य संसार–विरक्तोऽयं बालकः उत्तरकालीन–भारतवर्षस्य श्रेष्ठाद्वैतवादि–पदमलंकरिष्यतीति कोऽचिन्तयत्! पश्चिम–वयसि बालकोऽयं महावेदान्ति–संन्यासिनः

शंकराचार्यस्य तथा स्वामि–विद्यारण्यस्य उत्तरसाधको बभूव। दुर्गम–मार्गादीन् अतिक्रम्य स दुस्तरणीय–मधुमती–नद्याः समीपे समुपस्थितः। ध्यानाविष्टो भूत्वा जाह्नवीदेव्याः शरणागतिं लब्ध्वा स नदीतरणे समर्थोऽभूत्। नवद्वीपं समायातश्चासौ प्रेमावतार–श्रीगौराङ्ग–महाप्रभुः नवद्वीपधाम्नः नीलाचले चिराय प्रस्थित इति श्रुत्वा बालकः शोकाकुलो बभूव। कतिपयदिवसान् स गौरभक्त–वृन्देन समं श्रीकृष्णनामसंकीर्तन–सुधां पपौ, श्रीगौराङ्गस्मृतिधन्य–पुण्यस्थानानि चाद्राक्षीत्। अतः साधन–मार्गे केन मार्गेण इदानीं तस्याग्रगमनं भवेदिति विषयेऽपि स अचिन्तयत्। वैराग्याधिरूढेन मया संन्यास–मार्ग एवावलम्बनीय इति अन्तरोपलभ्यापि शास्त्रार्थपर्यालोचनया मोहमुक्तिः सुसाध्या संभवेदिति पित्राचार्योपदेशादग्रसरणं समीचीनममन्यत। अध्यात्मशास्त्राध्ययने स संकल्पं चकार। न्यायशास्त्रं हि भारतीय–दर्शन–साहित्यस्य प्रवेशद्वारमिव अभिमन्यते। न्यायशास्त्र–पारावारीणत्वं यावदेव स्यात् वैदग्ध्यमपि तावदेव निर्मलमुत्कृष्टं च भवेत्। शाणोपल–घर्षणेन तिग्मतरतामुपेतं शस्त्रं यथा क्षिप्रं किमपि छेत्तुं समर्थं तथैव गौतमीयशास्त्राभ्यासेन तीक्ष्णतरतां नीयमाना बुद्धिः सर्वाण्यपि शास्त्राणि अनायासेनैव प्रवेष्टुं शक्यते। नव्यन्याय–चर्चापीठरूपेण तदानीं श्रीधाम–नवद्वीपस्य प्रसिद्धिरासीत्। मथुरानाथ–तर्कवागीशादि–न्यायाचार्याः तत्राध्यापने यशस्विन आसन्। अत्रैव स्थित्वा न्यायशास्त्र–चर्चया बुद्धेर्दाढ्यं विधास्यामीति मनश्चकार मधुसूदनः। द्वादशवर्षीय–बालकस्य विचारबुद्धि–कौशलेनाभिभूतो मथुरानाथोऽपि विस्मय–विमुग्धो जातः। दुर्ज्ञेय–तत्त्वबहुल–न्यायग्रन्थादौ शीघ्रेण बालक–मधुसूदनस्य सुव्युत्पत्तिरधिगता। आयत्तीकृतश्च गङ्गेशोपाध्यायकृतः *तत्त्वचिन्तामणिः*, पक्षधरमिश्र–रघुनाथशिरोमणि–मथुरानाथादीनां टीकानिचयश्चापि अधीतस्तेन। न्याय–शास्त्रानुशीलन–रतोऽपि नवद्वीपस्य भक्तसाधकवर्ग–मध्येऽवस्थानकाले बालकस्य हृदयं भक्तिरसेनाप्लुतम्। व्रजेन्द्र–नन्दनस्य रसोज्ज्वल–विग्रह–ध्यानेन स प्रत्यहं रसाविष्टोऽभवत्। आबाल्यम् अवतार–पुरुषोऽयं श्रीगौराङ्गदेव इति भावनायां तच्चित्तं बद्धमूलमासीत्। महाप्रभोः प्रचारित–तत्त्वेन रसमधुर–लीलया चाप्यलोडितं तस्य हृदयम्। माधुर्य–समन्वित–द्वैतवादस्य प्रचारः

श्रीमहाप्रभुना क्रियते– तत्त्वमिदं बालक–हृदये सदा गुञ्जितमेव। प्रत्युत नव्य–न्यायाध्ययनेन विचारशक्त्या द्वैतवादेऽपि तस्य मतिः क्रमेण दृढीभूता। ईश्वरः जीवः जगत् चेत्येतत् त्रितयस्य पृथक्त्वं नैयायिकानामभिमतम्। अतः शास्त्रस्यास्य सिद्धान्तो द्वैतमतानुगत इति वक्तव्यम्। स्वप्रतिभया विद्यावत्तया चैकेन महाग्रन्थेन महाप्रभु–संमत–दार्शनिक–मतानां श्रेष्ठत्वं स्थापयिष्यामः इति मनसि अचिन्तयत् बालकमधुसूदनः। एतत्कार्यस्यान्तरायः शंकराचार्य–संमतोऽद्वैतवाद एव। अद्वैतमत–खण्डनं विना द्वैतसंमत–भक्तिवाद–स्थापना कथं संभवेत्? अद्वैतमतस्य नैपुण्येनाध्ययनार्थं तथा चाद्वैत–शास्त्रस्य कुत्र शैथिल्यमस्तीति ज्ञानार्जनार्थं वेदान्त–चर्चास्थलीं वाराणसी–नगरीं स संप्राप्तः। निरन्तर–शास्त्रचर्चया विचार–द्वन्द्वालोडनेन च मुखरिते काशीधाम्नि रामतीर्थ–उपेन्द्रतीर्थ–नारायणभट्ट–माधवसरस्वत्यादि–पण्डितप्रवराः निवसन्ति स्म। तेषां विपश्चितां मध्ये वेदान्तकेशरि–रामतीर्थाचार्य–सविधे मधुसूदनो वेदान्त–शास्त्राभ्यासं चकार। वेदान्ताध्ययनार्थम् अधिकारिगुणाः तन्मध्ये परिपूर्णतया विकाशं लेभिरे। वैराग्येन भक्त्या कुशाग्र–विचारधारया च साकं श्रम–निष्ठया तस्य लोकोत्तर–प्रतिभा लोकेषु प्रचारिता। अत्यल्पकाल–मध्ये दैवप्रतिभा–बलेन दुरूहवेदान्त–शास्त्राणि मधुसूदनेनायत्तीकृतानि। एकदा दाक्षिणात्य–प्रदेशस्य पण्डिताग्रगण्य–नारायणभट्टेन सह काशीधाम–निवासिनोः वेदान्ताचार्य–नृसिंहाश्रमस्य उपेन्द्र–सरस्वत्या च शास्त्र–विचारोऽभूत्। विचारसत्रे मधुसूदनस्य सहायतामवाप्य अपि दाक्षिणात्य–मीमांसकस्य युक्ति–निचयेन वेदान्ति–पण्डितद्वयस्य विचारवाणी निस्पन्दा बभूव। अनेन घटनाजातेन मीमांसा–शास्त्राधिगमे स सचेष्टोऽभूत्। न्याय–मीमांसा–शास्त्रद्वये काशीनिवासि–माधव–सरस्वत्याः प्रगाढ–व्युत्पत्तिः श्रूयते। आचार्यसमीपे शास्त्राभ्यासादनन्तरं मीमांसा–शास्त्रेऽपि निष्णातो जातोऽसौ। एवं विविध–शास्त्रादौ तस्याधिकारः क्रमेण सुप्रतिष्ठितो जातः। एकनिष्ठ–साधनेन शास्त्रानुशीलनेन च बालकस्य तत्त्वोज्ज्वला बुद्धिः वेदान्तस्य गूढार्थाधिगमेन उज्ज्वलतरा बभूव। तत्समक्षेऽद्वैतज्ञान–रहस्यमुद्घाटितम्, भक्तिवादस्य स्वरूपमपि नवरूपेण प्रकाशितम्। श्रीभगवान् एवान्तरात्मा इति ज्ञानमृते जीवस्य शुद्धा भक्तिः आत्मसमर्पणमपि न संभवेदिति

विषयः तस्योपलब्धि–पथमवतरति। आत्म–स्वरूपस्यावबोधेन साधकस्य भेदज्ञानं विनश्यति अभेदाद्वैत–ज्ञानं चापि सत्तायां समुद्भासते। स्वयमहमेवान्तरात्मा इत्यनुभवोऽपि जायते। आत्मसमर्पणे भक्तौ च भेदज्ञाने सति जीवस्य ईश्वराद् भिन्नता द्वैतभावना वा विद्यते। *बृहदारण्यकोपनिषदि– न वा अरे पत्युः कामाय पतिः प्रिय भवति, आत्मनस्तु कामाय पतिः प्रियः भवति*[1] इत्यात्मप्रीत्या दृष्टान्तेन परमाद्वैत–ज्ञान–स्वरूपं महर्षि–याज्ञवल्क्येनोद्घाटितम्। अत्र आत्मना सहैव प्रकृतप्रेम भवति; तेन सह संबन्ध–वशादन्येषामुपरि चेत्यर्थोऽवगम्यते पूर्वोद्धृत–श्रुतिवाक्यात्। पूर्णतम–प्रेम्ना भक्त्या वा श्रीभगवन्तम् आत्माभिन्नत्वेन ज्ञातुं साधकः समर्थो भवति। अतः पूर्णाभेद–ज्ञान एव पूर्णभक्तिर्निहिता, नान्यत्र। केवलं श्रुतिरूप–प्रामाण्य–शास्त्रेण अद्वैतब्रह्मणः परमतत्त्वं निर्दिश्यते, एतत्तु साधक–मधुसूदनस्याभिमतम्। अद्वैत–सिद्धान्तस्य यौक्तिकत्व–विषये तन्मनसि नासीत् कोऽपि संशीतिलेशः। अद्वैततत्त्व–निहित–परमसत्यं तज्जीवने अच्छेद्य–संसर्गेण बद्धमासीत्। भ्रान्तबुद्ध्या अद्वैतमत–खण्डनार्थं स प्रयत्नं चकार। गुरुसमीपे वेदान्त–पाठस्य उद्देश्य–गोपनरूप–कार्यानुष्ठानादनन्तरं तस्यानुशोचनं संजातम्। इदं कपटाचरणरूप–पापक्षालनार्थं स गुरुचरणे समुपस्थितः। श्रुत्वा च वृत्तान्त–जातं रामतीर्थाचार्येण प्रोक्तम्, 'अद्वैततत्त्व–स्फुरणेन शास्त्रानुशीलनस्य सार्थक्यत्वेऽपि प्रायश्चित्त–रूपेण मण्डलेश्वर–विश्वेश्वर–सरस्वती–सकाशे संन्यास–ग्रहणं कुरु'। पुनश्च गुरुणोक्तम्, 'माध्व–संप्रदायस्य व्यासराय–तीर्थेन *न्यायामृत*ग्रन्थे अद्वैतमतं खण्डितम्; नव्यन्याय–विषये तव प्रगाढा व्युत्पत्तिरस्ति, तेन ग्रन्थस्यास्य खण्डनं कृत्वा अद्वैतमतं स्थापयित्वा च मम सन्तोष–विधानं क्रियतामि'ति गुरोरादेशं गृहीत्वा सानन्दं तस्मै नमश्चकार। समुपस्थिते च विश्वेश्वराचार्याश्रमे गुरुणा प्रोक्तं केवलं पाण्डित्येन संन्यासस्य योग्यता नोत्पद्यते; वैराग्यस्य तथा भगवद्भक्तेः आवश्यकत्वमप्यस्ति। श्रीमन्मधुसूदनस्य संन्यास–संकल्पः सुदृढ उत वा आवेग–संजातः तद् विचारयितुं *श्रीमद्भगवद्गीता*याः भक्तिमूलायाः एकस्याः टीकाया रचनार्थं तमादिदेश। विश्वेश्वर–महाराजस्य निर्देशानुसारेण स गीतायाः *गूढार्थदीपिका* नामधेयटीकां विरचयामास। अस्यां टीकायां प्रतिपदं तत्त्वज्ञानेन सह भक्ति–

रसस्यामृतवर्षि–मेलनधारया विश्वेश्वराचार्यो विस्मय–विमुग्धतामुपगतः। संन्यास–ग्रहणात् परं रामतीर्थाचार्य–सकाशे अद्वैतग्रन्थ–रचनायाः यः संकल्पः कृतस्तस्य परिपालनार्थं स कृतयत्नो बभूव। बहुदिवस–साध्य–परिश्रमेण विद्यावत्तया एकनिष्ठ–शास्त्र–साधनया च तेन *अद्वैतसिद्धि*रिति ग्रन्थो विरचितः। व्यासतीर्थो *न्यायामृत*ग्रन्थे अद्वैतमत–खण्डनार्थं या युक्ति–निचयस्यावतारणा कृता *अद्वैतसिद्धि*ग्रन्थे मधुसूदनेन पङ्क्ति–व्यावृत्ति–पूर्वकं सुयुक्ति–द्वारेण माध्वमत–खण्डनेन अद्वैतमत–स्थापनं कृतम्। तदानीं भारतवर्षे द्वैतवादिनां प्राधान्यानि आसन्निति परिदृश्यमानानि। एतेनाद्वैत–मतं बहुलांशे स्तिमितं जातम्। *अद्वैतसिद्धि*ग्रन्थस्य प्रकाशनात् परं अद्वैत–वादस्य विजयः चतसृषु दिक्षु विस्तारं लेभे। संन्यासी तथा गुरुः विश्वेश्वर–सरस्वत्याः समीपे वेदान्ति–मधुसूदनस्य अध्यात्म–साधनायाः समारम्भः। एकदा विश्वेश्वराचार्य–महाभागाः शिष्यवर्गेण सह तीर्थ–भ्रमणार्थं बहिर्जगाम। प्रस्थानकाले यमुना–तटस्य निर्जन–प्रदेशे श्रीमधुसूदनं कियत्कालं यावत् साधन–भजनार्थमादिदेश। स्थितिकाले च तत्रैव अलौकिकव्यापारोऽघटत। एकस्मिन् दिवसे शूल–रोगाक्रान्ता मुघलनृपतेः आकवरस्य पत्नी यमुनापुलिने तपस्या–निरत–संन्यासि–सकाशाद् औषधसेवनेन रोगमुक्ता जातेति स्वप्नावस्थायामपश्यत्। संन्यासाश्रमिषु सम्राजः विश्वासो भक्तिर्वा श्रूयते। यमुनातीरे कश्चित् संन्यासी ध्यानमग्नोऽस्ति न वेत्यनुसंधानार्थं तेनादिष्टम्। गृहीते च समाचारे अर्धाङ्गिन्या सह छद्मना स तत्राजगाम। सुदीर्घकालात् परं ध्यानावसाने आकुलीभूत–कण्ठेन राज्ञी व्याधिविषयं संन्यासिने निवेदयामास। श्रुत्वा चाचिरेणैव भगवत्कृपया रोगमुक्तिर्भविष्यतीति तं सम्राजं प्रत्युवाच। शीघ्रमेव भार्यायाः शूलव्याधि–निराकरणात् परं भूपतिः आत्मपरिचय–प्रदानपूर्वकं प्रभूत–धनरत्नादिकं संन्यासिने प्रदातुमैच्छत्। निस्पृहसाधुना सविनयं तत् प्रत्याख्यातम्। तीर्थ–भ्रमणात् प्रत्यागत्य वृत्तान्त–जातं श्रुत्वा सरस्वती–महाराजो महानन्दमुपगतः। मधुसूदन–सरस्वत्याः साधनख्यातिः पण्डित–समाजेऽपि विस्तृतिं लेभे। सुदीर्घ–कालादनन्तरं मधुसूदनाचार्यस्य वयोवृद्धत्वेन सममतुलनीय–प्रतिपत्तिश्च संजाता। *गूढार्थदीपिका* तथा *अद्वैतसिद्धिः* इति ग्रन्थरचनाया अनन्तरमाचार्यपादस्य लेखनीमुखाद् विविध–शास्त्रग्रन्था

टीकाश्च विनिःसृताः। समकालीन–भारतवर्षस्य मुख्यवेदान्ती तथा एकपत्रि–शास्त्रविद्रूपेण स लोकेषु परिचितः। तदानीं भारतीय–साधकानां प्राणकेन्द्र–रूपेण वाराणसी–धाम्नः माहात्म्यं सर्वैः स्वीक्रियते। वङ्गदेशस्य कोटालिपाडायाः बालकः वाराणसी–नगर्या अप्रतिद्वन्द्वि–वेदान्तकेशरि–रूपेण सुपरिचितः। नृपतेः कन्दर्पनारायणस्य राजसभायाम् एकदा अवज्ञातः तेजोदृप्तो बालकोऽयं राजानुग्रहम् अनादृत्य भगवत्प्रसादेनात्मानं कृतार्थम् अमन्यत। गङ्गातीरवर्ति–काशीतीर्थस्य 'चौषट्टियोगिनी–घाट'नामधेयस्थाने मधुसूदनाचार्यस्य अदूरवर्तिनि 'हरिश्चन्द्र–घाट'नामके स्थाने च साधक–तुलसीदासस्याश्रमः आसीत्। पाण्डित्ये तथा अलौकिक–प्रतिभाविषये इष्ट–रामनाम–भजने च तुलसीदासस्यानन्यसाधारणत्वं सर्वजनमान्यम्। महात्मना तुलसीदासेन सह श्रीमन्मधुसूदनस्य नैकट्यसंबन्धो विद्वद्भिः ज्ञायते। तुलसीदासः स्वकीय–शिक्षानीतेः भजनरीतेश्च संस्कृत–भाषामपहाय सर्वजनबोध्य–हिन्दीभाषया प्रचारे व्रती अभूत्। आर्षकाव्य–*रामायणम*पि स हिन्दी–भाषामाश्रित्य अनूदितवान्। आचार्यपादस्य एतादृशाभिरुचि–विषये पृष्टेन तुलसीदासेन प्रत्युक्तम्–

हरि हर यश सुर नय गिरा, वरणहि सन्तु सुजान।
हाण्डी हाटक चारुचीर रान्धे स्वाद समान॥

अर्थात्, श्रीहरेः हरस्य वा यशोगाथा साधु–भाषया देव–भाषया लोक–भाषया वा यया कयापि भाषया क्रियते सर्वत्र समानोऽर्थः प्रतीयते। यतो हि स्वर्ण–स्थाल्यां मृत्तिका–स्थाल्यां वा रन्धनेन आहार–द्रव्यस्य स्वादभिन्नता न ज्ञायते।

तुलसीदासस्य प्रत्युत्तरविषये मधुसूदन–पादाचार्यस्याभिमतं किमित्युक्ते अमृतवर्षि–श्लोकेन स प्रत्यवदत्–

परमानन्दपत्रोऽयं जङ्गमस्तुलसीतरुः।
कविता मञ्जरी यस्य रामभ्रमरचुम्बिता॥ इति।

अस्यार्थः तुलसीदासेन समारोपितवर्णानि पत्राणि परमानन्दमयानि। धावितुलसीतरुरूपस्य तुलसीदासस्य कवितामञ्जरी रसपिपासुना रामभ्रमरेण चुम्बिता भवति। श्लोकेनानेन प्रवीण–वैदान्तिकस्य अनवद्य–भक्ति–भावो वैदग्ध्यं चापि प्रकाशिते। उदारत्व–गुणग्राहित्वयो–र्मेलनमिदम् अन्यत्र सुदुर्लभम्। एतादृश–व्याख्यानेन रक्षणशील–ब्राह्मणा अपि तुलसीदासं प्रति श्रद्धाभाव–संपन्ना जाता। तुलसीदासस्य नवोत्सारित–भक्तिधारायाः निर्बाध–प्रसाराय श्रीमन्मधुसूदनाचार्यस्य परमोपयोगि–समर्थनं प्रयोजनमासीत्। गङ्गा–यमुनयोः प्रवाह इव ज्ञान–भक्ति–योगयोः अविच्छिन्न–धारा मधुसूदन–सरस्वत्याः जीवन–दर्शने समवेतेति पूर्वोक्त–वृत्तान्तादवगम्यते। द्वैतवाद–संमत–युक्त्यादि–खण्डन–पुरःसरमद्वैत–मत–स्थापना येन कृता तस्यैव लेखनी–प्रसूता प्रेमभक्ति–रस–पूर्णा पंक्तिरियं समुपलभ्यते–

अद्वैतसाम्राज्यपथाधिरूढा स्तृणीकृताखण्डलवैभवाश्च।
शठेन केनापि वयं हठेन दासीकृता गोपवधूविटेन॥ इति।

श्रीहरेः परम–मधुर–रूपस्य तथोपासनाया उल्लेख्यः गीताव्याख्याने श्रीमन्मधुसूदनेनैव कृतम्–

वंशीविभूषितकरान्नवनीरदाभात्
पीताम्बरादरुणबिम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्
कृष्णात् परं किमपि तत्त्वमहं न जाने॥[2] इति।

श्रीकृष्णतत्त्वभिन्नं परमतत्त्वमस्ति न वेति श्रीमन्मधुसूदनेन न ज्ञायते। वचनमिदमद्वैत–मतविरोधी इति वक्तुं न शक्यते। या साकार–कृष्णोपासना अत्राभिधीयते तत्तूपासनायां परमतत्त्वम्। उपास्य–तत्त्वेषु श्रीहरेः श्रेष्ठत्वं परंतु भगवतः स्वरूपमवश्यमेव निर्गुणं निर्विशेषं च। अतः श्रीकृष्ण–तत्त्वेनाद्वैत–तत्त्वं न खण्डितमिति स्पष्टम्। *गूढार्थदीपिकायां* भक्त्याः प्रकारभेद–

वर्णनावसरे आचार्यपादेन यदुक्तं तेन ज्ञान–भक्ति–योगयोः समन्वय एव प्रकाशितः। *अद्वैतसिद्ध्य*भिधानया एकयैव कृत्या आचार्यपादः अनुपमं यशः लेभे।

ज्ञान–भक्ति–योगयोः समन्वयवादेन साकमलौकिक–योग–शक्त्या तस्य ख्यातिः विस्तृता जाता। अद्वितीयाद्वैताचार्य–रूपेण परिचिति–लाभात् तं गुरु–रूपेण वरितुं वाराणसी–धामं बहुविध–शिष्याः समागताः। बलभद्र–शेषगोविन्द–पुरुषोत्तमसरस्वत्यादि–कृतिछात्राः श्रीमन्मधुसूदनाचार्यस्य शिष्या आसन्। बलभद्र–भट्टाचार्यस्योल्लेखः आचार्यपादेन स्वकृत–*सिद्धान्तविन्दु*ग्रन्थस्यान्ते 'बलभद्रस्य कृते कृतो निबन्धः' इत्यनेन उक्तः। अन्तेवासी शेषगोविन्दः शेषकृष्ण–पण्डित–नामधेयेनापि सुपरिचितः। स वैयाकरणप्रवर–भट्टोजि–दीक्षितस्याचार्यो बभूव। शंकराचार्यकृत–*सर्वसिद्धान्तसंग्रह*–ग्रन्थस्य टीकैका तेनैव कृता। आचार्य–पादस्यापरेण शिष्येण पुरुषोत्तमसरस्वत्या *सिद्धान्तविन्दु*–ग्रन्थस्य एका टीका अपि विरचिता। माध्वपण्डितः व्यासरामः तथा गौडीय–वैष्णवाचार्यः श्रीजीव–गोस्वामी नामाद्वैतवाद–विरोधि–शिष्यद्वयमप्यासीद् आचार्य–वरस्यान्तेवासिनौ। *अद्वैतसिद्धि*–ग्रन्थेनाद्वैतवाद–विरोधि–व्यासराजस्य *न्यायामृत*–ग्रन्थस्य हीनबलत्वं जातमेव। कपट–शिष्यत्व–ग्रहणेन अद्वैतवेदान्त–दर्शनस्य रहस्य–परिज्ञानार्थम् *अद्वैतसिद्धेः* विपक्ष–मत–विशिष्ट–ग्रन्थरचनार्थं च व्यासराजः स्वशिष्य–व्यासरामं मधुसूदनाचार्य–सकाशं प्रेषयामास। व्यासरामस्य छल–विषये विजान्नपि आचार्यवरस्तं यथोपयुक्त–रूपेण शिक्षयामास। परवर्तिनि समये व्यासरामेनाद्वैतवाद–विरोधिनी एका टीका विरचिता। आचार्यस्य बलभद्र–नामधेयेन एकेनान्तेवासिना स्वकृत*सिद्धिव्याख्यायां* प्रागुक्त–ग्रन्थस्य खण्डनं कृतम्।

एकदा वाराणस्यां गृहीतसंन्यासव्रतेषु 'महम्मदीय'संप्रदायस्य उत्पीडनादि–कार्यजातं प्रेक्ष्य ते संन्यासिश्रेष्ठ–धर्मगुरु–मधुसूदनसरस्वत्याः शरणं जग्मुः। अद्वैत–तत्त्वानुध्याने सदा निरतोऽपि व्यावहारिक–कर्तव्यस्य गुरुत्वम् आचार्यपादेन नोपेक्षितम्। सर्वशास्त्र–विषयिण्यां समाहूत–विद्वत्सभायां मधुसूदनस्य विचारशैलीं विद्यावत्ताम् अनन्यसदृश–गुणराजिं च पश्यन्तः सर्वे

विस्मय–विमुग्धतामुपगताः। आचार्यवरस्य शास्त्र–प्रतिभा–विषये समकालीन–पण्डितैर्यदुक्तं तदद्यापि स्मर्यते–

वेत्ति पारं सरस्वत्याः मधुसूदनसरस्वती।

मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वती॥ इति।

अर्थात्, ज्ञानाधिष्ठात्र्या वाग्देव्याः सरस्वत्या विद्यावत्तायाः पारं जानाति मधुसूदनः, मधुसूदनाचार्येणाधिगत–ज्ञानभाण्डारस्य परिमाणं च सरस्वती वेत्ति। अस्मिन्नेवावकाशे संन्यासिनां रक्षार्थं सम्राट्–समीपे निवेदने कृते आचार्यस्य शास्त्र–नैपुण्येन समुपस्थित–'महम्मदीय'–पण्डितनिचयः पराभूतः।

समतिक्रान्तेषु च कतिपय–दिवसेषु आचार्यपादो वार्धकमुपगतः। महायोगि–गोरक्षनाथस्य विदेहि–सत्तया सह मधुसूदनस्य साक्षात्कारोऽभूदिति श्रूयते। एकदा गङ्गा–स्नानान्तरं नदीतटमारूढे ज्योतिर्मण्डित–सूक्ष्म–देहमाश्रित्य महायोगि–शंकरावतारो गोरक्षनाथो मधुसूदनाचार्य–समक्षे आविर्बभूव। आत्मपरिचय–प्रदान–पूर्वकं योगिवरस्तस्मै महार्घ–रत्नमेकं प्रददौ। चिन्तामणि–रत्नमिदं कस्मै ददामीति मनसि विचार्य योग्याधिकारिणे तस्मै प्रयच्छामीति मधुसूदनमुद्दिश्य स प्रत्युवाच। प्रणति–निवेदन–पूर्वकं मधुसूदनाचार्यस्तु अनेन मे प्रयोजनं नास्ति, योग्यतरपात्रमन्विष्य त्वं देहीति अवदत्। भूयो भूयोऽनुरुध्यमानः स रत्नं गृहीत्वा गङ्गास्रोतसि निचिक्षेप। स्मितहास्येन मधुसूदनमुद्दिश्य गोरक्षनाथोऽवदत्, तर्हि योग्याधिकारिणे चिन्तामणि–रत्नं प्रदत्तं न वेति चिन्तय।

## २.३. सारस्वतचर्चा–

श्रीमन्मधुसूदन–सरस्वती–पादस्य सारस्वत–साधनाया विवरण–सामान्यमत्र प्रस्तूयते। तस्य प्रथिततमाः कृतयः सन्ति। आचार्यपादेन– i). *अद्वैतसिद्धिः* ii). *अद्वैतरक्षणम्* iii). *आनन्दमन्दाकिनी* iv). *ऋग्वेदजटाद्यष्टविकृतिविवरणम्* v). *कृष्णकुतूहलनाटकम्* vi). *प्रस्थानभेदः* vii). *भक्तिभाष्यनिरूपणम्* viii). *भगवद्भक्तिरसायनम्* ix). *राज्ञां प्रतिबोधः* x).

*वेदान्तकल्पलतिका* xi). *सर्वविद्यासिद्धान्तवर्णनम्* xii). *सिद्धान्तविन्दुः* xiii). *आत्मबोध–टीका* xiv). *भगवद्गीतायाः* टीका *गूढार्थदीपिका* xv). *वेदस्तुति–टीका* xvi). *शाण्डिल्यसूत्र–टीका* xvii). *शास्त्रसिद्धान्तलेश–टीका* xviii). *संक्षेपशारीरक–टीका* xix). *रासपञ्चाध्यायी–टीका* xx). *भागवतव्याख्या* xxi). *हरिलीलाव्याख्या* xxii). *महिम्नस्तोत्रव्याख्या* इत्यादयो बहव एव ग्रन्थाः प्रणीताः। ग्रन्थकारस्य अमरकृति–रूपेण पूर्वोक्त–ग्रन्थराजिः अद्यापि विराजते।

## २.४. उपसंहृतिः

आनुमानिके ईशवीये १६३२ अब्दे सप्तोत्तर–शतवर्षे वयसि स हरिद्वार–तीर्थस्य गङ्गातीरं समागतः। योगबलेन स्वस्य समासन्न–महाप्रयाण–क्षणविषये सिद्ध–पुरुषोऽयम् अजानात्। शास्त्रचर्चायाः तथा शास्त्रोपदेशादि–बहिरङ्ग–कार्यानुष्ठानाद् आत्मानं प्रत्याहृत्य पुण्यलग्ने मोक्षप्रदे गङ्गातीरे भारत–प्रसिद्धोऽयं भावुकः संसारं शोकसागरे निमज्य स्वयं महा–समाधौ निमग्नः।

---

[1] बृह. उ.– २/४/५

[2] गू. दी., गीता– १८/७८

**********

# तृतीयोऽध्यायः

# *गूढार्थदीपिका*यां कर्मयोगतत्त्वम्

## उपोद्घातः

मधुसूदनसरस्वतीपादकृता *श्रीमद्भगवद्गीता*या *गूढार्थदीपिका*–टीकायां कर्मयोगतत्त्वं केन प्रकारेणैव विधृतं तदेवास्मिन्नध्याये विशदीक्रियते। कर्मयोगस्याद्वैततत्त्वप्रकाशविषयेऽप्यत्र आलोच्यते। अष्टादशाध्यायसमन्वितगीतोपनिषदं षट्कत्रयेण विभज्य ज्ञानकर्मणोः समन्वयाभावात् प्रथमषट्के कर्मनिष्ठातत्त्वं विधृतमाचार्यपादेन–

एकमेकेन षट्केन काण्डमन्त्रोपलक्षयेत्।
कर्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमान्त्ययोः॥[1] इति।

कर्मयोगपरं प्रथमषट्कमवलम्ब्य एवात्र पर्यालोचनं क्रियते। प्रसङ्गेऽस्मिन् कोऽयं कर्मयोगस्तथा *गूढार्थदीपिका*टीकायां प्रतिपादितं कर्मयोगतत्त्वं वैशद्येन विचार्यते।

## कोऽयं कर्मयोगः

समस्तवेदार्थसारसंग्रहभूतं गीताशास्त्रम्। अष्टादशाध्यायसमाप्तेर्गीतायाः योगप्राधान्यं स्पष्टतया अवज्ञायते। योग–शब्दस्य बहवोऽर्था भवितुमर्हन्ति। युज्–धातोरुत्तरं घञ्–प्रत्ययनिष्पन्नो योग–शब्देन परमात्मना सह जीवात्मनः संयोगो मेलनं वा बोध्यव्यम्। उक्तं च धातुपाठे– युजिर् योगे[2] । पुनश्च 'युज समाधौ'[3] इत्यनुसारेण योग–शब्दस्यार्थः समाधिरिति। समाधिस्त्वष्टाङ्गयोगस्य परमावस्थायामेव भवति। प्रमाणादि–चित्तवृत्तीनां निरोधार्थेऽपि योगशब्दः प्रयुज्यते। महर्षिपतञ्जलिना सूत्रितम्– 'योगश्चित्तवृत्तिनिरोधः'[4] । *श्रीमद्भगवद्गीता*यामपि सिद्ध्यसिद्ध्योः समत्वरूपं चित्तसमाधानमेव योग इत्यभिधीयते–

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जयः।

सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ (श्री. म. गी. २/४८)

इममेवार्थमधिकं स्पष्टीकर्तुं भगवान् अग्रे प्रावोचत्–

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।

तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम्॥ (श्री. म. गी. २/५०)

क्रियमाणेषु कर्मसु बुद्धियोग एव कौशलम्। निष्कामकर्मयोगस्यैव वाचकोऽस्त्ययं योगः। योगे चायं योगी फलाभिसंधिरहितः सन् सर्वाणि कर्माणि परमेश्वरप्रीत्या उपायभूतानि मत्वा श्रेष्ठया श्रद्धया संपन्नः सन् संपादयति। एवं दृष्टानामेव कर्मणां नाशात् मोक्षस्याप्तिर्भवति। तथा चोक्तम्–

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।

जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥ (श्री. म. गी. २/५१)

फलाभिसंधिरहितस्य पुरुषस्य बुद्धिः समाधावचलस्थितिर्भवतीत्याह श्रीभगवान्–

समाधावचला बुद्धिस्तदा योगमवाप्स्यसि॥ (श्री. म. गी. २/५३)

## *गूढार्थदीपिका*यां कर्मयोगतत्त्वम्–

*श्रीमद्भगवद्गीता*याः प्रथमषट्कं कर्मयोगपरम्। कर्म तत्त्यागवर्त्मना च विशुद्धात्मा त्वं–पदार्थस्तत्र वर्ण्यते–

तत्र तु प्रथमे काण्डे कर्म–तत्त्यागवर्त्मना।

त्वं पदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते॥[5] इति।

*गूढार्थदीपिका*यां कर्मयोगतत्त्वालोचनप्रसङ्गे ज्ञानकर्मणोः समुच्चयोऽस्ति न वेति विषये पूर्वपक्षिणामाशयोऽत्र विचार्यः। अत्रोल्लेख्यम्, ज्ञानकर्मणोः समुच्चयः पूर्वपक्षैः स्वीक्रियते।

तत्र विशिष्टाद्वैतवादिना श्रीमद्रामानुजाचार्यमतेन कर्मयोगस्य ज्ञानाकारताप्रकारं प्रतिपादनार्थं तथाविधकर्मयोगाधिकारिणो दुर्लभत्वमुक्तमेव। न हि केवलं मोक्षसाधनभूतस्य कर्मणः स्वरूपे प्रत्युत नित्यनैमित्तिकविविधकाम्यकर्मरूपविकर्मणः स्वरूपे, अकर्मणि च ज्ञाने बोद्धव्यमस्ति। अतो मुमुक्षोः कर्मणो गतिः गहना दुर्विज्ञाना एव। क्रियमाणकर्मणि ज्ञानाकारम् आत्मस्वरूपानुसंधानम् अन्तर्भूतत्वाज् ज्ञानं कर्मणि अन्तर्गततया च कर्माकारं यः पश्येत् स बुद्धिमान् कृत्स्नशास्त्रार्थविदेव। श्रीमद्रामानुजकृते गीताभाष्ये उच्यते– कर्मणि क्रियमाणे एव आत्मज्ञानं यः पश्येद् अकर्मणि च आत्मज्ञाने वर्तमान एव यः कर्म पश्येत्। किमुक्तं भवति? क्रियमाणमेव कर्म आत्मयाथात्म्यानुसंधानेन ज्ञानाकारं यः पश्येत्, तत् च ज्ञानं कर्मणि अन्तर्गततया कर्माकारं यः पश्येदित्युक्तं भवति; क्रियमाणे हि कर्मणि कर्तृभूतात्मयाथात्म्यानुसंधानेन तदुभयं संपन्नं भवति[6] इति। कर्मणः ज्ञानाकारत्वमुपपादयता पुनः उक्तम्– मुमुक्षोः समारब्धा नित्यनैमित्तिककाम्यकर्माणि संकल्पवर्जितानि एव। एतादृशकर्मानुष्ठातृणां प्राचीनकर्माणि ज्ञानाग्निना दह्यते। जीवितेऽस्मिन् एतादृशं कर्म कुर्वन् स संसारं नाप्नोति। केवलं कर्मयोगेन ज्ञाननिष्ठाव्यवधानरहितेन स आत्मानमपि पश्यति। एवं कर्मणः ज्ञानाकारत्वं प्रतिपादयन् रामानुजाचार्येण भणितम्– यस्य मुमुक्षोः सर्वे द्रव्यार्जनादि–लौकिककर्मपूर्वक–नित्यनैमित्तिककाम्यरूपकर्मसमारम्भाः कामवर्जिताः फलसङ्गरहिताः संकल्पवर्जिताः च। प्रकृत्या तद्गुणैः च आत्मानम् एकीकृत्य अनुसंधानं संकल्पः। प्रकृतिवियुक्तात्मस्वरूपानुसंधानयुक्ततया तद्रहिताः। तम् एवं कर्म कुर्वाणं पण्डितं कर्मान्तर्गतात्मयाथात्म्यज्ञानाग्निना दग्धप्राचीनकर्माणम् आहुः तत्त्वज्ञाः। अतः कर्मणो ज्ञानाकारत्वमुपपद्यते[7] इति।

एवं प्रकृतिवियुक्तात्मस्वरूपानुसंधानयुक्तत्वात् कर्मणः ज्ञानाकारत्वमुक्त्वा पुनः अङ्गसहितस्य सर्वकर्मणः परब्रह्मभूतपरमपुरुषात्मकत्वानुसंधानयुक्ततया ज्ञानाकारत्वमपि कथितमेव। यज्ञादौ य आहुतिः अर्प्यते तत्सर्वं ब्रह्मस्वरूपम्। यज्ञपदमत्र सर्वकर्मण उपलक्षणम्। यश्च ब्रह्मात्मकत्वात् सर्वं कर्म ब्रह्ममयमिति समाधत्ते स ब्रह्मकर्मसमाधिः। ब्रह्मकर्मसमाधिपुरुषस्य

गन्तव्यं एव ब्रह्म। ब्रह्मात्मकतया ब्रह्मभूतम् आत्मस्वरूपमपि तस्य गन्तव्यमिति प्रतीयते। अतो मुमुक्षोः क्रियमाणं सर्वं कर्म परब्रह्मात्मकत्वाज् ज्ञानाकारमित्यनेन ज्ञानकर्मणोः समुच्चयोऽपि प्रतिपादितः। तदुक्तं गीताभाष्ये रामानुजाचार्येण– हविः विशेष्यते; अर्प्यते अनेन इति अर्पणं स्रुगादि, तद् ब्रह्मकार्यत्वाद् ब्रह्म, ब्रह्म यस्य हविषः अर्पणं तद् ब्रह्मार्पणम्। ब्रह्म हविः स्वयं च ब्रह्मभूतं ब्रह्माग्नौ ब्रह्मभूते अग्नौ ब्रह्मणा कर्त्रा हुतम्; इति सर्वं कर्म ब्रह्मात्मकत्वाद् ब्रह्ममयमिति यः समाधत्ते, स ब्रह्मकर्मसमाधिः। तेन ब्रह्मकर्मसमाधिना ब्रह्म एव गन्तव्यम्। ब्रह्मात्मकतया ब्रह्मभूतम् आत्मस्वरूपं गन्तव्यम्। मुमुक्षाणां क्रियमाणं कर्म परब्रह्मात्मकम् एव इत्यनुसंधानयुक्ततया ज्ञानाकारं साक्षादात्मावलोकसाधनम्, न ज्ञाननिष्ठाव्यवधानेन इत्यर्थः[8] इति।

अत्रोल्लेख्यम्, ज्ञानकर्मयोगयोः आत्यन्तिकविरोधात्तयोः समन्वयाभावादप्यद्वैतज्ञानप्राप्त्यर्थं कर्मयोगस्यारादुपकारकत्वं दीपिकाकारस्याभिमतम्। आचार्यपादस्य युक्तिनिचयोऽत्र समुपस्थाप्यते। अत्र कर्म-पदेन काम्यनिषिद्धयोः कर्मत्यागाद् निष्कामकर्मानुष्ठानं बोध्यव्यम्। तत्रापि श्रीहरेर्जपस्तुत्यादिकं परमधर्मत्वेन स्थिरीक्रियते *गूढार्थदीपिका*याम्–

निष्कामकर्मानुष्ठानं त्यागात् काम्यनिषिद्धयोः।
तत्रापि परमो धर्मो जपस्तुत्यादिकं हरेः॥[9] इति।

प्रत्युत भगवदर्पणबुद्ध्या कृतानि फलाभिसंधिरहितशास्त्रीयकर्माणि योगा इति ह्याचार्येण–

यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति॥ (श्री. म. गी. ५/५)

इति श्लोकव्याख्यायां निरूपितम्– योगैरपि भगवदर्पणबुद्ध्या फलाभिसंधिराहित्येन कृतानि कर्माणि शास्त्रीयाणि योगास्ते येषां सन्ति तेऽपि योगाः[10] इति। पुनश्च–

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।

सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ (श्री. म. गी. २/४८)

इति श्लोकटीकायामपि दीपिकाकारस्यानुरूपोक्तिः समवेक्ष्यते– फलसिद्धौ हर्षं फलासिद्धौ च विषादं त्यक्त्वा केवलमीश्वराराधनबुद्ध्या कर्माणि कुर्वित्यर्थः[11] इति।

समरभूमौ पुरतः पितृनाचार्यान् सबान्धवान् च युद्धायावस्थितान् दृष्ट्वा कौन्तेयः परमं खेदमापन्नः। भगवान् वासुदेवः युद्धादुपरतमर्जुनं युद्धाभिमुखीकर्तुकामः ज्ञानयोगं कर्मयोगं चाश्रित्य तं प्रतिबोधितवान्। स्थूलदेहस्य विनाशो भवति न तु नित्यम् एनमात्मानम्। तेन आत्मनः अविनाशित्वं मत्वा अनुशोचितुं न युक्तमिति अर्जुनमुद्दिश्य श्रीभगवान् बहुधा प्रत्युपदिष्टम्। श्रीभगवान् स्थूलसूक्ष्मशरीरद्वयं तथा तत्कारणरूपम् अविद्याख्योपाधिवशाद् मिथ्याभूतसंसारस्य सत्यत्वादिप्रतिभासरूपत्वं निरूप्य अर्जुनस्य भ्रमं निराकर्तुम् आत्मस्वरूपम् उपदिष्टवान्। ज्ञानसंपादनार्थं प्रथमावस्थायां कर्मणामवश्यकर्तव्यता प्रतीयते। अग्निहोत्रादियज्ञवद् युद्धं हि क्षत्रियस्य नित्यकर्मत्वेन विधीयते। तत्र 'युध संप्रहारे'[12] इत्यर्थे युद्धाख्यं कर्म शत्रुप्राणवियोगानुकूलशस्त्रप्रहाररूपार्थे गृहीतेऽपि शास्त्रादौ विहितत्वाद् एतन्न प्रत्यवायजनकम्। *गौतमस्मृतिशास्त्रे*ऽपि– 'न दोषो हिंसायामाहवेऽन्यत्र व्यश्वासारथ्यनायुध–कृताञ्जलि–प्रकीर्णकेश–पराङ्मुखोपविष्ट–स्थलवृक्षारूढ–दूत–गोब्राह्मणवादिभ्यः' इत्यत्र 'ब्राह्मण'–पदेन अयोद्धृब्राह्मणविषयमेव स्थिरीकृतम्। एतेन युद्धार्थे समागतो ब्राह्मणवधोऽपि विधेयः इत्यवगम्यते। अदृष्टदुःखभयेन अर्जुनस्य शोकः सर्वथा परिहर्तव्य इत्येवाभिप्रायः। तदुक्तं दीपिकायाम्– तथा च युद्धलक्षणेऽर्थेऽग्निहोत्रादिवद्विहितत्वाद् अपरिहार्ये परिहर्तुमशक्ये तदकरणे प्रत्यवायप्रसङ्गात् त्वमदृष्टदुःखभयेन शोचितुं नार्हसीति पूर्ववत्[13] इति।

प्रत्युत 'य आहवेषु युध्यन्ते भूम्यर्थपराङ्मुखाः। / अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा' इति याज्ञवल्क्यवचनेन युद्धस्य काम्यकर्मत्वेन गृहीत्वापि प्रारब्ध–काम्यकर्म परिसमापनीयमिति नियमेन तस्यापि नित्यत्वमवज्ञेयम्। भगवद्वचनमुद्धृत्य टीकाकारेणेदं समर्थितम्– हतो वा

प्राप्ससि स्वर्गं जित्वा वा भोक्ष्यसे महीमि'ति भगवद्वचनाच्च, तदापि प्रारब्धस्य काम्यस्यापि अवश्यपरिसमापनीयत्वेन नित्यतुल्यत्वात् त्वया युद्धस्य प्रारब्धत्वादपरिहार्यत्वं तुल्यमेव[14] इति।

क्षत्रियस्य युद्धं हि प्रशस्तो धर्म। न हि केवलं परमार्थतत्त्वपर्यालोचनेन क्षत्रियधर्मरूपं स्वधर्ममप्यवेक्ष्य युद्धापराङ्मुखत्वरूपं कर्म न युक्तम्। यतोऽपराङ्मुखत्वरूपधर्मादनपेतात् युद्धात् क्षत्रियस्य श्रेयःसाधनं न वर्तते। अतो युद्धरूपधर्मादधर्मभ्रान्त्या निवर्तितुमर्जुनस्य सर्वथा अयुक्तमिति मन्वादिस्मृतिवचनद्वारेण समर्थितं *गूढार्थदीपिका*कारेण– युद्धमेव हि पृथिवीजयद्वारेण प्रजारक्षण–ब्राह्मणशुश्रूषादि–क्षात्रधर्म–निर्वाहकमिति तदेव क्षत्रियस्य प्रशस्ततरमित्यभिप्रायः। तथा चोक्तं पराशरेण, 'क्षत्रियो हि प्रजा रक्षन् शस्त्रपाणिः प्रदण्डवान्। / निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत्॥' मनुनापि, 'समोत्तमाधमै राजा चाहूतः पालयन् प्रजाः। / न निवर्तेत संग्रामात् क्षात्रं धर्ममनुस्मरन्॥ संग्रामेष्वनिवर्तितं प्रजानां चैव पालनम्। / शुश्रूषा ब्राह्मणानां च राज्ञः श्रेयस्करं परमि'त्यादिना[15] इति।

'अपशवोऽन्ये गो अश्वेभ्यः पशवो गो अश्वा' इति न्यायेन यथा गोः अश्वस्य च प्रशंसा क्रियते किं तु गो–अश्वेतरपशवानां पशुत्वं नास्तीति अभिप्रेतम्, तद्वत् 'धर्माद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते' (श्री. म. गी.– २/३१) इत्यनेन युद्धादन्यत् श्रेयःसाधनं कर्म नास्तीति प्रतिपादितं परं युद्धादन्यद् धर्मं क्षत्रियेण नानुष्ठेयमिति न विवक्षितम्। हिंसात्मकत्वेऽपि शास्त्रविहितत्वाद् युद्धस्य प्रत्यवायजनकत्वं न स्वीकार्यम्। एतेन शास्त्रसंमत–अग्निषोमीयपशुहिंसायाः पापजनकत्वमपि नाङ्गीकृतम्। समरजयेन अनायासेनैव राज्यस्य लाभः, पराजये च शीघ्रमेव स्वर्गलाभो भवत्येव। पुनश्च स्वर्गसाधनं युद्धमव्यवधानेनैव स्वर्गजनकम्, ज्योतिष्टोमादिकं तु देहपातरूपप्रतिबन्धाभावः अपेक्ष्यते। धर्माधर्मविषये शास्त्रमेव प्रमाणत्वेन युज्यते। भगवता शंकराचार्येण 'अशुद्धमिति चेन्न, शब्दात्'[16] इति सूत्रभाष्ये प्रोक्तम्– 'शास्त्रादृते धर्माधर्मविषयं विज्ञानं न कस्यचिदस्ति। शास्त्राच्च हिंसानुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितः। स कथमशुद्ध इति शक्यते वक्तुम्' इति। अतो युद्धस्य अवश्यकर्तव्यत्वेऽपि भीष्मद्रोणादिभिः गुरुभिः सह न तत् कर्तुमुचितमित्याशङ्का न्यायेन

स्मृतिश्रुतिवचनेन च तथा युद्धस्य प्रत्यवायजनकत्वमपि सुयुक्तिद्वारेण परिहृतं श्रीमन्मधुसूदनेन– तथा च विधिस्पृष्टे निषेधानवकाश इति न्यायात् युद्धं न प्रत्यवायजनकम्, नापि भीष्मद्रोणादि–गुरुब्राह्मणादिवधनिमित्तो दोषः, तेषामाततायित्वात्। तदुक्तं मनुना– 'गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्। / आततायिन मायान्तं हन्यादेवाविचारयन्। / नाततायिवधे दोषो हन्तुर्भवति कश्चन।' (मनु. ८/३५०,५१)[17] इति।

शास्त्रसंमतयुद्धरूपस्वधर्मस्य अननुष्ठानेन न हि केवलं पापमपि त्वधर्ममकीर्तिं च लभते। युद्धक्षेत्रात् पलायनेन चिरोपार्जितात्मसुकृतपरित्यागेन परोपार्जितदुष्कृतमात्रं प्राप्यते तत् मन्वादिस्मृतिवचनसमर्थनेन टीकाकारेण प्रतिपादितम्। एतेन युद्धपरित्यागेन पारलौकिक–अनिष्टपापफलेन सह इहजन्मनि शिष्टजनकृतनिन्दावचनरूपा अकीर्तिः दर्शिता– तथा च मनुः 'यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः। / भर्तुर्यद्दुष्कृतं किंचित्तत् सर्वं प्रतिपद्यते॥ / यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम्। / भर्ता तत् सर्वमादत्ते परावृत्तहतस्य तु' (मनु. ७/९४–९५) इति। याज्ञवल्क्योऽपि– 'राजा सुकृतमादत्ते हतानां विपलायिनाम्' इति ... एवं कीर्तिधर्मयोरिष्टयोरप्राप्तिरनिष्टस्य च पापस्य प्राप्तिर्युद्धपरित्यागे दर्शिता[18] इति। अत्र स्वर्गफलमुद्दिश्य युद्धकरणे युद्धकार्यस्य नित्यत्वव्याघातस्तथा राज्यलाभरूपफलमुद्दिश्य युद्धकार्ये तस्यार्थशास्त्राद्धर्मशास्त्रापेक्षया दौर्बल्यप्रसङ्गः समुद्भवति। तेन काम्यकर्मण अकरणे कुतः पापं तथा दृष्टार्थरूपगुरुब्राह्मणादिवधे धर्मत्वं कथं संभवेदित्याशङ्कायां श्रीभगवान् सुखे तत्कारणे लाभे जये च रागमकृत्वा दुःखे तद्धेतौ अलाभे पराजये च द्वेषमकृत्वा युद्धार्थम् अर्जुनमुपादिदेश। एवं रागद्वेषराहित्यस्य समत्वकरणमुक्तम्। फलकामनामन्तरेण स्वधर्मबुद्ध्या युध्यमाने नित्यकर्माकरणनिमित्तपापं तथा गुरुब्राह्मणादिवधनिमित्तपापं न भवेदिति सम्यक्तयोक्तं दीपिकायाम्– एवं सुखकामनां दुःखनिवृत्तिकामनां वा विहाय स्वधर्मबुद्ध्या युध्यमानो गुरुब्राह्मणादिवधनिमित्तं नित्यकर्माकरणनिमित्तं च पापं न प्राप्स्यसि। यस्तु फलकामनया करोति स

गुरुब्राह्मणादिवधनिमित्तं पापं प्राप्नोति, यो वा न करोति स नित्यकर्माकरणनिमित्तं च। अतो फलकामनामन्तरेण कुर्वन्नुभयविधमपि पापं न प्राप्नोतीति प्रागेव व्याख्यातोऽभिप्रायः[19] इति।

एवमन्तःकरणशुद्ध्यर्थमेवादौ अर्जुनं प्रति कर्मयोगः उपदिश्यते श्रीभगवता। केवलं कर्तव्यबुद्ध्या लाभालाभादिविचारनिरपेक्षया निष्कामकर्म एव कर्मयोगेन बोध्यव्यः। *आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः* (बृह. उ.– २/४/५) इति श्रुतिवचनेन आत्मज्ञानार्थं श्रवणादीनामुपयोगो वर्णितोऽस्ति। तत्र श्रवणेन चित्तगताशुद्धिदोषो न दूरीभवति, तत्तु निष्कामकर्मानुष्ठानेनैव संभवेत्। अतोऽशुद्धान्तःकरणं प्रति कर्मोपदेशत्वाज् ज्ञानकर्मयोगयोः समुच्चयाशङ्कापि निराकृता। साधूक्तं *गूढार्थदीपिका*याम् आचार्यपादेन– तथा च शुद्धान्तःकरणं प्रति ज्ञानोपदेशः अशुद्धान्तःकरणं प्रति कर्मोपदेश इति कुतः समुच्चयशङ्कया विरोधावकाश इत्यभिप्रायः[20] इति। निष्कामकर्मानुष्ठानेन समुत्पन्नधर्माख्यशुभादृष्टेन चित्तमालिन्यं दूरमपगच्छति। अन्तःकरणस्य मालिन्याधिक्याद् अर्जुनस्य कर्मरूपबहिरङ्गसाधनमेवानुष्ठेयम्। साक्षात्संबन्धेन आत्मज्ञानजनकत्वात् श्रवणादीनाम् अन्तरङ्गसाधनत्वम्, परंपरासंबन्धेन चित्तशुद्धिद्वारेण आत्मज्ञानसंपादकत्वाच्च कर्मयोगस्य बहिरङ्गसाधनत्वं ज्ञेयम्। एतेन श्रवणादीनां विहाय कथं कर्मैव श्रीभगवता अर्जुनमुद्दिश्य उपदिश्यत इति संशयोऽपि निराकृतः। सर्वमेतद् टीकायां स्पष्टीकृतमाचार्येण– अयम्भावः कर्मनिमित्तो ज्ञानप्रतिबन्धः कर्मणैव धर्माख्येनापनेतुं शक्यते *धर्मेण पापमपनुदति* इति श्रुतेः (तै. आ.– १०/६३/६)। श्रवणादिलक्षणो विचारस्तु कर्मात्मक–प्रतिबन्धरहितस्यासम्भावनादिप्रतिबन्धं दृष्टद्वारेणापनयतीति न कर्मबन्धनिराकरणायोपदेष्टुं शक्यते। अतोऽत्यन्तमलिनान्तःकरणत्वाद्बहिरङ्गं साधनं कर्मैव त्वयानुष्ठेयम्, नाधुना श्रवणादियोग्यतापि तव जाता दूरे तु ज्ञानयोग्यतेति। तथा च वक्ष्यति 'कर्मण्येवाधिकारस्ते मा फलेषु' इति। एतेन सांख्यबुद्धेरन्तरङ्गसाधनं श्रवणादि विहाय बहिरङ्गसाधनं कर्मैव भगवता किमिति अर्जुनायोपदिश्यत इति निरस्तम्[21] इति।

योगबुद्ध्या क्रियमाणे कर्मणि फलाकाङ्क्षाभावादङ्गवैगुण्यमपि नास्ति। वेदोक्तकाम्यकर्मानुष्ठानवद् विघ्नाशङ्का अत्र न क्रियते यतोऽनेन योगयुक्तकर्मणा महाफलं लभते। यया बुद्ध्या कर्म योगरूपेण परिणमते सैव बुद्धिः एका, स्थिरा, सात्त्विकी, अव्यभिचारिणी, एकाभिमुखी च। यस्तु फलकामनया कर्म करोति स फलस्य हेतुः उत्पादको वा भवति परं भगवदर्पणबुद्ध्या कृते निष्कामकर्मणि कर्मफलं नोत्पद्यते। एतेन कर्मणो फलाभावेऽपि दुःखस्वरूपकर्मणा किं प्रयोजनमिति कर्माकरणबुद्धिरस्माकं यथा न स्यात्तदपि सुयुक्तिद्वारेण व्यवस्थापितं टीकाकारेण– ननु मयेदं भोक्तव्यमिति बुद्ध्यभावेऽपि कर्म स्वसामर्थादेव फलं जनयिष्यतीति चेन्नेत्याह 'मा कर्मफलहेतुर्भूः' फलकामनया हि कर्म कुर्वन् फलस्य हेतुरुत्पादको भवति; त्वन्तु निष्कामः सन् कर्मफलहेतुर्मा भूः। न हि निष्कामेन भगवदर्पणबुद्ध्या कृतं कर्म फलाय कल्पत इत्युक्तम्। फलाभावेऽपि किं कर्मणा इत्यत आह 'मा ते सङ्गोऽस्त्वकर्मणि' यदि फलं नेष्यते किं कर्मणा दुःखस्वरूपेणेति अकरणे तव प्रीतिर्माभूत्[22] इति। योगारूढो भूत्वा कर्तृत्वाभिनिवेशं फलाभिलाषं च त्यक्त्वा कर्माणि एवानुष्ठेयानि। फलाभिलाषत्यागश्च ईश्वराराधनबुद्ध्या फलसिद्धौ हर्षं फलासिद्धौ च विषादं त्यक्त्वा कृतकर्मणा संभवेत्। आदौ योग–शब्देन कर्म इत्युक्त्वा पुनः योगस्थः कर्माणि कुर्वीत इत्युक्ते सिद्ध्यसिद्ध्योः समत्वमेव योगशब्देनोच्यते न तु कर्म इत्यत्रापि विरोधावकाशो नास्ति।

अत्र आशङ्क्यते, निष्फलनिष्कामकर्मापेक्षया 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायेन फलकामनया कर्मानुष्ठानस्य उत्कृष्टत्वमस्ति न वा। तत्रोच्यते, कर्मफलाभिसंधियुक्त्या क्रियमाणं कर्म जन्म–मरणहेतुभूतमेव। ये तु फलकामाः सन्तः कर्माणि कुर्वन्ति ते जन्ममरणादिघटीयन्त्रभ्रमणेन परवशाः भवन्ति। फलहेतवः अवरं कर्म कुर्वन्तः ते कृपणा इत्यभिधीयते। एतेन आत्मज्ञानोत्पादकं निष्काम–कर्मयोगमेवानुष्ठेयम्। निगदितं च *गूढार्थदीपिका*याम्– बुद्धियोगाद् आत्मबुद्धिसाधनभूताद् निष्कामकर्मयोगाद् दूरेण अतिविप्रकर्षेण अवरम् अधमम्। कर्मफलाभिसंधिना क्रियमाणं जन्ममरणहेतुभूतम् अथवा परमात्मबुद्धियोगात् दूरेण अवरं सर्वमपि कर्म हि यस्मात् हे धनञ्जय! तस्मात् बुद्धौ

परमात्मबुद्धौ सर्वानर्थनिवर्तिकायां शरणं प्रतिबन्धकपापक्षये रक्षकं निष्कामकर्मयोगम् अन्विच्छ कर्तुमिच्छ। ये तु फलहेतवः फलकामा अवरं कर्म कुर्वन्ति ते कृपणाः सर्वदा जन्ममरणादिघटीयन्त्रभ्रमणेन परवशाः अत्यन्तदीना इत्यर्थः[23] इति।

बुद्धियोगयुक्त्या कृते सति कर्मणि फलासक्तिर्नोत्पद्यते। समत्वमेव बुद्धियोगस्य लक्षणम्। समत्वरूपयोगारूढस्य कर्मानुष्ठानमेव प्रयोजनम्। समत्वे समुपस्थिते सति कर्म एव योगरूपेण परिणमते। समत्वबुद्धियुक्ते कर्मयोगे चित्तशुद्धिपुरःसरं दुष्टकर्मक्षयात् मोक्षपर्यवसायित्वाच्च योगस्य महाकौशलत्वं ज्ञेयम्। सम्यगेवोक्तं दीपिकायाम्– इह समत्वबुद्धियुक्ते कर्मणि कृते सति सत्त्वशुद्धिद्वारेण बुद्धियुक्तः परमात्मसाक्षात्कारवान् सन् जहात्युभे सुकृतदुष्कृते। तस्मात् समत्वबुद्धियुक्ताय योगाय युज्यस्व यस्मात् कर्मसु मध्ये समत्वबुद्धियुक्तः कर्मयोगः कौशलं कुशलः दुष्टकर्मनिवारणचतुर इत्यर्थः[24] इति। बुद्धिशुद्धिमन्तरेण फलकामनात्यागः असंभवः। फलकामनया अविक्षिप्तबुद्धौ तथा रजस्तमसोः अनभिभूतसत्त्वाधिक्यसमाहितचित्ते योगो भवत्येव। सात्त्विक्या बुद्ध्या अपगतफलतृष्णाया समत्वरूपबुद्धियोगेन च बुद्धिः अन्तर्मुखी भवति। अतोऽन्तःकरणशुद्धिद्वारेण अज्ञानतत्कार्यरूपानर्थादिनिवृत्त्या कर्मयोगेन परमानन्दप्राप्तिरूपं मोक्षाख्यं पदं प्राप्यत इति भगवतोऽभिप्रायः *गूढार्थदीपिका*यां प्रपञ्चितः– यस्मादेवं फलकामनां त्यक्त्वा समत्वबुद्ध्या कर्माण्यनुतिष्ठन्तस्तैः कृतान्तःकरण–शुद्धयस्तत्त्वमस्यादि–वाक्यप्रमाणोत्पन्नात्मतत्त्वज्ञान–विनष्टाज्ञान–तत्कार्याः सन्तः सकलानर्थ–निवृत्ति–परमानन्दप्राप्तिरूपं मोक्षाख्यं विष्णोः परमं पदं गच्छन्ति तस्मात्त्वमपि ‘यत् श्रेयः स्यान्निश्चितं ब्रूहि तन्मे’ इत्युक्तेः श्रेयोजिज्ञासुरेवंविधं कर्मयोगमनुतिष्ठेति भगवतोऽभिप्रायः[25] इति।

एवं ‘सांख्ययोग’शीर्षके द्वितीयाध्याये कर्मयोगं प्रस्तुत्य कर्मैव कर्तव्यत्वेनोपदिष्टम्। ‘कर्मयोगा’भिधेये तृतीयेऽध्याये निष्कामकर्मनिष्ठया अन्तःकरणशुद्धिस्तदनन्तरं शमदमादिषट्कसंपत्त्या सर्वकर्मसंन्यासात् परं ‘तत्त्वमस्या’दि–वेदान्तमहावाक्यविचारपुरःसरं भगवद्भक्तिनिष्ठा ततस्तत्त्वज्ञाननिष्ठा भवेदिति भूयो भूयः प्रतिपादितम्। अत एवोक्तं यथार्थतया–

तथा हि आदौ निष्कामकर्मनिष्ठा ततोऽन्तःकरणशुद्धिः ततः शमदमादिसाधनपुरःसरः सर्वकर्मसंन्यासः ततो वेदान्तवाक्यविचारसहिता भगवद्भक्तिनिष्ठा ततस्तत्त्वज्ञाननिष्ठा तस्याः फलं च त्रिगुणात्मिका अविद्यानिवृत्त्या जीवन्मुक्तिः प्रारब्धकर्मफलभोगपर्यन्तं तदन्ते च विदेहमुक्तिः[26] इति।

अत्र आशङ्क्यते, तमःप्रकाशवद् विरुद्धस्वभावयोः ज्ञानकर्मणोः समुच्चयाभावाद् भिन्नाधिकारिकत्वाद् एकमर्जुनं प्रति उभयोपदेशः कथं क्रियते? ज्ञानकर्मणोः फलविषये तारतम्यात् कर्माधिकारिणं प्रति ज्ञाननिष्ठा तथा च ज्ञानाधिकारिणं प्रति कर्मनिष्ठा उपदेष्टुं न युक्तमेव। ज्ञाननिष्ठापेक्षया कर्मनिष्ठायाः प्राशस्त्यं स्वयमेव भगवता–

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जयः।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥ (श्री. म. गी.– २/४९)

इत्यत्र निगदितम्। प्रत्युत उत्कृष्टनिकृष्टयोर्मध्ये विकल्पोऽपि असंभवः। अत्रोक्तम्, एकैव निष्ठा साध्यसाधनावस्थाभेदेन द्विधा विभज्यते। ज्ञानकर्मनिष्ठयोः स्वातन्त्र्यमत्र विवक्षितं न तु भिन्नत्वम्। एतदर्थम् 'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ' (श्री. म. गी.– ३/३) इति श्लोकेऽत्र निष्ठेत्येकवचनं प्रयुज्यते। ज्ञानयोगं कर्मयोगं चाभिन्नरूपेण यः पश्यति स एव यथार्थद्रष्टा–

'एकं सांख्यं च योगं च यः पश्यति स पश्यति।' (श्री. म. गी.– ५/५)

संख्या अर्थात्, सम्यगात्मबुद्धिः येषामस्ति तेषां शुद्धान्तःकरणानां ज्ञाननिष्ठा अशुद्धान्तःकरणानां कर्माधिकारयोगिनां तु कर्मनिष्ठा भवति। तेन ज्ञानकर्मणोः समुच्चयो विकल्पो वा भवितुं नार्हति। निष्कामकर्मानुष्ठानेन शुद्धान्तःकरणानां सर्वकर्मसंन्यासादनन्तरं ज्ञानं समुत्पद्यते। अतोऽर्जुनं प्रति चित्तस्य शुद्ध्यशुद्धिभेदेन द्विविधा निष्ठा प्रत्युपदिष्टा। अवस्थाभेदेन ज्ञानकर्मयोगयोः उपयोगित्वमस्तीति कारणाद् अधिकारिभेदेन उपदेशवैयर्थ्यं न भवति। प्रतिपादितं चाचार्येण– अशुद्धान्तःकरणानां तु ज्ञानभूमिमनारूढानां योगिनां कर्माधिकारयोगिनां कर्मयोगेन कर्मैव

युज्यते अन्तःकरणशुद्ध्या अनेनेति योगः– तेन निष्ठोक्ता अन्तःकरणशुद्धिद्वारा ज्ञानभूमिकारोहणार्थं 'धर्माद्धि युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यत' इत्यादिना। अत एव न ज्ञानकर्मणोः समुच्चयो विकल्पो वा। किं तु निष्कामकर्मणा शुद्धान्तःकरणानां सर्वकर्मसंन्यासेनैव ज्ञानमिति चित्तशुद्ध्यशुद्धिरूपावस्थाभेदेनैकमेव त्वां प्रति द्विविधा निष्ठोक्ता, 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृण्वि'ति। अतो भूमिकाभेदेनैकमेव प्रत्युभयोपयोगान्नाधिकार–भेदेऽप्युपदेशवैयर्थ्यमित्यभिप्रायः[27] इति।

कारणाभावेन कार्यस्य यथा अनुपपत्तिः दृश्यते तद्वदात्मज्ञानविनियुक्तानां कर्मणामननुष्ठानात् चित्तशुद्ध्यभावेन पुरुषस्य सर्वकर्मशून्यत्वरूपं नैष्कर्म्यं न लभते। अत्र आशङ्क्यते, *एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति* (बृह. उ.– ४/४/२२) इति श्रुतौ सर्वकर्मसंन्यासात् परं ज्ञाननिष्ठोपपत्तिप्रदर्शनात् कर्मणः कुत्र उपयोगित्वमस्ति? अत्रोक्तम्, चित्तशुद्धिं विना कृतसंन्यासेन ज्ञाननिष्ठारूपा सिद्धिर्न प्राप्यते। तेन कर्मजन्यचित्तशुद्धिव्यतिरेकेन संन्यासो न संभवेत्, औत्सुक्यवशात् कृतसंन्यासेनापि फलसिद्धिर्न भवेत्। सम्यग्रूपेणोक्तं *गूढार्थदीपिका*कारेण– कर्मजन्यं चित्तशुद्धिमन्तरेण संन्यास एव न संभवति, यथाकथंचिदौत्सुक्यमात्रेण कृतोऽपि न फलपर्यवसायीति भावः[28] इति। कर्मणाम् अनारम्भात् नैष्कर्म्यरूपं ज्ञानं न लभते। चित्तशुद्धिं विना केवलं कर्मत्यागमात्रेणैव मोक्षोलाभोऽपि न भवत्येव। कर्माधिकारिणः कर्म एव कर्तव्यम्। अकर्मकृत् सन् अजितेन्द्रियः अशुद्धचित्तः अस्वतन्त्र एव सन् प्रकृतितः कार्याकारेणाभिव्यक्तैः सत्त्वरजस्तमोभिः लौकिकं वैदिकं वा कर्माणि अकुर्वाणो न तिष्ठति। यतोऽत्र स्वाभाविकाः गुणाः चालकाः, तेन परवशतया कर्माणि कुर्वन्तः अशुद्धान्तःकरणानां सर्वकर्मसंन्यासस्तथा ज्ञाननिष्ठा अपि सुदुर्लभा। शुद्धान्तःकरणस्य कर्तृत्वाभिमानत्यागः एव प्रकृतकर्मत्यागः संन्यासो वा। अशुद्धान्तःकरणस्तु प्रकृतिवशेनात्मानं कर्तृत्वबुद्धियुक्तं मन्यते। क्षणमात्रमपि कर्मत्यागस्तेषां न भवेत्। केवलम् औत्सुक्यमात्रेण संन्यासग्रहणात्तेषां फलसिद्धिरपि सुदुष्करेव। आत्मतत्त्वं विस्मृत्य वागादिकर्मेन्द्रियाणि निगृह्य ये वहिरिन्द्रियैः कर्माणि अकुर्वन्तः कृतसंन्यासोऽहमित्यभिमन्यन्ते ते पापाचारा उच्यन्ते।

सर्वमेतत् सम्यक्तया स्पष्टीकृतमाचार्यपादेन– यथाकथंचिदौत्सुक्यमात्रेण कृतसंन्यासस्त्वशुद्धचित्त–स्तत्फलभाक् न भवति, यतः यो विमूढात्मा रागद्वेषादिदूषितान्तःकरण औत्सुक्यमात्रेण कर्मेन्द्रियाणि वाक्पाण्यादीनि संयम्य निगृह्य बहिरिन्द्रियैः कर्माण्यकुर्वन्निति यावत् मनसा रागादिप्रेरितेन इन्द्रियार्थान् शब्दादीन् न त्वात्मतत्त्वं स्मरन् आस्ते कृतोसंन्यासोऽहम् इत्यभिमानेन कर्मशून्यस्तिष्ठति स मिथ्याचार सत्त्वशुद्ध्यभावेन फलायोग्यत्वात् पापाचार उच्यते– त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम्[29] इति।

अतः सर्वकर्माणि असंन्यस्य निष्कामकर्माण्येव चित्तशुद्धये अनुष्ठेयमिति प्रतिपादितम्। अशुद्धान्तःकरणविशिष्टस्य किंचिदपि अकरणात् कर्मैव प्रशस्यतरम्। कर्माभावेन अन्तःकरणशुद्धिर्न भवेदपि च युद्धादिकर्मरहितस्य शरीरस्थितिरपि प्रकर्षेण न सिद्ध्येदिति अर्जुनमुद्दिश्य श्रीभगवान् बहुधा प्रत्युवाच। हस्तादीनां क्रियात्यागोऽत्र कर्मत्यागपदेन न बोध्यव्यः। कर्तृत्वाभिमानरहितहस्तपदादीनां क्रियासमन्वितकर्माणि अकर्मत्वेनावधेयम्। अत्रोल्लेख्यम्, सर्वं कर्म बन्धात्मकमिति स्वीक्रियते। प्रसङ्गेऽस्मिन् ‘कर्मणा बध्यते जन्तु’रिति स्मृतिवचनमत्र प्रमाणरूपेण स्वीकर्तव्यम्। एतेन मुमुक्षुणा कर्म न कर्तव्यमित्याशङ्कापि जायते। इदमत्रावधेयम्, यज्ञार्थे यत् कर्म क्रियते तेन कर्मणा न बध्यते कर्माधिकारी। ‘यज्ञः’ पदेनात्र परमेश्वरो ज्ञेयः। श्रुतावपि आम्नातम्, ‘यज्ञो वै विष्णुः’ इति। यज्ञस्वरूपस्य भगवतः विष्णोः आराधनार्थं यत् कर्म क्रियते तदेव यज्ञार्थं कर्म। यज्ञार्थात् कर्मणोऽन्यस्मिन् कर्मणि प्रवृत्तस्य कर्मबन्धनं भवेत्। एतदर्थं कर्माधिकारिणः अनासक्तरूपेण श्रद्धादिपुरःसरं यज्ञार्थं कर्म अनुष्ठेयम्। अत एवोक्तं टीकाकारेण– यज्ञः परेमेश्वरः ‘यज्ञो वै विष्णु’रिति श्रुतेः, तदाराधनार्थं यत् क्रियते कर्म तद् यज्ञार्थं तस्मात् कर्मण अन्यत्र कर्मणि प्रवृत्तोऽयं लोकः कर्माधिकारी कर्मबन्धनः कर्मणा बध्यते न त्वीश्वराराधनार्थेन। अतः तदर्थं यज्ञार्थं कर्म हे कौन्तेय त्वं कर्मण्यधिकृतो मुक्तसङ्गः सन् समाचर सम्यक् श्रद्धादिपुरःसरम् आचर[30] इति।

यज्ञेन कथमस्माकं समृद्धिः स्यादित्यत आह– अभिमतफलप्रदानेन यज्ञोऽयम् इष्टकामधुक्। यज्ञस्य इष्टकामदोग्धृत्वं कथं संभवेत्? तत्रोच्यते– यज्ञेन यजमानः हविर्भागैः देवान् तर्पयति।

देवा अपि वृष्ट्यादिना प्रभूतधान्यादिफलं प्रयच्छन्ति। एवमन्योन्यं संबर्द्धयन्तो उभययोः अभिमतार्थं लभते। यज्ञैः तुष्टा देवाः पशु–हिरण्यादीनि इष्टद्रव्याणि वितरिष्यन्ति। एवं यज्ञानुष्ठानस्य ऐहिकफलमप्यस्ति। देवोद्देशेन यज्ञेषु आहुतिः अप्रदाय यो भुङ्क्ते स देवस्वापहारी तस्कररूपेण परिगण्यते। यज्ञकर्मणो महिमेयं विधृतमाचार्यपादेन– न केवलं पारत्रिकमेव फलं यज्ञात् किं त्वैहिकफलमपीत्याह इष्टानिति– इष्टान् अभिलषितान् भोगान् पश्वन्नहिरण्यादीन् वो युष्मभ्यं देवा दास्यन्ते वितरिष्यन्ति। हि यस्मात् यज्ञैर्भावितास्तोषितास्ते। यस्मात्तैः ऋणवद् भवद्भ्यो दत्ता भोगास्तस्मात्तैः देवैर्दत्तान् भोगानेभ्यो देवेभ्योऽप्रदाय यज्ञेषु देवोद्देशेनाहुतीरसम्पाद्य यो भुङ्क्ते देहेन्द्रियाण्येव तर्पयति स्तेन एव तस्कर एव सः देवस्वापहारी देवर्णानपाकरणात्[31] इति।

यज्ञरूपपरार्थपरकर्मणा चित्तप्रसारणं भवत्येव। प्रसारणमिदं पुण्यमुच्यते। पुनः कर्म एव जगच्चक्रप्रवृत्तिकारणम्। अग्निहोत्रादियज्ञाद् अपूर्वाख्यधर्मात् पर्जन्यः, पर्जन्याद् अन्नम्, अन्नाद् प्राणिशरिराणि जायन्ते। ऋत्विगादीनां व्यापारसाध्यस्य अपूर्वाख्यसूक्ष्मधर्मस्य कर्म एव कारणम्। *शतपथब्राह्मणस्य* अष्टाध्यायीकाण्डस्य तथा मन्वादिस्मृतिवचनस्य उद्धरणपुरःसरम् अग्निहोत्राहुतेः पर्जन्यजनकत्वम् अपूर्वस्य कर्मसमुद्भवत्वं च प्रतिपादितं दीपिकायाम्– यथा चाग्निहोत्राहुतेर्वृष्टिजनकत्वं तथा व्याख्यातमष्टाध्यायीकाण्डे जनकयाज्ञवल्क्यसंवादरूपायां षट्प्रश्न्याम्। मनुना चोक्तम्, ‘अग्नौ प्राप्ताहुतिः सम्यगादित्यमुपतिष्ठते। / आदित्याज्जायतेर्वृष्टिर्वृष्टेरन्नं ततः प्रजाः।’ (मनु. ३/७६) स च यज्ञो धर्माख्यः सूक्ष्मः कर्मसमुद्भवः ऋत्विग्यजमानव्यापारसाध्यः, यज्ञस्य हि अपूर्वस्य विहितं कर्म कारणम्[32] इति।

विविदिषोः ज्ञाननिष्ठाप्राप्त्यर्थं श्रवण–मनन–निदिध्यासनानुष्ठानाय सर्वकर्मसंन्यासलक्षणः संन्यासो विहितः। एतेन न केवलं ज्ञानिनः विरक्तस्य ज्ञानार्थिनोऽपि कर्मणि अनधिकारोऽस्तीति शङ्का जायते। तत्रोच्यते, विद्वांसः तथा च जनकप्रभृतयः श्रुतिप्रसिद्धक्षत्रियाः ज्ञाननिष्ठां कर्मणा सह प्राप्ताः, न तु कर्मत्यागेन। प्रत्युत वर्णाश्रमधर्मप्रवर्तकत्वात् स्मृति–पुराणादीनां वचनानुसारेण तथा लोकसंग्रहः अवेक्ष्य पुरुषोत्तमानां शिष्टाचारं पश्यन् कर्मावश्यं कुर्यादिति

प्रतिपादितम्। अपि च क्षत्रियजन्मप्रापकेण प्रारब्धकर्मवशेन लोकसंग्रहार्थम् अर्जुनेन कर्मसंपादनं सर्वथा कर्तव्यमिति *गूढार्थदीपिका*यां स्पष्टीकृतम्– 'सर्वे राजाश्रिता धर्मा राजा धर्मस्य धारकः' इत्यादिस्मृतेर्वर्णाश्रमधर्मप्रवर्तकत्वेनापि क्षत्रियोऽवश्यं कर्म कुर्यादित्याह लोकेतिलोकानां स्वे स्वे धर्मे प्रवर्तनमुन्मार्गान्निवर्तनं च लोकसंग्रहः तं पश्यन्, अपिशब्दाज्जनकादिशिष्टाचारमपि पश्यन् कर्म कर्तुमर्हसि एवेत्यन्वयः। क्षत्रियजन्मप्रापकेण कर्मणारब्धशरीरस्त्वं विद्वानपि जनकादिवत् प्रारब्धकर्मवलेन लोकसंग्रहार्थं कर्म कर्तुं योग्यो भवसि, न तु त्यक्तुं ब्राह्मणजन्मालाभादित्यभिप्रायः[33] इति।

मोक्षप्राप्त्यर्थं कर्मत्यागस्य नास्ति किमपि प्रयोजनम्। जनकाजातशत्राादिज्ञानिनः कर्मणैव मुक्तिं गताः। स्वप्रयोजनाभावेऽपि लोकशिक्षार्थं तेऽनासक्तरूपेण कर्माणि कुर्वन्ति। एतेन 'यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति नियमेन अज्ञानिनः कर्मावश्यमेव कर्तव्यमिति निश्चप्रचम्। ईश्वरार्पणबुद्ध्या फलाभिसंधिरहितविहितकर्मानुष्ठानेन सत्त्वशुद्धिद्वारेण मुक्तिरूपफललाभात् मतमिदं नित्यवेदबोधितत्वाद् अनादिपरंपरागतमित्युच्यते। आचार्योपदिष्टेऽर्थे श्रद्धावन्तः अनसूयन्तः निष्कामकर्मानुष्ठानैः सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण च ज्ञानिवन्मुच्यन्ते। उक्तं च मधुसूदनसरस्वतीपादैः– फलाभिसंधिराहित्येन भगवदर्पणबुद्ध्या विहितकर्मानुष्ठानं सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण मुक्तिफलमित्याह ये म इति। इदं फलाभिसंधिराहित्येन विहितकर्माचरणरूपं मम मतं नित्यं नित्यवेदबोधितत्वेन अनादिपरंपरागतम्, आवश्यकमिति वा[34] इति।

बलवदनिष्टाननुबन्धिसहकृतेष्टसाधनताज्ञानं प्रवृत्तिकारणं बलवदिष्टाननुबन्धि–सहकृतानिष्टसाधनता–ज्ञानं च निवृत्तिकारणमिति स्वीक्रियते। शास्त्रादौ बलवदनिष्टाननुबन्धित्वभावसहकृतेष्टसाधनत्वस्य कर्तव्यत्वेनोपदिश्यते। अज्ञानवशात् शास्त्रविहितकर्म बलवदिष्टाननुबन्धिसहकृतानिष्टसाधन–रूपमिति मत्वा अविहितकर्मादौ जनस्यानुरागो दरीदृश्यते। अनुरक्तिरियं प्रवृत्तिकारणमिति स्पष्टम्। इन्द्रियस्यानुकूलविषये रागः प्रतिकूलविषये च द्वेषः समुपजायते। रजस्तमसोः अभिभवात् प्रकृतेः सत्त्वगुणाधिक्याच्च

रागद्वेषापगतेन श्रेयोमार्गानुवर्तनं संभवेत्। अतो रागद्वेषप्रयुक्त–पश्वादिसाधारणप्रवृत्तिपरित्यागेन शास्त्रविहितं स्वधर्मरूपं कर्म संपादनीयम्। वर्णाश्रमं प्रति विहितः स्वधर्मः सर्वाङ्गसंग्रहान्तरेण स्वं प्रत्यविहितत्वात् परधर्मात् प्रशस्यतरः। धर्मे वेदाः हि प्रमाणत्वेन युज्यते। अङ्गहीनेऽपि स्वधर्मस्थितस्य परधर्मस्थस्य जीविताद् मरणमपि श्रेयः। इह लोकेऽकीर्तिकरत्वात् नरकप्रदायकत्वाच्च रागद्वेषादिनिबन्धनस्वाभाविकप्रवृत्तिवत् परधर्मो हेयः। एवमर्जुनं प्रति संन्यासग्रहणरूपपरधर्मापेक्षया युद्धकर्मरूपस्वधर्मस्योपयोगित्वं श्रीभगवान् बहुधा उवाच। विशदीकृतं च टीकायाम्– अतः स्वधर्मे किंचिदङ्गहीनेऽपि स्थितस्य निधनं मरणमपि श्रेयः प्रशस्यतरं, परधर्मस्थस्य जीवितादपि। स्वधर्मस्थस्य निधनं हि इह लोके कीर्त्यावहं परलोके च स्वर्गादिप्रापकम्। परधर्मस्तु इहाकीर्तिकरत्वेन परत्र नरकप्रदत्वेन च भयावहो यतः, अतो रागद्वेषादिप्रयुक्तस्वाभाविकप्रवृत्तिवत् परधर्मोऽपि हेय एवेत्यर्थः[35] इति।

रागद्वेषयोश्च अखिलानर्थमूलत्वेन स्वीकार्यम्। तत्र रागः कामो वा द्वेषः क्रोधो वा रजोगुणसमुद्भूतः। कामरूपशत्रोरधिष्ठाने ज्ञाते स जेतुं शक्यते। श्रोत्रादीनि इन्द्रियाणि मनो बुद्धिश्च कामस्याधिष्ठानमुच्यते। कामोऽयम् इन्द्रियादिभिः स्वस्वव्यापारवद्भिः आश्रयैः ज्ञानमाच्छाद्य देहाभिमानिनं मोहयति। दुःखेनासादनीयत्वात् कामरूपं शत्रुरयं दुर्विज्ञेयम्। अतः कामनिरोधात् पूर्वं श्रोत्रादिषु इन्द्रियेषु वशीकृतेषु मनोबुद्ध्योः संयमोऽपि भवेत्। सर्वमेतद् श्रीमन्मधुसूदनेन एवं स्पष्टीकृतम्– यस्मादिन्द्रियाधिष्ठानः कामो देहिनं मोहयति, तस्मात् त्वमादौ मोहनात् पूर्वं कामनिरोधात् पूर्वमिति वा इन्द्रियाणि श्रोत्रादीनि नियम्य वशीकृत्य तेषु हि वशीकृतेषु मनोबुद्ध्योरपि वशीकरणं सिध्यति संकल्पाध्यवसाययोर्बाह्येन्द्रिय–प्रवृत्तिद्वारैवानर्थहेतुत्वात्,[36] इति।

दुर्विज्ञेयं कर्मयोगतत्त्वमिदं सर्वक्षत्रियवंशबीजस्वरूपाय आदित्याय प्रथमतया उपदिश्यते। आदित्यमारभ्य गुरुशिष्यपरंपरया प्राप्तमिमं योगं निमिप्रमुखाः राजर्षयः विदुः। अतोऽनादिगुरुशिष्यपरंपराप्राप्तत्वेन अनन्तफलत्वेन च महाप्रभावोऽयं योग इति वक्तुं शक्यते। महाप्रयोजनोऽपि स एव योगः कालेन अनधिकारिणः प्राप्य कामक्रोधादिभिः अभिभूयमानो

विच्छिन्नसम्प्रदायो जातः। यं विना पुरुषार्थप्राप्तिर्न भवेत् सैव कर्मयोगरूपम् अत्युच्चज्ञानरहस्यं श्रीभगवान् परमभक्ताय अर्जुनाय प्रकाशयामास। तत्त्वावगाहिनीं बुद्धिं विना श्रीभगवतः जन्मतत्त्वं तथा कर्मतत्त्वमपि नावगम्यते। ज्ञानतपस्यया शुद्धचित्तस्य प्रकृततत्त्वस्फुरणेन भगवत्प्राप्तिः संभवेत्, केवलं कर्मतत्त्वश्रवणेन भगवल्लाभो न भवत्येव। आर्ताद्यधिकारिणः सकामेन निष्कामेन च येन प्रकारेण भजन्ति तदपेक्षितफलदानेनैव श्रीभगवान् तान् अनुगृह्णति। परमेश्वरः आर्तान् अर्थार्थिनश्च अर्थदानेन जिज्ञासून् ज्ञानदानेन ज्ञानिनश्च मोक्षदानेन फलं ददातीति दीपिकायां सम्यगेव व्याख्यातम्– तत्रामुमुक्षूनार्तानर्थार्थिनश्चार्तिहरणेनार्थदानेन चानुगृह्णामि, जिज्ञासून् 'विविदिषन्ति यज्ञेन' इत्यादि विहितनिष्कामकर्मानुष्ठानं ज्ञानदानेन, ज्ञानिनश्च मुमुक्षून् मोक्षदानेन, न त्वन्यकामायान्यं ददामीत्यर्थः[37] इति।

कर्मफलस्पृहाशून्यस्य नाहं कर्तेत्यभिमानेन कर्मबन्धनम् असंभवम्। ययातिप्रभृतय आत्मनः अकर्तृत्वं ज्ञात्वा कर्तृत्वाभिमानहीनतया निष्कामकर्मानुष्ठानं कृतवन्तः। अतो न संन्यासावलम्बनं नापि तूष्णीमासनम्, अर्जुनेन कर्मैव सर्वथा संपादनीयम्। जनकादिपूर्वाचार्याणां कृतकर्मणा युगान्तरेऽपि कर्मणामवश्यकर्तव्यता प्रतीयत इति टीकायामपि निगदितम्– पूर्वैः जनकादिभिः पूर्वतरम् अति पूर्वं युगान्तरेऽपि कृतम्। एतेनास्मिन् युगे अन्ययुगे च पूर्वपूर्वतरैः कृतत्वादवश्यं त्वया कर्तव्यं कर्मेति दर्शयति[38] इति। एवमत्रादौ कर्माकर्मणोर्भेदं निरूप्य यज्ञार्थं तपःकरणं तस्य च फलं ब्रह्मार्पणं प्रशस्य श्रीभगवता पार्थं प्रत्युपदिष्टम्–

कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्। (श्री. म. गी.– ४/१५)

चतुर्थेऽध्यायेऽस्मिन् यज्ञस्वरूपस्य विशालकल्पना परिलक्ष्यते। बहुविधा यज्ञा भगवतोऽभिमताः। न केवलं वाजपेयादयो महायज्ञा अनुष्ठेयाः किं तु तपोयज्ञ–योगयज्ञ–ज्ञानयज्ञ–स्वाध्याययज्ञादयोऽप्याचरितव्या मुमुक्षुभिः। प्रतिश्रुतं च देवदेवेन–

सर्वेऽप्येते यज्ञविदो यज्ञक्षयितकल्मषाः। (श्री. म. गी.– ४/३०)

ज्ञानावस्थितचेतसा आसक्तिशून्यतया श्रीविष्णुप्रीत्यर्थे सर्वकर्मानुष्ठानमेव यज्ञार्थं कर्म। कर्मणोऽस्य बन्धनहेतुत्वं न स्वीकार्यम्। यज्ञार्थे कृतकर्मणा कर्मबीजं फलेन सह समूलं प्रणश्यति। तथा चोक्तम्– ...यज्ञाय विष्णवे तत्प्रीत्यर्थमिति वा आचरतः कर्म यज्ञदानादिकं समग्रं सहाग्रेण फलेन विद्यत इति समग्रं प्रविलीयते प्रकर्षेण कारणोच्छेदेन तत्त्वदर्शनाद्विलीयते विनश्यति इत्यर्थः[39] इति।

सर्वयज्ञात्मिकत्वाद् ब्रह्मदृष्टेः प्रशंसा अत्र क्रियते। रज्जुकल्पितसर्पवत् ब्रह्मणः अधिष्ठानातिरिक्तसत्ताभावाद् यज्ञादौ हविस्त्यागप्रक्षेपक्रियादिरूपं सर्वं ब्रह्मैव। पुनश्च सम्यग्दर्शनस्य यज्ञस्वरूपत्वेन स्तुत्यर्थं दर्शपूर्णमासादिरूपं कर्मयज्ञं प्रशस्य अन्तःकरणशुद्धिद्वारेण तत्फलभूतं ज्ञानयज्ञमपि स्तूयते। निरुक्तकारयास्काचार्यमतानुसारम् आत्मशब्दपर्यायो यज्ञशब्दः। अत्र जीवब्रह्माभेददर्शनं यज्ञत्वेन कल्पयित्वा आत्मसाक्षात्कारपरंपरासाधनस्वरूपभूते यज्ञमध्ये तत् पठ्यते। यज्ञस्य अवश्यसंपादनीयत्वाज् जीवब्रह्माभेददर्शनस्य सर्वोत्कृष्टयज्ञत्वात् यज्ञस्य अत्यावश्यकत्वबोधनार्थं च यज्ञशब्देन ज्ञानमेव द्योतितम्। उक्तं च दीपिकायाम्– एवं कर्मयज्ञमुक्त्वान्तःकरणशुद्धिद्वारेण तत्फलभूतं ज्ञानयज्ञमाह ब्रह्माग्नौ सत्यज्ञानानन्तानन्दरूपं निरस्तसमस्तविशेषं ब्रह्म तत्पदार्थस्तस्मिन्नग्नौ यज्ञं प्रत्यगात्मानं त्वंपदार्थं यज्ञेनैव यज्ञशब्द आत्मनामसु यास्केन पठितः– ... जीवब्रह्माभेददर्शनं यज्ञत्वेन सम्पाद्य तत्साधनयज्ञमध्ये पठ्यते, 'श्रेयान् द्रव्यमयाद् यज्ञाज् ज्ञानयज्ञः' इत्यादिना स्तोतुम्[40] इति।

यत्किंचिद् वैदिकं श्रेयःसाधनं तत्सर्वं यज्ञत्वेन संपद्यते। पातञ्जलदर्शनानुसारेण लयपूर्वकसमाधिः तस्माद् व्युत्थानरूपं यज्ञद्वयं तथा च वेदान्तदर्शनानुसारेण बाधपूर्वक–समाधेरपि यज्ञान्तरमुक्तमेव। बन्धनकारकत्वाद् यज्ञादन्यत् कर्म त्यज्यम्। ज्ञानयज्ञो द्रव्ययज्ञात् श्रेयान्। यथाशास्त्रं द्रव्यत्याग एव यज्ञो येषां ते द्रव्ययज्ञाः; कृच्छ्रचान्द्रायणादि तप एव यज्ञो येषां ते तपोयज्ञाः। चित्तवृत्तिनिरोधरूपोऽष्टाङ्गयोग एव येषां यज्ञः ते योगयज्ञाः। यथाविधिवेदाभ्यासपराः स्वाध्याययज्ञाः। प्रत्युत न्यायेन सुयुक्तिद्वारेण वा वेदार्थनिश्चयपरा

ज्ञानयज्ञा इति कथ्यते। यज्ञं यज्ञतत्त्वं वा ये विदन्ति ते यज्ञविदः यज्ञैः क्षयितकल्मषा जायन्ते। सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण सर्वेऽपि ते संसारान् मुच्यन्ते। यज्ञानुष्ठानमन्तरेण केनोपायेण परमतत्त्वं न लभते। साक्षान्मोक्षजनकत्वात् सर्वस्मादपि संसारफलात् ज्ञानयज्ञः प्रशस्यतरः। यतः इष्टिपशुसोमचयनरूपं निखिलं श्रौतकर्म तथा स्मार्तमुपासनादिरूपं कर्म ब्रह्मात्मैक्यसाक्षात्काररूपे ज्ञाने पर्यवस्यति। तदुक्तम्–

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते। (श्री. म. गी.– ४/३३)

ज्ञानयज्ञेतरयज्ञसमूहः आत्मा कर्तेति बुद्ध्या संपद्यते। केवलं ज्ञानयज्ञः आत्मनः अकर्तृत्वबोधे प्रवर्तते। द्रव्ययज्ञः चित्तशुद्धिद्वारेण ज्ञानयज्ञनिष्ठां समुत्पादयति। तथा चोक्तं दीपिकायाम्– सर्वेषां तुल्लवन्निर्देशात् कर्मज्ञानयोः साम्यप्राप्तावाह श्रेयानिति। श्रेयान् प्रशस्यतरः साक्षान्मोक्षफलत्वात् द्रव्यमयात् तदुपलक्षितात् ज्ञानशून्यात् सर्वस्मादपि यज्ञात् संसारफलात् ज्ञानयज्ञ एक एव हे परन्तप। कस्मादेवं यस्मात् सर्वं कर्म इष्टिपशुसोमचयनरूपं श्रौतम् अखिलं निरवशेषं स्मार्तमुपासनादिरूपं च यत् कर्म तज् ज्ञाने ब्रह्मात्मैक्यसाक्षात्कारे परिसमाप्यते प्रतिबन्धकक्षयद्वारेण पर्यवस्यति[41] इति।

अज्ञानरूपं सर्वानर्थमूलम् आत्मस्वरूपज्ञानरूपेण असिना छित्त्वा सम्यग्दर्शनोपायं निष्कामकर्म अनुष्ठेयम्। एतदर्थं भरतवंशोद्भूतस्यार्जुनस्य युद्धोद्यमो निष्फलो न भवेत्। श्रीभगवान् वासुदेवोऽत्र आत्मनः अनीश्वरत्वबाधेन जीवस्य भक्तिश्रद्धे दृढीकृते ज्ञानहेतुः कर्मनिष्ठास्वरूपं विधृतम्। योगेनैव कर्मसंन्यासो भवेत्। संन्यस्तकर्मणः कर्मबन्धनमसंभवम्। विचारात्मकं ज्ञानं योगश्च कर्मभूमेः साधनम्। आचार्यपादेनापि टीकायामेवं व्याख्यातम्– एनं सर्वानर्थमूलभूतं संशयं आत्मनो ज्ञानासिना आत्मविषयकनिश्चयखड्गेन छित्त्वा योगं सम्यग्दर्शनोपायं निष्कामकर्म आतिष्ठ कुरु। अत इदानीमुत्तिष्ठ युद्धाय हे भारत! भरतवंशे जातस्य युद्धोद्यमो न निष्फल इति भावः। स्वस्यानीशत्वबाधेन भक्तिश्रद्धे दृढीकृते। धीहेतुः कर्मनिष्ठा च हरिणेहोपसंहृता[42] इति।

कर्मसंन्यासत्वेनोदाहृतो गीतायाः पञ्चमेऽध्याये कर्मसंन्यासस्य लक्षणान्यल्पत्वेनोदाह्रियन्ते। तत्रादौ तमःप्रकाशवद्विरुद्धस्वभावयोः ज्ञानकर्मणोः समुच्चयोऽसंभव इत्युक्तमेव। कर्माधिकारहेतुः भेदबुद्धिरेव। भेदबुद्ध्यपनोदकत्वाज् ज्ञानस्य कर्मविरोधित्वं निरूपितमेव। ज्ञानस्याज्ञाननाशरूपकार्यम्, परं कर्मणा तदसंभवात् ज्ञानकर्मणोः समुच्चयो नैव संभवेत्। सर्वकर्माणि ज्ञानार्थानि तथा सर्वकर्मसंन्यासोऽपि ज्ञानार्थः श्रूयते। परंपरासंबन्धेन कर्म एवात्मज्ञानसाधनम्। कर्मानुष्ठानमन्तरेण नैष्कर्म्यं न भवत्येव। चित्तगतकालुष्यदूरीकरणमेव कर्मणः साक्षात्फलम्। परं संन्यासस्तु साक्षात्संबन्धेन ज्ञानसाधनमेव। आत्मज्ञानोत्पादनविषयकसाधनस्य भिन्नत्वाद् उभययोः एकार्थत्वं नास्ति। अतः प्रथमतया निष्कामकर्मसंपादनेन चित्तशुद्ध्यनन्तरं विविदिषायां दृढायां वेदान्तवाक्यविचाराय सर्वकर्मसंन्यासः कर्तव्यः। अन्तःकरणशुद्धिरूपयोगोऽत्र विविदिषा–पदेनोक्तः। विविदिषाप्राप्तस्य कर्म एव कारणमुव्यते। प्रत्युत पूर्वोक्तयोगारूढस्य कर्मसंन्यास एव कारणम्। अत्र योगपदेन सुतीव्रवैराग्यपूर्विका विविदिषा ज्ञातव्या। सर्वमेतत् स्पष्टीकृतमाचार्यपादेन– तस्मादादौ भगवदर्पणबुद्ध्या निष्कामकर्मानुष्ठानादन्तःकरणशुद्धौ तीव्रेण वैराग्येण विविदिषायां दृढायां सर्वकर्मसंन्यासः श्रवणमननादिरूपवेदान्तवाक्यविचाराय कर्तव्य इति भगवतो मतम्। तथा चोक्तं 'न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते' इति। वक्ष्यते च, 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते' इति। योगोऽत्र तीव्रवैराग्यपूर्विका विविदिषा[43] इति।

अविरक्ततादशायाम् अज्ञस्य कर्मानुष्ठानमेव तथा विरक्ततादशायां संन्यास एव प्रयोजनम्। तस्माद् एकस्यैव अज्ञस्य कर्मानुष्ठानं तथा कर्मसंन्यासोऽपि अवस्थाभेदेन विहितः। ज्ञानोत्पत्तिहेतुत्वेन संन्यासः कर्मयोगश्च उभययोः निःश्रेयसकरत्वं मान्यम्। एतयोर्मध्ये कर्मसंन्यासादनधिकारित्वात् कर्मयोगस्य उत्कृष्टत्वं निरूपितमेव– निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत्वेन मोक्षोपयोगिनौ। तयोस्तु कर्मसंन्यासादनधिकारित्वात् कर्मयोगो विशिष्यते श्रेयान् अधिकारसंपादकत्वेन[44] इति। स्वाधिकारानुरूपेण संन्यासकर्मणोर्मध्ये यः एकमाश्रित्य

यथाशास्त्रानुष्ठानं करोति तस्य ज्ञानोत्पत्तिपूर्वकेण निःश्रेयसरूपफलं लभते। एकस्यानुष्ठानात् कथमुभयोः फलं लभत इत्याशङ्कायाम् ऐहिककर्मानुष्ठानशून्यत्वेऽपि ज्ञाननिष्ठैः संन्यासिभिः पूर्वजन्मान्तरीयकर्मभिः विशुद्धान्तःकरणैः श्रवणादिपूर्विकया ज्ञाननिष्ठया मोक्षपदं प्राप्यत इत्युक्तम्। अत्र 'कर्मयोग'–पदस्य 'योग'–शब्देन भगवदर्पणबुद्ध्या फलाभिसंधिराहित्येन कृतानि शास्त्रीयकर्माणि एव निर्दिष्टम्– योगैरपि भगवदर्पणबुद्ध्या फलाभिसंधिराहित्येन कृतानि कर्माणि शास्त्रीयाणि योगास्ते येषां सन्ति तेऽपि योगाः[45] इति। अतः ईश्वरार्पणबुद्ध्या निष्कामकर्मानुष्ठानेन कर्मयोगाधिकारिणः अन्तःकरणशुद्ध्यनन्तरं संन्यासपूर्वकश्रवणादिपुरःसरं ज्ञाननिष्ठया वर्तमाने परवर्तिनि वा जन्मनि मुक्तिफलं जायत इत्यभिप्रायः। संन्यासपूर्विका ज्ञाननिष्ठा येषां दृश्यते तयैव हेतुना तेषां पूर्वजन्मसु भगवदर्पितकर्मनिष्ठा आसन्नित्यनुमीयते। कारणव्यतिरेकेण कार्योत्पत्तिः असंभवेति न्यायोऽत्र प्रमाणरूपेण स्मर्तव्यः। प्रत्युत सामग्र्याः कार्याव्यभिचारित्वादिति न्यायेन भगवदर्पितकर्मनिष्ठा येषां दृश्यते तयैव हेतुना परवर्तिनि जन्मनि तेषां संन्यासपूर्वकज्ञाननिष्ठा भवेदित्यनुमीयते। अतोऽन्तःकरणशुद्धये मुमुक्षुणा कर्मयोगः एवादौ अनुष्ठेयो न तु संन्यासः। सुतीव्रवैराग्यदशायां संन्यासः समुत्पद्यते। एतदेवोक्तं दीपिकायाम् आचार्यपादेन– एवं येषां भगवदर्पितकर्मनिष्ठा दृश्यते तेषां तयैव लिङ्गेन भाविनी संन्यासपूर्वकज्ञाननिष्ठानुमीयते सामग्र्याः कार्याव्यभिचारित्वात्। तस्मादज्ञेन मुमुक्षुणान्तःकरणशुद्धये प्रथमं कर्मयोगोऽनुष्ठेयो न तु संन्यासः स तु वैराग्यतीव्रतायां स्वयमेव भविष्यतीति[46] इति।

ज्ञाननिष्ठाहेतुत्वेन संन्यासस्य आवश्यकत्वेऽपि अशुद्धान्तःकरणेन प्रथमं न तत् ग्रहणीयम्। अन्तःकरणशोधकं शास्त्रीयं कर्मान्तरेण कृतसंन्यासस्य दुःखफलत्वं मान्यम्। अशुद्धान्तःकरणत्वेन ज्ञाननिष्ठाया असंभवात् तथा अन्तःकरणशोधकत्वे च कर्मण्यनधिकारात् कर्मब्रह्मोभयभ्रष्टत्वाच्च तस्य परमसंकटापत्तिर्भवेत्। प्रत्युत शुद्धान्तःकरणत्वात् कर्मयोगयुक्तो मननशीलः संन्यासी भूत्वा आत्मानं शीघ्रमेव साक्षात्करोति। एवमेकफलत्वेऽपि कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वम् उपपन्नमेव। स्वाभाविकपरिणतिवशात् कर्मयोगः कर्मसंन्यासतया

परिणमते। रागद्वेषादिद्वन्द्वातीतस्य हेतोः कर्मयोगी नित्यसंन्यासीति वक्तुं शक्यते। योगमन्तरेण कर्मसंन्यासी मोक्षपदं न प्राप्नोति। प्रकृतकर्मयोगेन सह यथार्थसंन्यासस्य भिन्नत्वं नास्ति। योगावलम्वनार्थं संन्यासस्य तथा संन्यासावलम्वनार्थं योगस्यावश्यकत्वमस्ति। अतो योगी एव संन्यासी तथा संन्यासी अपि योगी एव। योगयुक्तस्य निर्मलान्तःकरणेन देहेन्द्रियादीनां वशीकरणं संभवेत्। देहेन्द्रियादीनां वशीकृते तथा अन्तःकरणस्य कालुष्यशून्यत्वे च अन्तःकरणस्य सर्वभूतवर्गेण सह आत्मनः अभेदोऽनुमीयते। अन्तःकरणगताशुद्धिरेव भेददर्शनस्य कारणम्। निर्मलान्तःकरणेन अभेददर्शनरूपा मुक्तिर्जातेति निश्चप्रचम्। अभेददर्शी कर्मणा न लिप्यते; एतेन तस्य कर्मत्यागस्य प्रयोजनमपि नास्ति। सर्वव्यापारेषु आत्मनोऽकर्तृत्वमेव स पश्यति। फलाभिलाषयुक्तत्वमेव बन्धनकारणम्। यश्च समाहितचेतसा फलाभिसंधिं त्यक्त्वा कर्मयोगावधारणं करोति स शाश्वतीं शान्तिमधिगच्छति। प्रोक्तं चाचार्यपादेन– भगवदर्पणफलाभिसंधिराहित्यादिगुणयुक्तं शास्त्रीयं कर्म योग इत्युच्यते[47] इति।

कर्ममात्रं बन्धनजनकमिति मतं भ्रान्तमेव। कर्मणः फलाभिलाषयुक्तत्वं बन्धनकारणम्, फलाभिलाषशून्यत्वं च मुक्तिफलदायकमित्यस्मिन्नध्याये प्रपञ्चितम्। कर्मयोगेन अन्तःकरणशुद्धिस्ततः सर्वकर्मसंन्यासः, तदनन्तरं श्रवणादिपरस्य मोक्षसाधनं तत्त्वज्ञानमुदेतीत्यपि अध्यायेऽस्मिन् भूयो भूयो प्रतिपादितम्।

योगिनो बाह्यविषयजनितसुखं नास्ति। आत्मन्येव आरमणत्वात्तस्य स्त्र्यादिबाह्यसुखसाधनशून्यत्वम् अवज्ञेयम्। श्रोत्रादिजन्य–शब्दादिबाह्यविषयविज्ञानरहितः सोऽन्तर्ज्योतिरेव। एवंविधविशेषणसंपन्नो योगी कल्पितस्याधिष्ठानातिरिक्तसत्ताभावात् कल्पितद्वैतप्रपञ्चोपशमरूपं परमानन्दस्वरूपं ब्रह्म प्राप्नोतीति दीपिकाकारेण श्रुतिप्रमाणसहयोगेन प्रोक्तम्– य एवं यथोक्तविशेषणसंपन्नः स योगी समाहितः ब्रह्मनिर्वाणं ब्रह्म परमानन्दरूपं कल्पितद्वैतोपशमरूपत्वेन निर्वाणं तदेव, कल्पितभावस्याधिष्ठानात्मकत्वात्, अविद्यावरणनिवृत्त्या अधिगच्छति; नित्यप्राप्तमेव प्राप्नोति। यतः सर्वदैव ब्रह्मभूतो नान्यः[48] इति।

सम्यग्दर्शनस्य अन्तरङ्गसाधनरूपो ध्यानयोगः पञ्चमाध्यायस्य अन्तिमे श्लोकत्रये विशदीक्रियते। षष्ठाध्याये श्लोकत्रयस्यास्य मूलीभूततत्त्वम् आलोच्यते। तत्र प्रथमे श्लोकद्वये योगस्वरूपं तृतीये श्लोके च योगस्य फलस्वरूपं परमात्मविज्ञानं स्पष्टीक्रियत इति स्वयमेव आचार्यपादेन निगदितम्– अधुना स योगी ब्रह्मनिर्वाणमित्यत्र सूचितं ध्यानयोगं सम्यग्दर्शनस्यान्तरङ्गसाधनं विस्तरेण वक्तुं सूत्रस्थानीयान् त्रीन् श्लोकानाह भगवान्। एतेषामेव वृत्तिस्थानीयः कृत्स्नः षष्ठोऽध्यायो भविष्यति। तत्रापि द्वाभ्यां संक्षेपेण योग उच्यते। तृतीयेन तु तत्फलं परमात्मज्ञानमिति विवेकः[49] इति।

सर्वकर्मत्यागपूर्वकेन योगविधानात् कर्मणः हीनत्वाशङ्का समुपजायते। अत्रोच्यते, कर्मफलमनपेक्ष्यमाणः फलाभिसंधिविवर्जितः सन् शास्त्रसंमतं नित्यमग्निहोत्रादि कर्म यः करोति स संन्यासी च योगी चेति कथ्यते। अत्र संन्यास–पदेन त्यागः योग–पदेन च चित्तगतविक्षेपाभावः ज्ञेयः। संन्यास–योगशब्दाभ्यां कर्मफलतृष्णात्याग एवात्र अभिधीयते। निष्कामकर्मानुष्ठातुः संन्यासयोगौ अवश्यंभाविनौ। एतेन कर्मणः हीनत्वाशङ्कापि निराकृता। सर्वमेतत् प्रतिपादयता आचार्यपादेन प्रोक्तम्– कर्मणां फलमनाश्रितोऽनपेक्ष्यमाणः फलाभिसंधिरहितः सन् कार्यं कर्तव्यतया शास्त्रेण विहितं नित्यमग्निहोत्रादि कर्म करोति यः, स कर्म्यपि सन् संन्यासी च योगी चेति स्तूयते। ... कर्मफलतृष्णात्याग एवात्र गौण्या वृत्त्या संन्यासयोगशब्दाभ्यामभिधीयते। सकामानपेक्ष्य प्राशस्त्यकथनाय। अवश्यंभाविनौ हि निष्कामकर्मानुष्ठातुर्मुख्यौ संन्यासयोगौ[50] इति।

कर्मयोगस्य तथा कर्मसंन्यासस्य कश्चाधिकारीति विषयेऽप्यत्र आलोच्यते? अन्तःकरणशुद्धिरूपं वैराग्यम् आरोढुमिच्छोः कर्मफलतृष्णात्यागिनो भगवदर्पणबुद्ध्या शास्त्रविहिताग्निहोत्रादि नित्यं कर्म कर्मयोगारोहणे साधनं कथ्यते। श्रीभगवन्मुखस्वरूपभूतो वेदोऽत्र प्रमाणत्वेन युज्यते। तत्र अन्तःकरणशुद्धिरूपं वैराग्यं प्राप्तवतः पूर्वं कर्मानुष्ठाता अपि परं तस्य सर्वकर्मसंन्यास एव अनुष्ठेयः। सर्वकर्मसंन्यास एव ज्ञानपरिपाकसाधनत्वेन गण्यते। कदा योगारूढत्वं संभवतीत्याशङ्कायां निगद्यते– चित्तसमाधानकाले पुरुषः शब्दादिषु इन्द्रियार्थेषु विषयेषु नित्य–

नैमित्तिक–काम्यकर्मसु च न लिप्यते। पूर्वोक्तेषु विषयेषु मिथ्यात्वदर्शनेन आत्मनोऽकर्तृत्वदर्शनेन एतेषां कर्ताहमित्यभिमानरूपमनुषङ्गं च न करोतीत्युक्त्वमेव। तेन सर्वसंकल्पसंन्यासी सर्वेषां संकल्पानां मनोवृत्तिविशेषाणां कामानां तत्साधनानां कर्मणां च त्यागशीलो योगारूढ इत्युच्यते। बाह्यकर्मण अनुष्ठानेन अननुष्ठानेन च संन्यासो योगो वा न निरूप्यते। संकल्पत्यागः कामनाराहित्यश्च उभयस्य मूलीभूततत्त्वम्। बाह्यकर्मत्यागेऽपि कामनासंयुक्तान्तरात्माविशिष्टस्य संन्यासी तथा योगीपदवाच्यत्वं न सिध्यति। बाह्यकर्मानुष्ठानं बाह्यावरणमात्रम्। सर्वविधकामनारहितस्य संन्यासी योगी चेत्युभयनामधेयमुपयुज्यते। तत्त्वदृष्ट्या उभयस्य वैषम्यं नास्ति। सर्वसंकल्पसंन्यासी कथं योगारूढो भवितुमर्हतीति प्रसङ्गे सम्यक्तया व्याख्यातम्– यदा यस्मिन् चित्तसमाधानकाले इन्द्रियार्थेषु शब्दादिषु कर्मसु च नित्यनैमित्तिककाम्यलौकिकप्रतिषिद्धेषु नानुषज्जते तेषां मिथ्यात्व–दर्शनेनात्मनोऽकर्तृभोक्तृ–परमानन्दाद्वयस्वरूप–दर्शनेन च प्रयोजनाभावबुद्ध्या अहमेतेषां कर्ता ममैते भोग्या इत्यभिनिवेशरूपमनुषङ्गं न करोति हि यस्मात् तस्मात् सर्वसंकल्पसंन्यासी सर्वेषां संकल्पानामिदं मया कर्तव्यमेतद् फलं भोक्तव्यमित्येवंरूपाणां च कर्मणां त्यागशीलः तदा शब्दादिषु कर्मसु चानुषङ्गस्य तद्धेतोश्च संकल्पस्य योगारोहणप्रतिबन्धकस्याभावाद् योगं समाधिमारूढो योगारूढ इत्युच्यते[51] इति।

कर्मणा ध्यानयोगारोहनमपि संभवेत्। चित्तविक्षेपं दूरीकृत्य कर्म एव चित्तस्य ध्यानयोग्यतां संपादयति। ध्यानयोग्ये चित्ते कर्म स्वयमेव दूरमपगच्छति। चित्तस्य शुद्ध्यवस्थायां कर्मत्यागः स्वयमेव भवेत्। इन्द्रियभोग्यविषयेषु अनासक्तिः चित्तशुद्धिद्योतकेव। अस्यामेवावस्थायां कर्म अपि नानुभूयते। कर्मोपरतेः भूमिरियमुच्यते। विषयसन्निधौ विकारशून्यत्वाद् योगारूढस्य विजितेन्द्रियत्वमवज्ञेयम्। एतादृशावस्थायां 'ग्राह्यमिदम्', 'त्याज्यमिदम्' इत्याकारा बुद्ध्यभावात् तत्सविधे मृत्पाषाणादीनां तुल्यत्वं प्रतीयते। परवैराग्ययुक्तस्यायं योगिनो योगारूढत्वमपि निरूपितम्– कूटस्थो विषयसन्निधावपि विकारशून्यः, अत एव विजितानि रागद्वेषपूर्वकाद्विषय–ग्रहणाद्व्यावर्तितानीन्द्रियाणि येन सः। अत एव हेयोपादेयबुद्धिशून्यत्वेन

समानानि मृत्पिण्डपाषाणकाञ्चनानि यस्य स योगी परमहंसव्राजकः परमवैराग्ययुक्तो योगारूढ इत्युच्यते[52] इति।

योगारूढस्य लक्षणमुक्त्वा उत्तमफलप्राप्तये योगी केन प्रकारेणैव साङ्गं योगं कुर्यात्तदप्यत्र विधीयते। कतिचिदुदाहरणान्यत्र प्रदीयते। यथा आसने उपविश्य एव योगानुष्ठानं कर्तव्यं न तु शयानस्तिष्ठन् वा। चित्तेन्द्रियवृत्तिनिवृत्तस्य अन्तःकरणशुद्धये ब्रह्मसाक्षात्काराय योगमभ्यसेत्। योगाङ्गानां मध्ये चित्तशुद्धये आसनस्य महदुपयोगित्वं मान्यम्। *स्थिरसुखमासनम्* (यो. सू.– २/४६) इति भगवता पतञ्जलिनापि सूत्रितम्। श्रीमन्मधुसूदनपादाचार्येणापि यथार्थतयोक्तम्– तत्र तस्मिन्नासने उपविश्यैव न तु शयानस्तिष्ठन् वा 'आसीनः संभवादि'ति न्यायात्। यताः संयता उपरताश्चित्तस्येन्द्रियाणां च क्रिया वृत्तयो येन स यतचित्तेन्द्रियक्रियः सन् योगं समाधिं युञ्ज्याद् युञ्जीताभ्यसेत्[53] इति। पुनश्च, भगवद्गतचित्तव्यतिरेकेण योगाभ्यासोऽसंभव इत्यप्यत्र प्रतिपादितः। संयमस्य पराकाष्ठायां भगवत्परायणस्य समुन्नतिः भवेत्। स्त्रीपुत्राद्यभिप्रेतविषये चिन्तनीये सति कथं परमेश्वरविषयिका धारावाहिकचित्तवृत्तिः संभवेदित्याशङ्कायां विषयाकारवृत्तिनिरोधेन भगवद्गतच्चित्तवृत्तिसंपन्नो जनः यथाशक्तिः समाधिमुपविशेदिति श्रुतिवाक्यसमर्थनपुरःसरं *गूढार्थदीपिका*यां प्रतिपादितः– पुत्रादौ प्रिये चिन्तनीये सति कथमेवं स्यादत आह मत्पर अहमेव परमानन्दरूपत्वात् परः पुरुषार्थः प्रियो यस्य स तथा। *तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरो यदयमात्मा* (बृह. उ.– १/४/८) इति श्रुतेः। एवं विषयाकार–सर्ववृत्तिनिरोधेन भगवदेकाकारचित्तवृत्तियुक्तः संप्रज्ञात–समाधिमानासीतोपविशेद् यथाशक्तिः न तु स्वेच्छया व्युत्तिष्ठेदित्यर्थः[54] इति।

योगाभ्यासनिरतस्याहारः कीदृशो भवेदिति विषये उक्तम्, यद्भुक्तद्रव्यमनायासेन जीर्यति शरीरस्य कार्यक्षमतां च संपादयति तदात्मसंमितमन्नमेव। परं लोभेनाधिकभुक्तस्य अजीर्णादिदोषदुष्टतया व्याधिपीडितत्त्वात्तस्य योगो न भवेत्। अनश्नतोऽपि योगो न भवत्येव; यतोऽनाहाराद् रसपोषणाभावेन कार्यसंपादनविषये देहस्य अक्षमत्वमेव दृश्यते। अतिशीते उष्णे च समये, शीतोष्णादिमिश्रितकाले, वात्याबहुलस्थानेऽपि योगं न कुर्यादित्यप्यभिहितम्। प्रयत्नविशेषेण

संपादितो योगो महत्फलमुत्पादयति। संसारदुःखकारणरूपाया अविद्याया उन्मूलनं ब्रह्मविद्यया भवत्येव। ब्रह्मविद्योत्पादकत्वात् सर्वदुःखनिवृत्तिहेतुत्वाच्च योगस्य 'दुःखहे'ति सार्थकनामधेयं सिद्धमिति निरूपितं *गूढार्थदीपिका*याम्– एवं प्रयत्नविशेषेण संपादितो योगः किंफल इति तत्राह दुःखहेति। सर्वसंसार–दुःख–कारणाविद्योन्मूलन–हेतुर्ब्रह्मविद्योत्पादकत्वात् समूल–सर्वदुःख–निवृत्ति–हेतुरित्यर्थः[55] इति।

अत्रोल्लेख्यम्, चित्तवृत्तिनिरोधरूपो योगः सर्वदुःखविरोधित्वाद् दुःखवियोगस्वरूपमेव। वियोगशब्देन निर्देशादपि विरोधिलक्षणवलेन तस्य योगपदवाच्यत्वमधेयम्। योगस्तु द्वयोर्मेलनेन संभवेत्। संबन्धविशेषत्वान्मेलनस्य भाववाचकत्वमवज्ञेयम्। परं चित्तवृत्तेः अभाववस्थाज्ञापकत्वादपि चित्तवृत्तिनिरोधरूपयोगोऽभाववाचक एव। एतेन योग–पदस्यार्थो वियोगोऽप्यत्र बोध्यव्यः। विषयोऽयमुदाहरणमुखेन स्पष्टीक्रियते। 'उपकृतं बहु तत्र किमुच्यते' इत्यत्र काकुबलेन विपरीतलक्षणास्वीकरणेन 'बहुधा अपकारः तया कृतः' इत्यर्थवद् योग–पदेन वियोगरूपोऽर्थः ज्ञेयः। प्रकृतिपुरुषयोर्वियोगस्यापि योग–शब्दाभिधानात् पतञ्जलिमुनेः उक्तिरियम् अपूर्वार्थबोधकम्। प्राप्यते चाभाणकमिदम्–

पतञ्जलिमुनेरुक्तिः काप्यपूर्वा जयत्यसौ।
पुंप्रकृत्योर्वियोगोऽपि योग इत्युदितो यया॥ इति।

निर्वेदरहितचेतसा इह जन्मनि जन्मान्तरे वा योगः संसिध्येदिति बुद्ध्या योगाभ्यासः कर्तव्यः। योगानुष्ठानस्य वैराग्यात्मकपरिणतिवशात् चित्तं यदा आत्मनि अवस्थीयते तदा सुखानुभूतेः चरमावस्थेयमुच्यते। अतीन्द्रियं सुखमिदं न तून्द्रियग्राह्यं परं बुद्धिप्रसादजन्यमेव। उच्चमार्गीयबुद्धिप्रसादसमन्वितचित्तेन इन्द्रियभोग्यविषयजातं दूरमपगच्छति। अस्यामेवावस्थायाम् अखिलदुःखानां निवृत्तिः भवत्येव। विषयभोगवासनायाः त्यागमन्तरेण योगी योगेन न युज्यते। चित्तशुद्धिस्तु ज्ञान–भक्तियोगयोः मुख्यसाधनम्। चित्तवृत्तिनिरोधरूपयोगवज् ज्ञानमपि आत्मसाक्षात्कारहेतुत्वेन परिगण्यते। ज्ञानेनात्मसाक्षात्कारविषये योगस्य अत्यावश्यकत्वमस्तीति वक्तुं न शक्यते परं योगवलेन

निःश्रेयसलाभस्य चरमावस्थायां ज्ञानस्यावश्यकत्वं स्वीकरणीयमिति विशेषः। एतदर्थं चित्तनाशस्य साधनद्वयं श्रीभगवता उपदिष्टमिति वशिष्टवचनमुद्धृत्य *गूढार्थदीपिका*यामाचार्यपादेन सम्यगेवोक्तम्– अत एव वशिष्ठः, 'द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघवः। / योगो वृत्तिनिरोधश्च ज्ञानं सम्यगवेक्षणम्॥ असाध्यः कस्यचिद् योगः कस्यचित् तत्त्वनिश्चयः। / प्रकारौ द्वौ ततो देवो जगाद परमः शिव' इति।[56]

दुःसाध्यत्वेऽपि मनोनिग्रहस्य असंभवत्वं न स्वीकरणीयम्। असंभवविषये शास्त्रोपदेशो न प्रवर्तते। परमतत्त्वेन सह संयोगो विचारात्मककर्मापेक्षया ज्ञानापेक्षया च उत्कृष्टत्वेन भजते।

## उपसंहृतिः

एवं ज्ञानकर्मणोः समन्वयाभावात् *श्रीमद्भगवद्गीता*याः प्रथमषट्के कर्मनिष्ठायाः अन्तषट्के च ज्ञाननिष्ठायाः तत्त्वालोचनं क्रियते। श्रीकृष्णतत्त्वरूपपरमतत्त्वस्य यथार्थज्ञानं यद्यपि भक्त्या संभवति परं भक्तिभूमिदृढीकरणे कर्मयोगस्यापि महदुपयोगित्वमस्तीति निश्चप्रचम्। ज्ञानकर्मणोः आत्यन्तिकविरोधे समुच्चयाभावेऽपि अद्वैतज्ञानप्राप्तये कर्मयोगस्यारादुपकारकत्वं प्रथमषट्के सुसूक्ष्मविचारधारया समं श्रीमन्मधुसूदनेन केन प्रकारेणैव प्रतिपादितं तदेवाध्यायेऽस्मिन् समुपस्थितमित्यलमतिविस्तरेणेति शम्।

---

[1] गू. दी. , उपक्रमणिका– ५
[2] पा. धा. , १४४४
[3] पा. धा. , ११७७
[4] यो. सू. , १.२
[5] गू. दी. , उपक्रमणिका– ८
[6] रा. भा. , गीता– ४/१८
[7] रा. भा. , गीता– ४/१९

[8] रा. भा. , गीता– ४/२४
[9] गू. दी. , उपक्रमणिका– १२
[10] गु. दी. , गीता– ५/५
[11] गु. दी. , गीता– २/४८
[12] पा. धा. , ११७३
[13] गु. दी. , गीता– २/२७
[14] तत्रैव
[15] गु. दी. , गीता– २/३१
[16] ब्र. सू. , ३/१/२५
[17] गू. दी. , गीता– २/३१
[18] गू. दी. , गीता– २/३३–३४
[19] गू. दी. , गीता– २/३८
[20] गू. दी. , गीता– २/३९
[21] तत्रैव
[22] गू. दी. , गीता– २/४७
[23] गू. दी. , गीता– २/४९
[24] गू. दी. , गीता– २/५०
[25] गू. दी. , गीता– २/५१
[26] गू. दी. , गीता– ३/१
[27] गू. दी. , गीता– ३/३
[28] गू. दी. , गीता– ३/४
[29] गू. दी. , गीता– ३/६
[30] गू. दी. , गीता– ३/९
[31] गू. दी. , गीता– ३/१२
[32] गू. दी. , गीता– ३/१४
[33] गू. दी. , गीता– ३/२०
[34] गू. दी. , गीता– ३/३१
[35] गू. दी. , गीता– ३/३५
[36] गू. दी. , गीता– ३/४१
[37] गू. दी. , गीता– ४/११
[38] गू. दी. , गीता– ४/१५
[39] गू. दी. , गीता– ४/२३
[40] गू. दी. , गीता– ४/२५
[41] गू. दी. , गीता– ४/३३
[42] गू. दी. , गीता– ४/४२
[43] गू. दी. , गीता– ५/१
[44] गू. दी. , गीता– ५/२
[45] गू. दी. , गीता– ५/५
[46] तत्रैव
[47] गू. दी. , गीता– ५/७
[48] गू. दी. , गीता– ५/२४

[49] गू, दी. , गीता– ५/२७
[50] गू, दी. , गीता– ६/१
[51] गू, दी. , गीता– ६/४
[52] गू, दी. , गीता– ६/८
[53] गू, दी. , गीता– ६/१२
[54] गू, दी. , गीता– ६/१४
[55] गू, दी. , गीता– ६/१७
[56] गू, दी. , गीता– ६/२९

**********

# चतुर्थोऽध्यायः

# *गूढार्थदीपिका*यां भक्तियोगतत्त्वम्

## ४.१. उपोद्घातः

मधुसूदनसरस्वतीकृता *श्रीमद्भगवद्गीताया* *गूढार्थदीपिका*टीकायां भक्तितत्त्वं केन प्रकारेणैव प्रकाशितं तदेवास्मिन्नध्याये निवेद्यते। अस्यामेवालोचनायां आचार्यपादकृत–*भक्तिरसायना*दि–भक्तिशास्त्राणां प्रसङ्गसामान्यं *गूढार्थदीपिका*यामुल्लिखितत्वात्तेषामेव ग्रन्थानामपि पर्यालोचनं क्रियते। यथा भक्त्याः स्वरूपं साधनं तथा भेदवर्णनावसरे आचार्यपादेनाकुतम्– भगवदनुरक्तिरूपायास्तु भक्तेः स्वरूपं साधनं भेदास्तथा च भक्तानामपि *भक्तिरसायने* अस्माभिः सविशेषं प्रपञ्चिताः, इतीहोपरम्यते[1] इति। पुनश्च भगवच्छरणत्वस्य विभाग–कथनप्रसङ्गे प्रोक्तम्– विशेषो वर्णितोऽस्माभिः सर्वो *भक्तिरसायने*[2] इति। प्रत्युत *भागवत*प्रोक्त–नवधाभक्तेः स्वरूपवर्णनप्रसङ्गे व्यक्तम्– एतच्च *भक्तिरसायने* व्याख्यातं विस्तरेण[3] इति। अत्रोल्लेख्यम्, का नाम भक्तिस्तथा चास्या रसरूपत्वम् अलौकिकत्वं तथा क्रमधारापि विचार–पदवीमपेक्ष्यते। अखिल–वेदार्थसार–संग्रह–भूतस्य अष्टादशाध्याय–समन्वित–गीताशास्त्रस्य योगपरत्वाद् भक्तियोगस्यापि महदुपयोगित्वं मान्यम्। सर्वमेतत् सुविस्तृत–रूपेणात्र विचार्यते।

## ४.२. केयं भक्तिर्नाम

*गूढार्थदीपिका*यां प्रस्फुटित–भक्तिरस–पर्यालोचनारम्भे प्रथमे एव मनसि प्रश्न उदेति केयं भक्तिर्नामेति। सुप्राचीनोऽयं भक्तिशब्दः। उपनिषद्येव भक्तिशब्दस्योल्लेखः प्रथमतया प्राप्यते–

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥ (श्वे. उ. ६/२३) इति।

*कैवल्योपनिषद्य*पि भक्तिशब्दस्य प्रयोगोऽस्ति– श्रद्धा–भक्ति–ध्यान–योगादवेहि[4] इति। सेवार्थक–भज्–धातोः निष्पाद्यत्वाद् भक्ति–शब्दस्य भजनरूपः सेवारूपो वा अर्थोऽत्रावगम्यते।

भक्ति–शब्दस्यायमर्थो *गोपालतापन्युपनिषदि* गृह्यते– भक्तिरिह भजनं तदिहामुत्रोपाधि–नैरास्येनामुस्मिन् मनसः कल्पितमेतदेव नैष्कर्म्यम् इति। भजनमिदं ऐहिकस्तथा पारत्रिक–रूपोभयविषये फलकामनादि–शून्यतया श्रीभगवति चित्त–समर्पणेन प्रेम्णि एव पर्यवस्यति। श्रीभगवति निःशेषेण सर्वकर्म–समर्पण–पूर्वकेण तद्विस्मरणे परम–व्याकुलाया भक्ति–पदवाच्यत्वं *नारदभक्तिसूत्रे*ऽपि विनिर्णीतम्– तदर्पिताखिलाचारता तद्विस्मरणे परम–व्याकुलतेति[5] इति। अतो भक्तिर्नाम भगवति सानुराग आसङ्गः। इयं खलु परम–प्रेमरूपेति नारदः प्राह– “सा तस्मिन् परम–प्रेमरूपा”[6] इति। तत्र प्रेम–स्वरूपं किमित्युक्ते तेनाभिहितम्– “अनिर्वचनीयं प्रेमस्वरूपम्”[7] इति। ईश्वर–विषयिणी परानुरक्तिरेव भक्तिरिति हि महर्षि–शाण्डिल्यस्याभिमतम्– “सा परानुरक्तिरीश्वरे”[8] इति। अत्र कदाचित् स्मरणकीर्तनं किं वा आराध्यत्वेन ईश्वरज्ञानं भक्तिरिति न वक्तव्यम्। भगवन्महिमादि–ज्ञानादनु जायमानत्वादनुरक्तिरिति सार्थक–नामधेयम्। सर्वमेतत् पातञ्जलसूत्र–समर्थनेन श्रीस्वप्नेश्वराचार्येण *शाण्डिल्यसूत्रभाष्ये* निगदितम्– विषयजन्य–प्रीतिरपि रागं विना न संभवतीति रागावश्यकत्वम्। तथा च पातञ्जलसूत्रम्– सुखानुशायी राग (पा. सू. २/१) इति। तस्यैव वक्ष्यमाण–लिङ्गेषु व्यापनाल्लाघवाश्च भक्तित्वम्। न तु क्वचित् स्मरणस्य क्वचित् कीर्तनादेः अननुगमात्। न च तज्ज्ञानस्य तत्त्वं द्वेषादिमत्स्वपि तत्प्रसङ्गात्। नापि आराध्यत्वेन ज्ञानं सा पूजा–नमस्काराद्याराधनास्वननुगमात्[9] इति। *परमसंहिता*वप्युच्यते, स्नेहपूर्वकं भगवत अनुध्यानमेव भक्तिः– स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते[10] इति। *श्रीमद्भागवते* विहिताविहिताभ्यां वा उभयाभ्यां श्रीहरौ चित्त–संयोजनं भक्तिरित्युक्तम्– केनाप्युपायेन मनः कृष्णे निवेशयेत्[11] इति। *मुक्ताफल*ग्रन्थोपरि हेमाद्रिकृत–टीकायां वोपदेवाचार्येणोक्तम्– उपायपूर्वकं भगवति मनः स्थिरीकरणं भक्तिः[12] इति। अतो विषय–संपर्करहित–स्थिरचित्तस्य श्रीभगवद्विषये संयोजनमेव भक्तिः। *विष्णुभागवतपुराणे* वारिधिमुद्दिश्य गङ्गास्रोत–धाराया अविच्छिन्ना गतिरिव भगवद्गुणग्राम–श्रवणमात्रेण परमपुरुषोत्तमे भेददर्शन–रहिता फलाभिसंधि–वर्जिता च मनसो निरवच्छिन्ना गतिः निर्गुण–भक्तियोगत्वेन प्रकीर्तिता–

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे॥ (वि. भा. पु. ३/२९/११–१२)

इति।

श्रीमच्छंकराचार्येण जीवात्मनि परमात्मनोऽनुसंधानं यद्वा जीवस्य स्वरूपोपलब्धेः प्रयास एव भक्तिरित्यभिहितम्–

स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते।
स्वात्मतत्त्वानुसंधानं भक्तिरित्यपरे जगुः॥ (वि. चू. ३२) इति।

श्रीरामानुजाचार्य–मतेन ध्रुवानुस्मृतिरेव भक्तिः– ध्रुवानुस्मृतिरेव भक्ति–शब्देनाभिधीयते[13] इति। ध्रुवानुस्मृतिश्चैव तैलधारावदविच्छिन्न–स्मृतिसन्तानरूपः। तत्र भक्ति–शब्दस्य उपासना–पर्याये समावेशः क्रियते आचार्यपादेन। *पञ्चरात्रपरमसंहिताया*मुक्तं स्नेह–पूर्वकमविरत–ध्यानमेव भक्तिः– स्नेह–पूर्वमनुध्यानं भक्तिरित्यभिधीयते[14] इति। प्रेमोपासनरूपोभयार्थेऽपि भक्ति–शव्दस्य प्रयोगो *नारदपञ्चरात्रे* प्राप्यते। बलदेवविद्याभूषणकृत–*प्रमेयरत्नावली*ग्रन्थोद्धृत–*नारदपञ्चरात्र*वचने विष्णौ अनन्य–प्रेमसंगता भक्तिरित्येकस्मिन् स्थाने उक्तम्–

अनन्यमना विष्णौ ममता प्रेमसंगता।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः॥ इति।

पुनश्च सर्वेन्द्रिय–निचयेन श्रीविष्णोः सेवनं भक्तिरिति हि ग्रन्थस्यास्यान्यस्मिन् स्थाने निर्धारितम्–

सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्।
हृषीकेण हृषीकेशसेवनं भक्तिरुत्तमा॥ इति।

श्रीरूपगोस्वामिकृत– *भक्तिरसामृतसिन्धौ* अनुरूपोक्तिः समवेक्ष्यते। तत्र सर्वकामना–परित्याग–पूर्वकेन श्रीहरेः प्रीतिविधान–निमित्तानुष्ठित–क्रियाया भक्ति–पदवाच्यत्वं निरूपितम्–

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा॥ (भ. र. सि. १/११) इति।

*पञ्चरात्रोक्त*–'स्नेहपूर्वमनुध्यानम्' तथा *भक्तिरसामृतोक्त*–'आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा' इति वाक्यद्वयस्य एकवृत्ति–बोधकत्वादुभयत्रैव सर्वकामना–परित्याग–पूर्वकेन श्रीहरौ प्रीतिविधानं भक्तिः इत्यर्थोऽवगम्यते। एतत्तु शाण्डिल्योक्तस्य 'परानुरक्तेः' तथा 'अनिर्वचनीय–प्रेमस्वरूपस्य' नामान्तरमात्रम्। यतोऽनुरक्ति–व्यतिरेकेन प्रीतिविधानचेष्टा असंभवा। अतो मतद्वयस्य नास्ति कोऽपि विरोधावकाशः।

श्रीमन्मधुसूदनसरस्वतीपाद–मतेन भगवद्गुणनाम–महिमादि–श्रवणात् द्रवीभूतचेतसः परमेश्वरे या प्रत्ययान्तरानन्तरिता समानाकारा वृत्तिः सा भक्तिरित्युच्यते–

द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते॥ (भ. र. १/३) इति।

पूर्वोक्तरीत्या जायमाना भावान्तरैरविचाल्या भगवदाकारताया भक्तिपद–वाच्यत्वमाचार्यपादाभिप्रेतम्–

द्रुते चित्ते प्रविष्टा या गोविन्दाकारता स्थिरा।
सा भक्तिरित्यभिहिता॥ (तदेव २/१) इति।

## ४.३. भक्त्या रसत्वनिरूपणम्

साहित्य–साधनयोर्मध्ये भेदभावो नाङ्गीक्रियते वैष्णवाचार्यैः। साहित्यसाधनया सह भगवत्साधनाया ऐकात्म्यं तैरभिप्रेतम्। शृङ्गार–करुणादिरसैः पाठकहृदये अलौकिकाह्लादं समुपजायते। केवलं भक्त्या एव एतादृशोन्नतावस्थायां समुन्नीताभावात्तस्या भावमात्रमेव

स्वीकार्यं न तु रसत्वमिति हि मम्मटाचार्य–विश्वनाथाद्युत्तर–ध्वनिकालीन–साहित्यमीमांसकानामभिमतम्। भक्तिरसविरुद्धालंकारिकानां मतखण्डन–पुरःसरं भक्त्या रसत्वमुत्कर्षत्वं च प्रतिष्ठितं मधुसूदनसरस्वती–पादेन।

आस्वाद्यत्वाद्रसेति सार्थक–नामधेयं वर्तते। *नाट्यशास्त्रे* भरतमुनिना निर्दिश्यते– रस इति कः पदार्थः? उच्यते– आस्वाद्यमानत्वात्[15] इति। *तैत्तिरीयोपनिषदि*– रस वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति[16] इत्यत्रापि ब्रह्मणो रसरूपत्वं तदवाप्तौ चानन्दोपलब्धिर्वर्ण्यते। रसरूप–श्रीभगवत आनन्दमयी सत्ता भक्तजनैः कथं नास्वाद्यते? रम्य–रचनस्यास्वादन–काले काव्यार्थस्योद्बोधेन सहृदयचित्तं समुपवर्णितविषयेन सह तन्मयतां लेभे। तदा परिमितव्यक्तित्व–बोधस्यावसानेन रत्यादिभाव–संस्पर्शेन चानुरञ्जित–सहृदयचित्ते स्वसंविदानन्दस्य चर्वणादलौकिक–सुखानुभूतिः समुद्भवति। एवंप्रकारेण भक्तस्यापि प्रेमाभिभूत–चेतसा आनन्दस्वरूप–श्रीभगवन्माधुर्यास्वादनकाले व्यक्तित्वभाव–शैथिल्यात् सत्त्व–गुणाधिक्यात् भक्तचित्तमपार्थिवानन्द–धारायां निमज्जति। आनन्दसंमिश्र–भगवत्प्रीत्या आस्वाद एव भक्तिरसः। विभावानुभाव–व्यभिचारि–संयोगेनाभिव्यक्तः स्थायिभाव एव रसतामाप्नोतीति रसविदां सिद्धान्तः। उक्तं च भरताचार्येण– विभावानुभाव–व्यभिचारि–संयोगाद्रस–निष्पत्तिः[17] इति।

विभावानुभाव–व्यभिचारि–संयोगेनाभिव्यक्तः स्थायिभाव एव परमानन्द–साक्षात्कार–रूपेण रसतां प्राप्नोतीत्यपि श्रीमन्मधुसूदन–पादाचार्यमतम्। अतो भक्तेरपि रसत्व–निरूपणार्थं स्थायिभावो निरूपणीयः। स्थायिभावस्य रसत्वोपपत्तये परमानन्द–रूपतामुपपादयता आचार्य–पादेनाकुतम्–

भगवान् परमानन्दस्वरूपः स्वयमेव हि।
मनोगतस्तदाकाररसतामेति पुष्कलम्॥ (भ. र. १/१०) इति।

परमानन्द–स्वरूपः परमात्मा साक्षादेव मनसि प्रतिबिम्बितः स्थायिभावत्वं प्राप्तः सन् पूर्णं यथा स्यात्तथा प्रतिबिम्बित–रूपेण रसरूपत्वं प्राप्नोतीत्यर्थोऽत्रावगम्यते। बिम्बमेवात्र उपाधि–निष्ठत्वेन प्रतीयमानात् प्रतिबिम्बमित्युच्यते। एतेन परमानन्दश्च भगवान् मनसि प्रतिबिम्बितः स्थायिभावतामासाद्य रसतामापादयतीत्युक्ता भक्तिरसस्य परमानन्द–रूपत्वमपि निरूपितमेव।

श्रीमन्मधुसूदनसरस्वतीपाद–मतेन मानवचित्तं लाक्षाद्रव्यवत् काठिन्य–स्वभावमेव। काम–क्रोधादि–तापकद्रव्य–संस्पर्शेन शिथिलचित्ते तत्तद्विषयाकार–ग्रहणयोग्यता जायते–

चित्तद्रव्यं हि जतुवत् स्वभावात् कठिनात्मकम्।
तापकैर्विषयैर्योगे द्रवत्वं प्रतिपद्यते।। (भ. र. १/४) इति।

चित्तस्य विषयाकारता स्थायिभाव–रूपेणाभिधीयते। चित्तस्य विषयाकारतारूप–स्थायिभावः परमा–नन्दरूपेण स्फुटतरः सन् विभावादिभिरास्वादन–योग्यतामापन्नः रसनामको भवति। तथा चोच्यते–

स्थायिभावगिरातोऽसौ वस्त्वाकारोऽभिधीयते।
व्यक्तश्च रसतामेति परानन्दतया पुनः।। (तदेव– १/९) इति।

परमतार्किकोऽद्वैतवादी मधुसूदनसरस्वती स्वजीविते श्रीहरिं भेजे। तस्मादाचार्यपादो वैष्णवालंकारिक–संमतानां श्रीकृष्णविषयिण्याः रतिसंभूतायाः भक्तिरसस्य प्राधान्यं स्वीचकार। तन्मतेन, काम–क्रोध–भय–स्नेह–हर्ष–शोकादिरूप–चित्तद्रावकादन्तरेण चित्तस्य द्रवीभावो न विद्यते। अतः चित्तद्रुति–सामान्यस्य भक्तिरसं प्रति स्थायिभावत्वं नास्ति। धर्मोत्साहः, दयोत्साहः, त्रिविधा जुगुप्सा, शमः– एते षडपि स्थायिभावाः भगवन्तमधिकृत्य न प्रवर्तते। तेन धर्मानुरोधी वीररसः, दयानुबन्धी वीररसः, जुगुप्सात्रयानुगतो वीभत्सरसः, शमनिबन्धनः शान्तः– एतेषां भगवद्भिन्नालम्बनत्वाद् रसान्तर–विषये स्थायित्वं भजमाना अपि भक्तिरसं प्रति स्थायिभावत्वाभावाद् भक्तिरसतां न प्राप्नुवन्ति। उक्तं चाचार्येण–

धर्मोत्साहो दयोत्साहो जुगुप्सा त्रिविधा शमः।

षडप्येते न विषया भगवद्विषया न हि॥

धर्मवीरो दयावीरो वीभत्सः शान्त इत्यमी।

अतो न भक्तिरसतां यान्ति भिन्नास्पदत्वतः॥ (तदेव– २/२७–२८) इति।

पुनश्च, यदा खलु केवलं ईर्षावशाद् द्वेषः स्फुरति तदा रसान्तरेणासंकीर्णः शुद्धरौद्ररसः प्रादुर्भवति, यदा भयजो द्वेषः प्रकाशते तदा भयानको नाम रसाविर्भवति, यदा तु ईर्षा–भय–संकीर्णो द्वेष उपजायते तदा तु रौद्र–भयानक–रूपो रस आविर्भवति। भगवन्तमधिकृत्य प्रवृत्तावपि भक्तैस्तादृशो रसो नास्वादनीयः, चित्तद्रुति–प्रतिबन्धकत्वात् प्रीतिव्याघातकत्वादेवेति ह्याचार्यपादाभिमतम्–

ईर्षाज–भयजद्वेषौ भगवद्विषयावपि।

न भक्तिरसतां यातः साक्षाद् द्रुतिविरोधतः॥

शुद्धो रौद्ररसस्तत्र तथा रौद्रभयानकः।

नास्वाद्यः सुधिया प्रीति–विरोधेन मनागपि॥ (तदेव– २/६५–६६) इति।

क्षीरनीरयोः संमिश्रणे सति यथा रसविशेष–प्रतीतावपि पृथक्तया निर्देष्टुं न शक्यते, तथा रतिशोकादीनां मिश्रणेऽपि कोऽप्यनिर्वचनीयो रसोऽभिव्यज्यते। पूर्वोक्ताः भावाः भगवद्विषयकतया प्रवृत्तौ तु केवलं भक्तिरसत्वमुपजायत इति हि विशेषः। सर्वमेतद् *भक्तिरसायने* विधृतम्–

व्यामिश्रभावरूपत्वं यान्त्येते क्षीरनीरवत्।

विभावादिसमायोगे तथा भक्तिरसा अपि॥ (तदेव– २/६८) इति।

अत्रेदमवधेयम्, शृङ्गाराद्याः शान्तावसाना नवैव रसाः सर्वैरालंकारिकैः सुप्रसिद्धाः व्यवस्थापिताश्च। भक्तिरसोऽपि शान्तरसे निवेशयतीति हि तेषां मतम्। केचिच्च नैतदनुमन्यन्ते। तेषां मते, नवाधिकः कश्चिद्रसो भगवद्विषयक–शुद्धरतेः स्थायिभावत्वे अभिव्यज्यते, स एव भक्तिरसतया ख्यातिमुपगच्छति। परं रसान्तरीय–विभावानुभावसंचारि–भावानां संबन्धशून्यत्वे

तु भगवत्स्वरूपावगाहिनी रतिः जन्मसिद्ध–सनकादीनां रतिरिव प्रसिद्ध–नवरसाधिक–रसभावः प्राप्नोतीत्येव ह्याचार्यमतम्–

रसान्तरविभावादिराहित्ये तु स्वरूपभाक्।
दशमीमेति रसतां सनकादेरिवाधिकाम्॥ (तदेव– २/७४) इति।

पुनश्च भगवद्विषयाया रतेः रसानर्हत्वशङ्कां वारयता आचार्यपादेनोक्तं देवपित्राद्यालम्बना रतिस्तथा च बलवत्तरः संचारिभावो भावनाम्ना कथितः, न तु रसपदवाच्य इति रसज्ञैः पण्डितैर्यत् सिद्धान्तितं तज्जीवान्तर्गतत्वात् परमानन्द–प्रकटनासामर्थ्याद् हेतोः भगवद्भिन्नेषु देवेषु संगमनीयं परमानन्दघने श्रीकृष्णे न योजनीयमिति। प्रोक्तं च तेन–

रतिर्देवादिविषया व्यभिचारी तथोर्जितः।
भावः प्रोक्तो रसो नेति यदुक्तं रसकोविदैः॥

देवान्तरेषु जीवत्वात् परानन्दाप्रकाशनात्।
तद्योज्यं परमानन्दरूपे न परमात्मनि ॥ (तदेव २/७५–७६) इति।

ग्रन्थस्यास्य अन्यत्राप्युक्तमाचार्येण क्रोध–शोकादयो हि भावाः स्वभावादेव सुख–प्रतिकुलाः। तेष्वपि सुखरूपत्वानन्दानुभूतिमात्र–दर्शनबलाद् यदि रसत्वमङ्गीक्रियते तदा परमानन्दतया *रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति* (तै. उ.– २/७) इत्यादि–शास्त्रप्रतिपादिते विद्वद्भिरनुभूयमाने च भगवति जायमानायाः रतेरपि रसरूपत्वं कथं नाङ्गीक्रियतामिति सुधीभिरेव विचारणीयम्। आचार्यपादेनोक्तम्–

क्रोधशोकभयादीनां साक्षात् सुखविरोधिनाम्।
रसत्वमभ्युपगतं तथानुभवमात्रतः॥

इहानुभवसिद्धोऽपि सहस्रगुणितो रसः।
जडेनेव त्वया कस्मादकस्मादपलप्यते॥ (तदेव २/७९–८०) इति।

एवंप्रकारेण भक्तिरस–विरुद्धालंकारिकानां मतखण्डनेन न हि केवलं भक्त्या रसत्वमपि च तस्या उत्कर्षत्वं प्रतिष्ठितमाचार्यपादेन। तन्मतेन, कान्तादि–विषये प्रवृत्ता रस–भाव–तदाभासादयस्तत्र पूर्णानन्द–संपर्कशून्यत्वाद् हेतोः पूर्णानन्द–पुष्टिर्नोपजायते। अतः कान्तादि–विषयकेभ्यः तांस्तान् क्षुद्र–रसानपेक्ष्य भगवद्विषया रतिः परिपूर्णरसा। अत एव आनन्दभूयिष्ठत्वाद् भगवद्विषयायाः रतेर्मुख्य–रसत्वमुपपन्नम्। प्रसङ्गेऽस्मिन् उक्तं चाचार्येण–

कान्तादिविषया वा ये रसाद्यास्तत्र नेदृशम्।
रसत्वं पुष्यते पूर्णसुखास्पर्शित्वकारणात्॥

परिपूर्णरसा क्षुद्ररसेभ्यो भगवद्रतिः।
खद्योतेभ्य इवादित्यप्रभेव बलवत्तरा॥ (तदेव २/७७–७८) इति।

ग्रन्थकृन्मतेन, आत्मा हि परमानन्दघन–रूपतया *रसो वै सः* (तै. उ.– २/७) इत्यादिश्रुत्या रसरूपतया प्रसिद्धः। सा चात्मनो रसरूपता स्वाविद्ययावृतत्वात् नानुक्षणमनुभव–गोचरतामापद्यते। यदा तु पुण्यपरिपाक–वशाद् विभावादि–त्रितयावगाहि समूहालम्बनात्मकं सात्त्विकं ज्ञानमुत्पद्यते, तेन चावरणमपनीयते, तदा खलु नित्यसिद्धमेवात्मीयं सुखमभिव्यज्यते, व्यक्तीभूतं तत् स्वात्म–स्वरूपमेव सुखं रसनाम्ना व्यपदिश्यते। ग्रन्थकृतामेतादृश–सुस्पष्ट–वक्तव्येन भक्त्या रसत्वविषये संशयकणिकापि न वर्तत इति मन्ये।

## ४.४. भक्तिरसस्यालौकिकत्वनिरूपणम्

स्थायिभावस्यापार्थिवत्वे रसस्याप्यलौकिकत्वं विज्ञेयम्। तेनाप्राकृत–भक्तिरसस्य स्थायिभावो भगवद्रतेरप्राकृतत्वालौकिकत्व–विषये च नास्ति संशीतिलेशः। अप्राकृततत्त्वमिदं भक्तिभावस्यानन्य–वैशिष्ट्यम्। एतस्माद् हेतोः भक्तिरसस्य दिव्यरस इति नामान्तरमपि विद्यते। वैष्णव–रसशास्त्रे भक्तिरसस्यालौकिकत्वं भक्तिरसेन सहेतर–शृङ्गारादि–रसानां प्रभेदादनुमीयते।

अत्रेदमवधेयम्, भगवद्विषयस्य भक्तिरसस्य परमानन्द–रूपत्वेऽपि निरानन्द–कान्तादि–विषयाणां शृङ्गारादि–रसानां परमानन्द–रूपत्वं नास्तीति न वक्तव्यम्। यतो मायाया आवरण–विक्षेप–नामकं शक्ति–द्वयमस्ति; तत्रावरणशक्तिः ब्रह्मणः सुखचिन्मय–रूपमावृणोति, विक्षेप–शक्तिस्तु निर्विकारे ब्रह्मणि विकार–भेदानुद्भावयति। तदनन्तरं सतोऽपि सुखचिद्घनस्य भानेऽपि अभानमिव भवति। तेन कार्यरूपेण भेदभाने सत्यपि कान्तादि–विषये अपि चिदानन्द–मूर्त्तिः जगत्कारणं ब्रह्म स्वरूपतो मायया आवृतमस्ति, अतस्तद्भानमपि भवति। तदुक्तमाचार्येण–

कान्तादिविषयेऽप्यस्ति कारणं सुखचिद्घनम्।
कार्याकारतया भेदेऽप्यावृतं मायया स्वतः॥ (तदेव १/११) इति।

विषयोऽयं *श्रीमद्भागवतपुराणे* अकार्यस्यापि कार्याकारेण भानं विक्षेपः, अखण्डानन्दाकारेण स्वतोऽभानमावरणमित्युक्त्वा तमाभासयोरुदाहरण–मुखेन स्पष्टीक्रियते–

ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः॥ (भा. पु. २/९/३३) इति।

मायावरण–तिरोधानेन ब्रह्मणो ज्ञातत्वात् कान्तादि–विषयावच्छिन्न–चैतन्नं मनसि स्थायिभावत्वं प्रकाशमानतां याति। एतद्विषय–चैतन्यमेव रसरूपेण प्रकाशते। तेन जड–संपर्कात्तस्य भक्त्यपेक्षया अल्पत्वम्, भक्तेस्तु पूर्णत्वमिति वक्तव्यम्। अतो लौकिक–रसानुपेक्ष्य भक्तिरसस्य सेव्यत्वमनायासेनैव प्रतीयते। सर्वमेतद् *भक्तिरसायन*टीकायामाचार्येण विशदीकृतम्– विषयावच्छिन्न–चैतन्यमेव द्रवावस्थ–मनोवृत्त्यारूढतया भावत्वं प्राप्य रसतां प्राप्नोतीति न लौकिक–रसस्यापि परमानन्द–रूपतानुपपत्तिः। अत एव अनवच्छिन्न–चिदानन्दघनस्य भगवतः स्फुरणाद्भक्तिरसे अत्यन्ताधिक्यमानन्दस्य; लौकिकरसे तु विषयावच्छिन्नस्यैव चिदानन्दांशस्य स्फुरणात्तत्रानन्दस्य न्यूनतैव। तस्माद्भक्तिरस एव लौकिक–रसानुपेक्ष्य सेव्य इत्यर्थः। (भ. र. टी. १/१३).

भगवद्भक्तेः रसरूपतया पुमर्थतामलौकिकतां च निरूपयता आचार्यपादेनोक्तं भगवद्गुण-नामादीनां श्रवणात् सत्त्वोद्रेकाद् द्रवीभूतस्य चेतसः परमेश्वरे प्रत्ययान्तर-परिहारेण तैलधारावदविच्छिन्न-प्रवृत्ता मनोवृत्तिः भक्तिरिति कथ्यते। अत उच्यते-

द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते॥ (भ. र. १/३) इति।

आश्रयभेद-वशाद् लौकिकप्रीत्या भगवत्प्रीतिः विलक्षणमित्यवधारणीयम्। पार्थिव-विषयत्वाल्लौकिक-प्रीतिः बहिःसंचारिणी, चञ्चलस्वभावा। परं भागवतीप्रीत्या आश्रयालम्बनस्यान्तर्लोक-विहारित्वात् कालातीतत्वाच्च तस्यान्तर्मुखित्वं स्थिरत्वमचञ्चल-स्वभावत्वं च विज्ञेयम्। भगवत्प्रीतिः परमेश्वरेण साकं तादात्म्योपलब्धेः नामान्तर-मात्रमिति वक्तव्यम्। इयं भगवदाकारतारूपान्तरवृत्तिः भक्तिरसे परिणमते- तथा च द्रुते चित्ते जायमाना भगवदाकारता यदि स्थिरा भवेत्, तदैव सा भक्तिरसतया परिणमते, नान्यथा (भ. र. टी. २/२) इति। द्रुतचित्ते भगवदाकारतायाः क्षणस्थायित्वे भक्तिभावत्वं नोपजायते तद् ह्याचार्यपादेन 'यदि स्थिरा भवेद्' इति वक्तव्येन स्पष्टीकृतम्।

द्रुते चित्ते प्रविष्ट-वस्त्वाकार-प्रकृत्यनुसारेण स्थायिभावस्य लौकिकत्वम् अलौकिकत्वमपि ज्ञेयम्। विषयस्य लौकिकत्वे स्थायिभावस्य लौकिकत्वम् अलौकिकत्वेऽपि तस्यालौकिकत्वम्। भक्तचित्ते परमानन्दघन-श्रीभगवद्रूप-स्थायिभावस्य प्रतिबिम्बितत्वाद् भक्तिरसस्य लोकोत्तरत्वं निर्विवादम्। आचार्यपादेन सम्यक्तयोक्तम्-

भगवान् परमानन्दस्वरूपः स्वयमेव हि।
मनोगतस्तदाकाररसतामेति पुष्कलम्॥ (भ. र. १/१०) इति।

एवं भक्तिरसस्यालौकिकत्वं श्रीमन्मधुसूदनसरस्वती-पादेन सुयुक्तिद्वारेण व्यवस्थापितमिति निश्चप्रचम्।

## ४.५. भक्तिमार्गस्याभ्युदयस्तथा क्रमधारा

भक्त्या भगवल्लाभः संभवतीति कवीनां काव्येषु दार्शनिकानां दर्शन–तत्त्वेष्वूद्धोष्यते। युगान्तरे विविध–शास्त्राणां दर्शनानां च प्रकृष्टभावेन भक्तिः स्थूलोपासन–पद्धत्याः क्रमेण प्रीतिरूपान्तर–वृत्तित्वं तथा रस–पदवाच्यत्वं लेभे। भक्तिमार्गस्याविर्भावः कदा अभवदिति विषयः संदेहातीत–रूपेण न ज्ञायते। भक्तिमार्गस्य मूलं पुराणकाल–कुज्झटिकायां निगूढं वर्तते। *ऋग्वेद*गतानि स्तव–स्तोत्राणि, *उपनिषद्*गतान्युपासनानि *भागवत*धर्मस्य च प्रगाढा परमेश्वरभक्तिः गीतारचयितरि सर्वेषामेतेषां प्रभावो देदीप्यते। भक्तिमार्गस्योन्मेष–विषये ख्रिष्टधर्मस्य प्रकृष्ट–भावोऽस्तीति कैश्चित् मन्यन्ते। आर्षकाव्य*महाभारत*स्य शान्तिपर्वान्तर्गतस्य श्वेतद्वीप–वृत्तान्तेन प्राचीन–भारतवर्षेण सह प्रतीच्य–देशस्य संबन्धोऽनुमीयते। संबन्धवशाच्चायं प्रतीच्यधर्मस्य महद्भावेन प्राच्यभारतवर्षे भक्तिवादस्याभ्युदय इति हि तेषां मतम्। अभिमतमिदं प्राच्य–प्रतीच्योभय–परिसराणां पण्डितैः नाङ्गीक्रियते। तत्र वार्थ(Barth)-महोदयैः नामधेय–पाश्चात्यपण्डितैः भक्तिवादस्याभ्युदये ख्रिष्टधर्मस्य प्रकृष्टभावमनङ्गीकृत्याह–

The Bhakti is applicable as a native fact which was quite capable of realizing itself in India as it has done elsewhere in its own time & independently of all Christian influence. (*Religions of India*, pp 221).

दीनेशचन्द्रसर्वकारेण मन्यते, भक्तिवादे अनार्यधर्मस्य प्रकृष्टभावोऽस्ति। यतः ऋषयः यागानुष्ठानेन देवानां सन्तुष्टिविधानविषये कृतप्रयत्ना अभवन्निति दृश्यते न तु भक्त्या। तन्मतेन–

The Vedic Aryans tried to please Viṣṇu and other gods by means of sacrifice, but this sacrificial religion was fundamentally different from the later religion characterized by Bhakti(devotion of a faithful to God) and Prasāda(God's grace to the faithful). We have reason to believe that the conception of devotion and grace was borrowed from non-Aryan religious thought. [*Early History of Vaiṣṇavism in Cultural Heritage of India*, Vol. IV, pp 111]

ख्रिस्टस्याविर्भावात् प्राक् भारतवर्षे भक्तिवादस्य प्रचलनमभूदित्येतत् पाणिनेः 'वासुदेवार्जुनाभ्यां वुन्' सूत्रादनुमीयते। सूत्रेणानेन वासुदेवं प्रति भक्तिः यस्यास्ति इत्यर्थे 'वासुदेवक'पदस्य तथा अर्जुनं प्रति भक्तिः यस्यास्ति इत्यर्थे 'अर्जुनक'पदस्योत्पत्तिः।

भगवत्प्रीत्यर्थे भक्ति–शब्दस्याप्रयोगादपि *ऋग्वेदा*न्तर्गत–मन्त्राणां भक्तिवाद–मूलत्वमस्तीति केषांचिन्मतम्। अग्नि–वरुणादि–देवतानामुद्दिश्य स्तुतमन्त्रेषु मानवैः सह देवानां प्रीतिरूपसंपर्को ध्वनितः। संबन्धश्चायं भक्तितत्त्वस्य मूलमेव। अग्निदेव उपासक–सकाशे पुत्ररूपेण– 'त्वं पुत्रो भवसि यस्तेऽविधत्' (ऋ. सं. २/१/९) किं वा पितृरूपेण ईप्सितं वस्तु प्रददाति– 'स नः पितेव सूनवेऽग्ने सूपायनो भव' (ऋ. सं. १/१/९)। इन्द्रस्तूपासकगृहे सोमरस–पानार्थमागच्छति– 'असौ य एषि वीरक गृहं गृहं विचाकसत् / इमं जम्भसुतं पिव धानावन्तं करम्भिनं अपुपवन्तमुक्थिनम्' (ऋ. सं. ८/९१/२) ; उपासक–सखा इन्द्रदेवः सख्युरभिप्रेतविषयपरिपूरणार्थमश्वादिरूपं धारयति– 'दुणाशं सख्यं तव गौरसि वीर गव्यते अश्वोऽश्वायते भव' (ऋ. सं. ६/४५/२६)। वायुर्देवतापि उपासक–सविधे पिता उत वा भ्रातारूपेण प्रतिभाति– 'उत वात पितासि न उत भ्रातोत नः सखा' (ऋ. सं. १०/१८६/२)। एवं विविध–मन्त्रैः देवतया सहोपासकस्य यः प्रीतिरूप–संपर्को ध्वनितः, भगवद्भक्ति–मूलानुग–ग्रन्थवर्णित–प्रेमसंपर्कात् स न पृथग्विधः। ऋङ्मन्त्रैः भक्तिवादस्य पुष्टिः जाता इति वक्तव्या। तेन भक्तिवादस्योन्मेषे अभारतीय–तत्त्वस्य प्रकृष्टभावो नाङ्गीकर्तव्य इति हि तेषामभिमतम्।

*उपनिषदि* ज्ञानमार्गस्य प्राधान्यादपि भक्तिवादो नोपेक्षितः। भक्तिवादस्याभ्युदये उपनिषदान्तर्गतमुपासना–काण्डस्य मूलीभूत–कारणत्वमस्तीति हि केषांचिन्मतम्। भाण्डारकर–महोदयैरपि मन्यते–

There is to be observed here one special characteristic of the Bhakti School, and that is that all the devotees meet together, enlighten each other as to the nature of God, and contribute by discourses on him to each others elevation and gratification. This is almost a characteristic mark of Bhaktas as distinguished from the Yogin, Who have to go through

their exercises singly and in solitude. [*Vaiṣṇavism, śaivism and minor religious systems*, pp 28]

*श्वेताश्वतरोपनिषद्ये*व 'भक्ति'शब्दस्य प्रयोगः प्रथममुपलभ्यते– 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' (श्वे. उ. ६/२३) इति। अत्र सेवारूपार्थे भक्ति–शब्दस्य प्रयोगः। भगवत्प्राप्तेः साधनरूपेण भक्तेरुल्लेखः *कैवल्योपनिषदि* तथा *गोपालतापनीयोपनिषद्यु*पलभ्यते। *मुण्डकोपनिषदि* भगवत्प्रसाद–महिमा कीर्त्यते–

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन।

यमवैष वृणुते तेन लभ्यस्तस्यैवात्मा विवृणुते तनुं स्वाम्॥ (मु. उ. ३/२/३) इति।

*श्वेताश्वतरोपनिषद्यपि* अनुरूपोक्तिः समवेक्ष्यते–

तमक्रतुं पश्यति वीतशोको धातुः प्रसादान् महिमानमात्मानम्। (श्वे. उ. ३/२०) इति।

भक्तिमार्गस्य क्रमधारायामार्षकाव्य–*महाभारतस्य* शान्तिपर्वणि तथा अनुशासनपर्वणि भक्ति–तत्त्वमालोचितमिति संलक्ष्यते। तत्रानुशासनपर्वणि हरस्तुति–संपादनादनन्तरम् अम्बायाः स्तुतिरियं स्मरणपथमवतरति–

मा वाहनीश्वर भक्तो भवानि भवनेऽपि शत्रुस्य।

वाय्वम्बुभजोऽपि सतो नरस्य दुःखक्षयः कुतस्तस्य।

भवति हि सुरासुरगुरौ यस्य न विश्वेश्वरे भक्तिः॥

अलमन्याभिस्तेषां कथाभिरप्यन्यधर्मयुक्ताभिः।

येषां न क्षणमपि रुचितो हरचरणस्मरणविच्छेदः।

हरचरणनिरतमतिना भवितव्यमनार्जवं युगं प्राप्य ।

संसारभयं न भवति हरभक्तिरसायनं पीत्वा॥ (अनुशासनपर्वणि–१४/१८२–१८४) इति।

अत्र संसार–भयातिक्रमणं हरभक्त्या संभवतीति प्रतिपादितम्। *महाभारते* भक्त एव ग्रहीता देवता च दाता। भक्तस्य भक्त्या प्रीतिमापन्नः देवता वरप्रदातुमिच्छति–

अनया चैव भक्त्या ते अत्यर्थं प्रीतिमानहम्।

तस्मात् सर्वान् ददान्यद्य कामांस्तव यथेप्सितान्॥ (तत्रैव– १४/२४०) इति।

*भागवते* ईश्वर–सान्निध्यमेव भक्तस्याभिप्रेतम्, *महाभारते* तु मोक्षलाभः–

कामार्थी वरयामि संयतमना मोक्षाय सद्य शिवम्। (तत्रैव– १४/२२९) इति।

अनुशासनपर्वान्तर्गत–दानधर्म–पर्वांशस्य ऊनपञ्चाशोत्तर–शतसंख्यकाध्याये वैशद्येन भगवद्भक्तेः फलं निर्दिश्यते–

इतीदं कीर्तनीयस्य केशवस्य महात्मनः।

नाम्ना सहस्रं दिव्यानामशेषेण प्रकीर्तितम्॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत्।

नाशुभं प्राप्नुयात् किंचित् सोऽमुत्रेह च मानवः॥

वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत्।

वैश्यो धनसमृद्धः स्याच्छुद्रः सुखमवाप्नुयात्॥ (तत्रैव– १४९/१२१–१२३)

...

वासुदेवाश्रेयो मर्त्यो वासुदेवपरायणः।

सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम्॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित्।

जन्ममृत्युजराव्याधिभयं नैवोपजायते॥ (तत्रैव– १४९/१३०–१३१)

इति।

*महाभारते* ईश्वरप्राप्तेः मार्गरूपेण भक्तिः निर्दिष्टा तथापि ज्ञानस्याङ्ग–स्वरूपेनापि सा निर्दिश्यते। प्रोक्तं च टीकाकारेण नीलकण्ठेन– तथा च ज्ञानस्यैव प्राकरणिकत्वात् तत्प्रकरणे पठिता भक्तिस्तदङ्गभावं भजत इति भावः। तथा चोक्तं भगवता, 'भक्त्या मामभिजानाती'ति। श्रुतिरपि 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ / तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' इति भक्तेर्ज्ञानाङ्गत्वं दर्शयति[18] इति।

*श्रीमद्भगवद्गीताया*ं भक्तितत्त्वं चरमप्रकर्षतां लेभे। भगवत्प्राप्त्यर्थं तत्र कर्म–भक्ति–ज्ञानरूप–मार्गत्रयं निर्देशितम्। मार्गत्रयमध्ये भक्तिमार्गस्य प्राधान्यमङ्गीक्रियते गीतायाम्। भक्त्या माहात्म्यं तत्र बहुधा गीयते–

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।

श्रद्धावान् भजते यो मां स मे युक्तमो मतः॥ (श्री. म. गी. ६/४७)

इति।

किं वा–

पत्रं पुष्पं फलं तोयं यो मां भक्त्या प्रयच्छति।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ (श्री. म. गी. ९/२६) इति।

गीतायां भक्तभगवतोः प्रेमरूप–संबन्धोऽभिप्रेतः। तस्माद् भक्तो भगवदैश्वर्येन अभिभूतः सन् भगवतः प्रेममयरूपं द्रष्टुमिच्छति। विश्वरूप–दर्शनकाले विमोहित–चित्तस्यार्जुनस्य एकाग्र–प्रार्थनमत्र स्मरणीयम्–

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे।

तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास॥ (श्री. म. गी. ११/४५) इति।

रसरूपत्वमेव भगवतो यथार्थ–स्वरूपम्। ज्ञानेन भगवतो भगवत्तामेव ज्ञायते न तु रसरूपत्वम्। रसरूपतेयम् अविमिश्रा परमशुद्धा भक्त्या उद्धाट्यते–

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।

ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ (श्री. म. गी. १८/५५) इति।

गीतायां भक्त–भगवतोर्मध्ये प्रेमसंबन्ध–रूपा भक्तिरियं न हि केवलं सेवाभजनादिरूपा अपि तु सर्वकर्म–परित्याग–पूर्वकेन परमेश्वरे आत्मसमर्पण–रूपा। ऐकान्तिक–भावत्वमत्र प्राधान्येनाङ्गीक्रियते। उक्तं च श्रीभगवता–

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।

मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ (श्री. म. गी. १८/६५–६६) इति।

गीताया द्वादशाध्याये भक्तस्वरूपं वर्णयता श्रीभगवता स्पष्टतयोक्तम्–

अद्वेष्टा सर्वभूतानां मैत्रः करण एव च।

निर्ममो निरहंकारः समदुःखसुखः क्षमी॥ (श्री. म. गी. १२/१३) इति।

पुनश्च–

ये तु धर्मामृतमिदं यथोक्तं पर्युपासते।

श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥ (श्री. म. गी. १२/२०) इति।

भक्तिवादस्य क्रमधारायां पुराणानामपि प्रकृष्टभावः स्वीकरणीयः। वैदिकधर्म–प्राधान्यस्य क्रमह्रासमानत्वात् पुराणेषु मूर्तिपूजाया भगवद्भक्तेश्च मुख्यत्वं प्रतिष्ठितम्। उच्यते च राधाकृष्णन–महोदयैः–

In religion we find a clean departure from the Vedic worship consisting of prayer and sacrifice to image-worship and Bhakti. The ethics of Purāṇas is not different from the traditional one. (*Indian Philosophy*, Vol. II, pp 664).

*कूर्मपुराणस्य* ईश्वरगीतांशे सर्वकर्म–परित्याग–पूर्वकेन भगवद्भक्ति–परायणस्य भगवत्प्रियत्वं निरूपितम्–

सर्वारम्भपरित्यागी भक्तिमान् यः स मे प्रियः।[19] इति।

*ब्रह्मवैवर्तपुराणे* मोक्षप्राप्तेः साधनमात्र–रूपेण भक्तिमुद्घोष्य भक्त्या यागयज्ञादि–क्रियानुष्ठानानां तथा व्रताचरण–वर्णाश्रमधर्म–पालनादीनां फलं लभ्यत इति प्रतिपादितम्–

दृष्ट्वा कृष्णं नरो भक्त्या मोक्षमाप्नोति दुर्लभम्।[20] इति।

भक्तितत्त्वस्य साधनाङ्ग–स्वरूपं तथा रसस्वरूपं चेति स्वरूपद्वयं पुराणेषूपदिष्टम्। *पद्म–ब्रह्मवैवर्त–गरुडपुराणा*दौ भक्तिः भगवन्नाम–स्मरणं भजनं भगवन्तं प्रति नमस्कार–ध्यानादौ च पर्यवस्यति। तथा च *पाद्मे*–

गोविन्देति जपन् मन्त्रं कुत्रचिन् म्रियते यदि।
स नरो न यमं पश्येत्॥[21] इति।

उक्तं च *ब्रह्मवैवर्ते*–

भज सत्यं परं ब्रह्म राधेशं त्रिगुणात् परम्।
शीलायां प्रतिमायां वा श्रीकृष्णं राधया सह॥[22] इति।

कथ्यते च *गरुडपुराणे*–

एकः कृष्णे नमस्कारो मुक्त्या तांस्तारयिष्यति।[23] इति।

एतस्माद्भक्ति–तत्त्वस्य नीरस–साधनाङ्ग–स्वरूपादीश्वर–प्रीतिविधायिकान्तरवृत्तौ क्रमोन्नतिः अवगम्यते।

भक्तितत्त्वस्य क्रमधारा *श्रीमद्भागवतपुराणे* पूर्णतया स्फुरति। वैदिक–मन्त्रोपनिषदादौ भक्तितत्त्वस्य उप्तबीजं *महाभारत*–पुराणादौ अङ्कुरितो भूत्वा *श्रीमद्भागवत*स्यामृत–धारया पुष्प–पल्लवशोभिते महीरुहे पर्यवस्यति। साधनमार्ग–रूपेण गृहीत्वापि भागवते भक्तिरियं नवरूपतां लेभे। सर्वजनसाध्य–भक्तेर्न हि केवलं भगवत्स्मरण–कीर्तन–पादसेवनादि–रूपः परम् अनुरक्तिरूपार्थोऽपि भवितुमर्हति। प्राचीन–ग्रन्थादौ ईश्वर उपास्यो भक्तस्तूपासकः; भागवते उपास्यास्वतन्त्रो भक्तपराधीन ईश्वरोऽन्तरङ्ग–प्रियजनत्वेन भजते। भक्तैर्विना स्वसत्तामपि नोपलभ्यते–

नाहमात्मानमासते यद्भक्तैः साधुभिः विना।[24] इति।

परमेश्वरं पति–पुत्र–सख्यादीनामिव प्रीतिबन्धनेन तच्चरणारविन्दे चात्मानं समर्पणेन भगवल्लाभः संभवति। ईश्वर–प्राप्त्यर्थं संसार–त्यागपूर्वकं पर्वतारण्यादि–प्रदेशे प्रस्थानं निष्प्रयोजनमिति *भागवत*प्रतिपाद्यम्। एवं प्राचीनप्रोक्ता साधनाङ्ग–स्वरूपा भक्तिः अपत्यस्नेह–कान्ताप्रेम–बन्धुप्रीतिरूपादि–मानवीय–हृदयानुभूतौ परिणमति। प्रसङ्गेऽस्मिन् राधाकृष्णन–महोदयानामुक्तिरियं समुद्धरणीयम्–

In tha Bhāgavata Bhakti is a surging emotion which thrills the whole frame, chokes speech, and leads to trance. The Bhāgavata is indifferent to sacrificial observances and declares that we must love God for his own sake and not for any reward. It admits that union with God is open to any individual, if he cares fot it. He can obtain it through bhakti, but the soul who remains ever distinct from God he worships is happier than one who becomes absorbed in God. (*Indian Philosophy*, Vol. II, pp 706-707).

भक्तिवादस्य दृढप्रतिष्ठायां पञ्चरात्र–संप्रदायानां वैष्णवाचार्याणां च महदवदानं स्वीकरणीयम्। भक्तितत्त्वस्य प्रचारे प्रसारे च पञ्चरात्र–संप्रदायान्तर्गत–ग्रन्थानामुपयोगोऽनस्वीकार्यः। एकेनापि अह्ना देवोपासनेन मुक्तिर्भवतीति *अहिर्बुध्न्यसंहिता*यामुक्तम्–

यमाराध्यायत स्त्वेवाहमेकाहमपि नारद।

मुक्ति करे स्थिता सर्वे कामाश्च किं पुनः॥[25] इति।

ग्रन्थेऽस्मिन् शरणागति–तत्त्वं तदङ्गानि चोल्लिखितानि–

अहमस्म्यपराधानामालयोऽकिंचनोऽगतिः।

त्वमेवापायभूतो मे भवेति प्रार्थनामतिः।

शरणागतिरित्युक्ता...॥[26] इति।

*अहिर्वुध्न्यसंहितो*क्त–शरणागति–तत्त्वं परवर्तिनि काले श्रीरामानुजादि–वैष्णवाचार्यैः स्वीक्रियन्ते। *परमसंहिता*यां भक्ति–शब्दस्य स्नेहपूर्वकमनुध्यानम् अर्थादविच्छिन्न–चिन्ताप्रवाह–रूपोऽर्थो निश्चीयते। भक्ति–शब्दस्यायमर्थस्य गुरुत्वं रामानुज–दर्शने परिलक्षितम्। अष्टाङ्गा भक्तिः मोक्षोपायत्वेनोपदिष्टं ग्रन्थेऽस्मिन्–

अष्टाङ्गा भक्तिरुद्दिष्टा वैष्णवस्य विशेषतः।

यामवाप्य परां गतिमचिरेणाधिगच्छति॥[27] इति।

*बृहद्ब्रह्मसंहिता*यां राधा–कृष्णयोर्पूजनं तयोः पादयुग्मे शरणं च विहितम्–

राधाकृष्णौ तयोः पादाः शरणं स्यादिहाश्रयः।[28] इति।

'राधा'शब्दोच्चारणेन भक्तो भक्तिं मुक्तिं हरिपदं च प्राप्नोतीत्युक्त्वा श्रीराधार्चन–प्राधान्यं *नारदपञ्चरात्र्यां* संसूचितम्–

राशब्दोच्चारणाद् भक्तो भक्तिं मुक्तिं च राति स्म।

धाशब्दोच्चारणेनैव धावत्येव हरेः पदम्॥[29] इति।

ग्रन्थेऽस्मिन् परमेश्वरं भक्तप्राणत्वेन अभिहितम्–

भक्तप्राणो हि कृष्णश्च कृष्णप्राणो हि वैष्णवः।[30] इति।

भक्तानुग्रहार्थं स्वरूपादिशक्त्या ईश्वरो बहुधा रूपं धारयतीति *नारदपञ्चरात्रस्य* *सात्त्वतसंहिता*यामुक्तम्–

एक एव जगन्नाथः स्वरूपाद्यैस्तु शक्तिभिः।

नानात्वेनाप्यनन्तो यो भक्तानुग्रहकामया।

तस्याभिमानिकं रूपं शृणु सर्वेश्वरस्य तु॥ इति।

*सात्त्वतसंहिता*यां वैधीश्रेणीरूपो भक्तिवादः प्रचारितः। भक्तिरियं *भागवत*प्रोक्त–श्रीहरिं प्रति गोपीवृन्दस्य तत्परिकर–वृन्दस्य च निष्कलुष–प्रेमरूपा सर्वविकार–रहिता स्वतोत्सारिता प्रीतिमात्रत्वेन नोपयुज्यते। विविध–व्रताचरणादि–तपःनिष्ठा–क्रियानां समन्वयमूला चेयं भक्तिः। व्रताचरणादि–क्रियया शुद्धचित्तेन भक्तः परमेश्वरं प्राप्नोतीति ग्रन्थेऽस्मिन् विनिर्णीतम्–

निर्विघ्नेन व्रतं यस्मान्निष्पद्येतात्र कर्मिणाम्।

कर्मवाङ्मनसैः शुद्धस्तपोनिष्ठः क्रियापरः॥

यो नान्यदेवतायाजी तत्त्वतो भगवन्मयः।

कस्मिंश्चिद् वैभवे रूपे व्यूहीये वा सुबुद्धिमान्॥[31] इति।

भक्तिवादस्य सुदूरप्रसारे दक्षिण–भारतवर्षस्याल्वार–नामधेय–भक्त–संप्रदायस्य महद्भावः स्वीकरणीयः। आलवार–संप्रदायस्य शैवो वैष्णवश्चेति भेदद्वयमभूत्। तत्र वैष्णव–संप्रदायस्योपास्य–देवता एव वासुदेवः श्रीकृष्णः। वामपार्श्वस्थिता लक्ष्मीमूर्त्या सह भगवतो वासुदेवस्य स्तुतिः आल्वारैः क्रियते। तामिलभाषया विरचितो *द्राविडाम्नाय*ग्रन्थे द्वादश–संख्यकानामालवार–साधकानां नामानि उपलभ्यन्ते। *श्रीमद्भागवते* शान्त–दास्य–सख्य–वात्सल्य–मधुररूपा भक्तिः पञ्चधैव। वात्सल्य–मधुर–भेदेनाल्वार–साधकानां भक्तिस्तु द्विधा। तत्र वात्सल्यापेक्षया प्रीतिरूपा भक्तेः प्राधान्यं तेषां सङ्गीत–काव्येषूद्घोष्यते।

ईशवीये अष्टमशताब्द्याः शेषार्धे आचार्य–शंकरस्याविर्भावकालः स्वीक्रियते। शंकराचार्य–संमताद्वैतवादो भक्तिवादस्य परिपन्थीति निश्चप्रचम्। 'एकमेवाद्वितीयम्' अर्थाद् ब्रह्मभिन्नं

किंचिदपि नास्तीति ह्यद्वैतवेदान्त–दर्शनस्य मूल–प्रतिपाद्य–तत्त्वम्। प्रत्युतस्तु द्वैतवाद एव भक्तितत्त्वस्य मूलम्। भक्तो भगवांश्चेति द्वयमन्तरेण प्रीतिरूपा भक्तिर्न स्वीक्रियते। एतेन शंकराचार्य–प्रतिष्ठिताद्वैतवादेन भक्तिवादस्य मूलं शिथिलीकृतमिति स्पष्टम्। आचार्य–शंकरेण भक्तेरुपयोगित्वं सर्वथैवास्वीकृतमिति न वाच्यम्। यतः 'अपि संराधने प्रत्यक्षानुमानाभ्याम्'[32] इति *ब्रह्मसूत्रस्य* भाष्ये भगवता शंकरेण भक्त्या ध्यान–तुल्यमङ्गीकृत्य आकुतम्– संराधनं भक्ति–ध्यान–प्रणिधानाद्यनुष्ठानम् [33] इति। अत्र भक्तिमविद्याच्छन्न–जनस्याश्रययोग्य–रूपेणाभिधानाद् मोक्ष–साधनक्षेत्रे तस्या गौणत्वं निर्धारितमिति प्रतीयते। वस्तुतस्तु भक्त्यपेक्षया ज्ञानस्य प्राधान्यमाचार्यपादाभिप्रेतम्। शंकराचार्यस्यान्तेवासिनो भक्तिवादस्य विलुप्त्यर्थं सचेष्टोऽभवन्। परं त्वाचार्य–शंकरस्याविर्भावकालात् परवर्तिनि समये रामानुज–मध्व–वल्लभ–निम्बार्काचार्यानामाविर्भावैः भक्तिवादः पुनःप्रतिष्ठितः। व्याख्यानशैल्या महर्षि–वादरायणकृत–*ब्रह्मसूत्राणां* भक्तिवादस्याविरोधित्वं तैर्व्यवस्थापितम्। पूर्वोक्ताचार्यानां मतनिचयो यथाक्रमेण विशिष्टाद्वैत–द्वैत–शुद्धाद्वैत–द्वैताद्वैतवादरूपेण परिचीयते। भगवत्प्राप्तये भक्तिमार्गस्य श्रेष्ठत्वस्थापनं संप्रदाय–चतुष्टयस्य मूलोद्देश्यत्वेन भजते। तेनाद्वितीय–परमेश्वरस्य सगुणत्वं तेषामभिमतमासीत्। सगुणोपासनायाः तथा प्रतीकोपासनायाः पद्धति–प्रचार–पुरःसरं भक्तितत्त्वं दृढीकृत्य वैष्णवधर्मस्य प्रसारे संप्रदाय–चतुष्टयस्यावदान–विषये सुशीलकुमार–दे–महाभागैः उक्तम्–

Whatever justification is offered by these schools of its ultimate philosophical position, subsequent history of Vaiṣṇavism as a religious persuation follows the lines of worshipping God as a person and through symbols and manifestations. (*Early History of the Vaiṣṇava Faith and Movement in Bengal*, pp 4-5).

शंकराचार्योत्तरकाले भक्तसाधकस्तथा परमाचार्यरूपेण श्रीरामानुजपाद आविर्बभूव। भगवत्प्रेम्नः तथा शरणागतेः परमतत्त्वेन सह ब्रह्मणः सेवायोग्यत्वं उपास्यत्वं च तेनैव उद्घोषितम्। साधनशक्तिवलेन भक्तितत्त्वमाश्रित्य रामानुजाचार्यस्य विशिष्टाद्वैतवादः अद्वैतवादस्य प्रतिस्पर्धिरूपेण विस्तारं लेभे। ईश्वरेण साकं जीवस्य सेव्य–सेवकभावोऽत्र प्राधान्येन भजते।

निर्विशेषेण अद्वितीयेन एकरसेन च ब्रह्मणा नामरूपमयवैचित्र्यस्य उत्पत्त्यसंभवाद् ब्रह्मणः सविशेषत्वं रामानुजाचार्येण स्वीकृतम्। द्वैतरहितसत्तायाः द्वैतजनकत्वं कथं संभवेत्? भवति चेत् कारणव्यतिरेकेण कार्यं समुत्पद्यत इत्याशङ्का जायते। तेन सूक्ष्मप्रपञ्चमयकारणवस्तु चिदचिद्विशिष्टब्रह्म एव जगत्प्रपञ्चस्य कारणमित्युच्यते। निर्विशेषब्रह्मणो जगदुत्पत्तिकारणम् अनुपपन्नमेव। श्रीसम्प्रदायमतेन ब्रह्मैव श्रेष्ठतत्त्वम्, जीवजगतोश्च ब्रह्माधीनत्वात् तयोरपि सत्यत्वं मान्यम्। जीवस्तथा जगदेव ब्रह्मणः स्वगतभेदः। अद्वैतमते, केवलं ब्रह्म सदेव; रामानुजादिवैष्णवाचार्यमतेन सत्तायाः परिमाणभेदाभावेऽपि प्रकारभेदोऽस्ति– ब्रह्मसत्ता, जीवसत्ता, जगत्सत्ता चेति। जीवस्य जगतश्च ब्रह्मान्तर्गतत्वे तथा ब्रह्माश्रितत्वेऽपि ब्रह्मण एकत्वस्याद्वितीयत्वस्य च हानिर्न भवेत्। मतेऽस्मिन् ब्रह्मणः सविशेषत्वं स्वीक्रियते; यतः प्रत्यक्षादिप्रमाणं सविशेषस्यैव अस्तित्वं ज्ञापयति, न तु निर्विशेषस्य। सगुणब्रह्मसर्वविधकल्याणगुणस्याकरभूतस्तथा हेयगुणरहितः। श्रुतावपि ब्रह्मणः गुण–क्रिया–शक्त्यादीनामुल्लेखः समुपलभ्यते–

> परास्य शक्तिर्विविधैव श्रूयते।
>
> स्वाभाविकी ज्ञान–बल–क्रिया च॥ (श्वे. उ.– ६/८) इति।

*छान्दोग्ये*ऽपि ब्रह्मणः क्षुधा–तृष्णा–शोकादिरहितत्वमुक्तम्– 'एष आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः'[34] इति। श्रुतौ यत्र ब्रह्मणो निर्गुणत्वं वर्ण्यते– 'कर्माध्यक्ष सर्वभूताधिवासः / साक्षी चेता केवलो निर्गुणश्च' (श्वे. उ.– ६/११) तत्र जडत्वक्षुद्रत्वादिहेयगुणनिषेधार्थमेव तदुल्लिखितम् इत्यवधारणीयम्। बृह–धातोरुत्तरं मन्–प्रत्ययनिष्पन्नस्य ब्रह्म–शब्दस्य व्युत्पत्तिलभ्योऽर्थेन तस्य स्वरूपतस्तथा गुणतो बृहत्तमत्वं द्योतितम्। गुणानां मध्ये ब्रह्मणः सच्चिदानन्दरूपगुणत्रयं मुख्यत्वेन गण्यते। सदादिस्तु न केवलं गुणस्तथा स्वरूपमपि। ब्रह्म न केवलं सत्, सत्तावानपि; न केवलं ज्ञानम्, ज्ञाता अपि; न हि केवलमानन्दम्, आनन्दमयमपि। पूर्वोक्तगुणत्रयेण क्रमेण ब्रह्मणः स्रष्टृत्वम्, ज्ञानकारणत्वम्, निखिलानन्दमूलत्वमवज्ञेयम्। जगत्स्रष्टुः ब्रह्मणो भीषणरूपं मधुररूपं चेति

गुणभेदानुसारेण वक्तुं शक्यते, निखिलविश्वचराचरस्य सुशृङ्खलकठोरशासनं तस्य भीषणरूपम्। वज्रसदृशशासनं *कठोपनिषदि* एवं समुपवर्ण्यते– 'महद्भयं वज्रमुद्यतम्' [35] इति। *बृहदारण्यके*ऽपि गीयते– 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषो मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति'[36] इति। कर्मानुसारेण फलजनकत्वात् स जीवस्य विचारकोऽपि। अतुलनीया ब्रह्मणः शक्तिः। परमकरुणामयब्रह्मणो भक्तवत्सलरूपं तथा मुक्तिफलप्रदायकरूपं मधुररूपमिति निश्चप्रचम्।

जगल्लीनत्वेऽपि ब्रह्मणो जगदतिरिक्तत्वं रामानुजाचार्येण स्वीकृतम्। अचिन्त्यगुणसमन्वितं शक्तेराधारभूतं पुरुषोत्तमं ब्रह्म सर्वगुणविमण्डिता परिपूर्णसत्ता। यथा मृत्तिकायाः कार्यभूतं मृन्मयघटे मृत्तिकाभिन्नं किंचिन्नास्ति तथा ब्रह्मणः कार्यरूपं जगदिदं सर्वं ब्रह्मैव। स जीवजगतोः उपादानकारणम्। रामानुजमते, विष्णु एव ब्रह्म; ईश्वरेण समं ब्रह्मणः प्रभेदो नास्ति। अद्वैतमते, पारमार्थिकस्तरे ईश्वरस्य बाधो भवेत् परं विशिष्टाद्वैते ईश्वरो ब्रह्म वा अबाधितस्वरूपं पारमार्थिकसत्यम्। तन्मतेन्, जीवोऽनुमात्रम्; ब्रह्मस्तु विभुः। जगदिदं जाड्यम्, ब्रह्म चित्स्वरूपम्; पुनो ब्रह्म अंशी, विशेष्यः, आत्मा एव; जीवो जगतश्च अंशः, विशेषणम्, देहरूपम्। अंशीव्यतिरेकेण अंशस्य, द्रव्यव्यतिरेकेण गुणस्य, आत्माव्यतिरेकेण देहस्यास्तित्वाभावाद् देहोऽयम् आत्मनो भिन्नादपि अभिन्नम्। देहहीनम् आत्मा तथा आत्माहीनं देहोऽपि न भवत्येव। ययोर्द्वयोर्मध्ये एकस्य व्यतिरेकेण अपरस्यास्तित्वं न संभवेत्तदा तयोः संबन्धः अपृथक्सिद्धिरुच्यते। जीवो जगतश्च ब्रह्मण अंशरूपेण विशेषणं तथा देहरूपेण ब्रह्मणो भिन्नादपि ब्रह्माश्रयीरूपेण अभिन्नमेव। अत्र अभिन्नमित्यनेन परस्पराश्रयित्वम् अपृथक्सिद्धिरूपत्वं च बोध्यव्यम्। अतो ब्रह्मवत् जीवजगतोरपि सत्यत्वं मान्यम्। अद्वैतवेदान्तसंमता जीवन्मुक्तिः रामानुजाचार्येण नाङ्गीकृता। तन्मतेन साधननिचयस्य सम्यक्परिपालनेन जीवस्य पूर्वसञ्चितप्राक्तनकर्मणां वर्तमानस्तथा भाविकर्मणामपि फलं विनश्यति परं प्रारब्धकर्मफलं न प्रनश्यति। केवलं भोगेनैव प्रारब्धकर्मक्षयः संभवेत्।

प्रारब्धकर्मणः फलभूतस्य वर्तमानदेहस्य विनाशपर्यन्तं संसारेऽस्मिन् स्थितिर्भवेदिति कारणेन देहपातानन्तरमेव मुक्तिर्जायते। अतो विदेहमुक्तेः मुक्तिपदवाच्यत्वं मान्यम्, न तु जीवन्मुक्तेः। प्रसङ्गेऽस्मिन् राधाकृष्णनमहाभागैः प्रोक्तम्–

For Rāmānuja there is no jīvanmukti. One attains to fellowship with God after exhausting all karma and throwing off the physical body. In the state of release the souls are all of the same type. There are no distinctions there of gods, men, animals and plants. In the world of Saṃsāra those distinctions have a meaning. It is the connection with matter that gives uniqueness to the soul. But the souls can get rid of this connection, which is not a natural one. It follows that the individuality determined by bodily connections is not eternal, when it is shattered the soul is said to attain the nature of Brahman and manifest its own true nature. It does not develop any new character. (*Indian Philosophy*, Vol. II, pp 710).

ब्रह्मसाक्षात्कारे भक्तेरुपयोगित्वमपि रामानुजेन प्रदर्शितम्। निष्कामकर्मणा शुद्धचित्तस्य ब्रह्मजिज्ञासा समुत्पद्यते। मुमुक्षुः गुरुसमीपे उपगम्य शास्त्राध्ययनपूर्वकं ब्रह्मज्ञानार्थं यतते। मोक्षलाभविषये न केवलं ज्ञानं भक्तिरपि आवश्यिकी। रामानुजमते, भक्ति–शब्दस्यार्थो ध्यानम् उपासना वा। तेन उपासनापर्यायो भक्ति–शब्देति वक्तुं शक्यते। भक्तिस्तु ध्रुवानुस्मृतिरेव। तदुक्तं *श्रीभाष्ये*– 'एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते। उपासनापर्यायत्वाद् भक्तिशब्दस्य, अत एव श्रुतिस्मृतिभिरेवमभिधीयते'[37] इति। तन्मतेन, तैलधारावदविच्छिन्ना स्मृतिसन्तानरूपा ध्रुवा स्मृतिरेव ध्यानम्। ब्रह्मस्वरूपं ज्ञात्वा मुमुक्षुः निरन्तरब्रह्मध्यानेन निमग्नस्तिष्ठति। ब्रह्मप्रसादमन्तरेण केवलं ध्यानेनापि मुक्तिर्न लभते। तत्र *कठोपनिषदि* गीयते–

नायमात्मा प्रवचनेन लभ्यो / न मेधया न बहुना श्रुतेन।
ममेवैष वृणुते तेन लभ्य– / स्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥
(कठ. उ.– १/२/२३) इति।

साधनप्रणालीमध्ये प्रपत्त्याः स्वातन्त्र्यं विशिष्टाद्वैते अङ्गीकृतम्। ब्रह्मणि परिपूर्णतया आत्मसमर्पणमेव प्रपत्तिः। प्रपत्त्याः षड्विधानि अङ्गानि सन्ति– आनुकूल्यस्य संकल्पः, प्रातिकूल्यस्य वर्जनम्, रक्षिष्यति इति विश्वासः, गोप्तृत्ववरणम्, कार्पण्यम्, आत्मनिक्षेपश्चेति।

तत्र भक्तिमार्गे ब्राह्मणादिचतुर्वणानामधिकारः स्वीक्रियते। अत्र राधाकृष्णन–महोदयानामुक्तिरियं समुद्धरणीयम्–

Strictly speaking, the religion of bhakti or devotion and prapatti or submission, requires no priest, for the offering of love does not need the sanction of the scripture, and the grace of God is not in the keeping of any man, For one who is deep in devotion there is neither scripture nor rule, Rāmānuja preaches equality in worship and proclaims that bhakti transcends all caste distinctions. (*Indian Philosophy*, Vol. II, pp. 708).

संप्रदायानां तत्त्वालोचनेन भक्तिवादस्य क्रमधारा सुस्पष्टरूपेण प्रतीयते। रामानुजाचार्य–स्वीकृता भक्तिः अद्वैतवादस्य ज्ञानप्रभावात् सर्वथा मुक्त इति न वक्तव्यः । तन्मतेन ज्ञान–विशेष–पर्यायत्वाद्भक्तिः अनुध्यानमात्रमेव। भक्तिरियं परवर्तिनि काले स्नेहे प्रेमे वा पर्यवस्यति। भक्तितत्त्वस्येयं क्रमोन्नतिः गौडीय–वैष्णवाचार्याणां दर्शनेषु साहित्येषु च प्रकटीभवति।

श्रीचैतन्य–देवस्याविर्भावकालात् प्राक् भक्तिवादस्य सुप्रतिष्ठायां वैष्णवाचार्यो माधवेन्द्रपुरी तथेश्वरपुरी–नामधेय–शिष्यद्वयस्य महदवदानमङ्गीकर्तव्यम्। अद्वैतवेदान्त–मतानुगामिनः श्रीधर–स्वाम्यादीनामपि भक्तितत्त्वेन सह नासन् कोऽपि विरोधः। भक्तिभावस्य दृढावस्थायां भक्त–भगवतोर्भेदावसाने भक्तसविधे भगवद्–व्यतिरिक्त–सत्ता नानुभूयते। मोक्षलाभस्य सर्वोत्कृष्टोपायत्वेन भक्तेरुपयोगित्वं *श्रीमद्भगवद्गीतायां* *श्रीमद्भागवते* तथा *विष्णुपुराण*भाष्ये श्रीधरस्वामिना प्रदर्शितम्। साधकसविधे रसरूपेण पर्यवसिताया भक्त्याः प्रवर्तनविषये श्रीमन्माधवेन्द्रपुरीमहाभागानां महद्भावः स्वीकर्तव्यः। आदौ भक्तिरसः केवलं काव्यादौ निबद्धमासीत्। साधनाङ्गरूपेण परिणतिलाभात् भक्तिः साधनमार्गे सर्वजनसाध्य–स्वतन्त्रमार्गनाम्ना ख्यातिमुपगच्छतीति वक्तुं शक्यते। प्रसङ्गेऽस्मिन् सुशीलकुमार–दे–महाभागानामभिमतं समुद्धरणीयम्–

Unlike a Mādhva ascetic, Mādhavendra appears to have been a devotee of great emotional capacity, Who must have, before Caitanya, imparted a new spirit to the somber and forbidding aspects of asceticism and who probably cared more for actual devotional fervour than for the teaching of dry doctrines. (*Vaiṣṇava Faith and Movement in Bengal*, pp24).

ईशवीये पञ्चदश–शतके गौडदेशस्य नवद्वीपे श्रीचैतन्यदेवः आविर्बभूव। आल्वार–संप्रदाय–प्रदर्शितं कान्ताभावोपासनं गौडीयवैष्णव–समाजे श्रीचैतन्यदेवेन प्रवर्तितम्। महाभाववती श्रीराधिकाया विशुद्ध–कृष्णानुरागः तज्जीविते वास्तवतां लेभे। भक्तिमन्दाकिन्याः पवित्रधारया इमां धरित्रीं तेनैवाभिसिञ्चितम्। भक्तिधर्मस्य शैथिल्य–निराकरणात् परमप्रेम–रूपा भक्तिः अखिल–धर्मानां साररूपेण विस्तारं लेभे। श्रीचैतन्यदेवस्याविर्भाव–कालात् प्रागेव मधुररस–प्रधाना वैष्णवसाधन–पद्धतिः प्रचलितमासीदिति जयदेव–विद्यापति–चण्डीदासादीनां पदावल्यामवगम्यते। प्रसङ्गेऽस्मिन् सुशीलकुमार–दे–महाभागैः उक्तम्–

Long before Caitanya, the melodious padāvalīs of Jayadeva in Sanskrit and the songs of Caṇḍīdāsa in Bengali had also popularized the Rādhā-Krṣṇa cult with their largess of Vaiṣṇava devotional sentiments. Even if Caitanya’s religious personality started a new movement or gave a new interpretation to an old faith, his affiliation to the whole trend of Vaiṣṇava tradition of the past cannot be doubted, and it’s influence on him must have been varied and abundant. (*Early History of the Vaiṣṇava faith and Movement in Bengal*, pp-1).

श्रीचैतन्यपरवर्ति–वैष्णवाचार्या *भागवत*प्रदर्शित–मार्गानुसारेण मानवीय–संपर्क–माध्यमेन च भगवल्लीलास्वादन–पुरःसरं तृप्तिमधिगच्छन्ति न तु श्रीभगवन्तं स्वामिकल्पन–रूपया आराधनया। वस्तुतस्तु चैतन्योत्तरकाले वैष्णवाः श्रीभगवन्तं शान्त–दास्य–सख्य–वात्सल्य–मधुर–नामधेय–भावपञ्चकेन स्तुवन्ति। एवं *श्रीमद्भागवतो*क्ता पञ्चधा भक्तिः गौडीयवैष्णव–संप्रदाये पुनःप्रवर्तिता जाता। भक्त्याः साधनाङ्ग–स्वरूपेण सह रस–स्वरूपस्य समन्वय–साधनेन रस–स्वरूपस्य च प्राधान्य–घोषणेन भक्तिपदस्येतिहासे नवयुग–सूचने गौडीयवैष्णव–साधकानामनल्पावदानं स्वीकर्तव्यम्। तेषां मतेन, स्वतन्त्र–मोक्षोपायत्वेऽपि भक्त्याः ज्ञानमार्गस्तथा कर्ममार्गानुसारि–निरानन्दमयत्वं न स्वीकार्यम्। शृङ्गारादि–रसाप्लुत–पाठक–चित्तवद् भक्त–चित्तमपि अपार्थिवानन्द–धारया निमज्जति। भक्तिर्न हि केवला देवतार्चन–रूपा, इयं रति–शोकादिवद् भक्तस्य चित्तवृत्ति–विशेषा या च श्रीराधा–कृष्णावलम्बन–रूपा। रति–शोकादि–चित्तवृत्तीनां शृङ्गार–करुणादि–रसरूपेण परिणतिलाभवद् भक्तेरपि भक्ति–रसत्वमुपजायते। अतो भक्ति–भक्तिरसयो–र्मध्ये भेदं नास्ति।

एतदर्थं मोक्षोपायरूप–भक्तिस्वरूप–वर्णनावसरे भक्त्याः रस–रूपत्वमपि श्रीजीवादि–वैष्णवाचार्यैः समुपवर्णितम्। रस–स्वरूपमिदं भक्त्याः यथार्थ–स्वरूपमिति *भागवता*दि–शास्त्रेऽपि प्रतिपाद्यते। उक्तं च *षट्सन्दर्भे*– भगवत्प्रीतेः परम–रसत्वापत्तिः शब्दोपात्तैव[38] इति। सर्व–रसस्याश्रयस्थान–रूपेण भक्तिरसस्योपयोगित्वं वैष्णवैः स्वीक्रियते। लोकोत्तरानन्द–स्वरूपत्वात् केवलं भक्ति–रसस्यैव रसत्वमस्तीति हि तेषां मतम्। एतदेवोक्तं *मुक्ताफल*ग्रन्थस्य *कैवल्यदीपिका*टीकायां वोपदेवाचार्येण– अनुकार्येषु हि जानकी–राम–भद्रादिषु रत्यादि–मात्रम्, न तु रसत्वं तस्य लोकोत्तर–चमत्कार–रूपत्वात्[39] इति। भक्तिरस एव रति–शोक–हासाद्युपाधीनां संसर्गेण शृङ्गार–करुण–हासादि–रसरूपेण आस्वाद्यते– भक्तिरस एव रसस्यादि–रूपेण नवधानुभूयते[40] इति।

एवं सुविस्तृतालोचनेन भक्तिरसस्याभ्युदयस्तथा क्रमधारापि स्पष्टतया अवगम्यते।

## ४.६. गूढार्थदीपिकोक्ता भक्तिः

भज्–धातोरुत्तरं करणार्थे क्तिन्–प्रत्ययनिष्पन्नो भक्ति–शब्देन श्रवण–कीर्तनादीनि साधनानि अवज्ञेयम्। पुनरपि, भज्–धातुना सह भावार्थे क्तिन्–प्रत्यययोगे भक्ति–पदेन भजनस्य फलं परम–पुरुषार्थमेव बोध्यम्। *श्रीमद्भगवद्गीतायां* *श्रीमद्भागवतपुराणे* च तथा गौडीयवैष्णव–दर्शने भक्तिमार्गस्य पूर्वोक्ता या क्रमधारा परिलक्ष्यते ताभ्यो मधुसूदनसरस्वती–पादकृत–व्याख्यानरीत्याः स्वातन्त्र्यमत्र विचारार्हम्। द्वैतवादे आधारितो भक्तिवादः। भक्तो भगवांश्चेति द्वयमन्तरेण प्रीतिरूपा भक्तिर्नाङ्गीक्रियते। अद्वैतवेदान्त–दर्शनस्वीकृत–सिद्धान्तनिचयम् अपरित्यज्य आचार्यपादस्यानुभूतौ भक्ति–ज्ञानयोरविरोधित्वमपि प्रतिष्ठितम्। अत्र वक्तव्यम्, अष्टादशाध्याय–समन्वितां *श्रीमद्भगवद्गीतां* षट्कत्रयेण विभज्य द्वितीयषट्के भक्तियोग–तत्त्वं विहितमाचार्यपादेन–

भगवद्भक्तिनिष्ठा तु मध्यमे परिकीर्तिता॥[41] इति।

भगवद्भक्तिनिष्ठा–वर्णनेन मध्यम–काण्डे परमानन्द–भगवत्स्वरूप–भूतस्तत्पदार्थोऽवधारितः–

द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना।

भगवान् परमानन्दस्तत्पदार्थोऽवधार्यते॥[42] इति।

श्रुतिवाक्य–प्रमाणेन तत्त्वज्ञानार्थं भगवद्भक्तेरुपयोगित्वम् अवज्ञायते। पूर्वभूमौ श्रीभगवति कृता भक्तिः उत्तरभूमौ फलं सिध्यति। एवं भगवद्भक्तेरुपयोगित्वं प्रतिपादयता आचार्यवरेणोक्तम्–

इत्यादिश्रुतिमानेन कायेन मनसा गिरा।

सर्वावस्थासु भगवद्भक्तिरत्रोपयुज्यते॥

पूर्वभूमौ कृता भक्तिरुत्तरां भूमिमानयेत्।

अन्यथा विघ्नबाहुल्यात् फलसिद्धिः सुदुर्लभा॥[43] इति।

*गीता*शास्त्रे सर्वमेतत् स्वयमेव श्रीभगवता प्रतिपादितम्। एतस्माद् *गीता*व्याख्याने तस्य सुमहती इच्छा अस्तीति विषये मधुसूदनसरस्वती–पादेन स्वयमेवाकुतम्–

एतत् सर्वं भगवता गीताशास्त्रे प्रकाशितम्।

अतो व्याख्यातुमेतन्मे मन उत्सहते भृशम्॥[44] इति।

मध्यम–षट्कस्य प्रारम्भे भक्तिं विना मुक्तिं न लभ्यत इत्युक्त्वा श्रीनन्दनन्दन–श्रीकृष्णस्य स्तुत्यनन्तरं ध्येयब्रह्म–प्रतिपादनप्रधान–मध्यम–षट्केन तत्पदार्थो व्याख्यायते। सर्वयोगिनामुपास्यभूतं परमानन्द–स्वरूपं श्रीहरिमुद्दिश्य आचार्येणोक्तम्–

यद्भक्तिं न विना मुक्तिर्यः सेव्यः सर्वयोगिनाम्।

तं वन्दे परमानन्दघनं श्रीनन्दनन्दनम्॥

एवं कर्म–संन्यासात्मक–साधन–प्रधानेन प्रथम–षट्केन ज्ञेयं त्वम्–पदलक्ष्यं सयोगं व्याख्यायाधुना ध्येयब्रह्म–प्रतिपादन–प्रधानेन मध्यमेन षट्केन तत्पदार्थो व्याख्यातव्यः[45] इति।

तत्र षष्ठाध्यायान्ते–

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।

श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥ (श्री. म. गी. ६/४७)

इत्यत्र भगवद्भजनं व्याख्यातम्। यश्च वसु–रुद्रादित्यादि–क्षुद्रदेवता–भक्तानां मध्ये भगवति वासुदेवे पुण्यपरिपाक–वशात् पूर्वजन्मार्जित–संस्कार–पाटवात् साधु–सङ्गाच्च श्रद्दधानः सन् मनुष्योऽयमीश्वरान्तर–साधारणोऽयमित्यादि–भ्रमं हित्वा सगुणं निर्गुणं वा सततमनुचिन्तयति स एव सर्वेभ्यः समाहितचित्त–युक्तेभ्यः श्रेष्ठ इति श्लोक–व्याख्यायाम् उक्तः। अत्र समानेऽपि योगाभ्यास–क्लेशे समानेऽपि भजनायासे च भगवद्भक्ति–शून्येभ्यो भगवद्भक्तस्यैव श्रेष्ठत्वं प्रतिपादितम्। एवं भक्तियोग–सूत्रणात् परं भजनीयं भगवन्तं वासुदेवं तत्पदार्थं च तथा भगवद्भजनस्य व्याख्यानाय सप्तमोऽध्याय प्रारभ्यते। तत्र भजनीयं श्रीभगवत्स्वरूपं कीदृशं कथं वा तद्गतोऽन्तरात्मा स्यादित्येतत् विषयद्वयं श्रीभगवता व्याख्यातमिति *गूढार्थदीपिका*यां प्रतिपादितम्– तत्रापि 'योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। / श्रद्धावान् भजते यो मां स मे युक्ततमो मतः' इति प्रागुक्तस्य भगवद्भजनस्य व्याख्यानाय सप्तमोऽध्याय आरभ्यते। तत्र कीदृशं भगवतो रूपं भजनीयम्? कथं वा तद्गतोऽन्तरात्मा स्यात्? इत्येतत् द्वयं प्रष्टव्यमर्जुनेनापृष्टमपि परम–कारुणिकतया स्वयमेव विवक्षुः श्रीभगवानुवाच मयीति[46] इति।

यथा अविद्या–प्रभावेनोद्भूतस्य स्वाप्निक–प्रपञ्चस्य उत्पत्ति–विनाशकारणं जीवैव तथा मायाया आश्रयत्व–विषयत्वाभ्यां मायावी श्रीभगवान् एव द्रष्टा इति वक्तुं शक्यते। रज्जौ सर्पभ्रमस्थले यथा कल्पित–सर्पस्य रज्जुसत्तायां प्रकाशस्तथा श्रीभगवतो जातत्वात् समुद्भूत–पदार्थनिचयस्य भगवदधीन–सत्तास्फुर्त्तिका–वशात् सर्वमेव तदधीनेति ज्ञातव्या। अन्तःकरणावच्छिन्नत्वाज् जीवस्याल्पज्ञत्वमवधेयम्। मायाधीशोऽनन्त–शक्तिसंपन्न आनन्दस्वरूपः श्रीभगवान् भक्तानुग्रहार्थम् अनेकान् अवतार–रूपं विदधति। बिम्बभूते श्रीभगवति अशेषकर्म–समर्पणेन बिम्ब–समर्पितस्य प्रतिबिम्बेऽपि प्रतिफलनात् जीवः पुरुषार्थान् आप्नोति। तथा चोक्तं *गूढार्थदीपिका*याम्– स चेद्बिम्बभूतं भगवन्तमनन्तशक्तिं माया–नियन्तारं सर्वविदं सर्वफलदातारमनिशमानन्दघन–मूर्त्तिमनेकानवतारान् भक्तानुग्रहाय

विदधतमाराधयति परम–गुरुमशेषकर्म–समर्पणेन तदा बिम्ब–समर्पितस्य प्रतिबिम्बे प्रतिफलनात् सर्वानपि पुरुषार्थानासादयति[47] इति। एतदेवाभिप्रेत्य *श्रीमद्भागवते* प्रह्लादेन यदुक्तं तदपि दीपिकाकारेणात्र समुद्धृतम्–

नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते।
यद्यद् जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः॥ इति।

कोऽपि जनो दर्पण–प्रतिबिम्बितमुखे तिलकादि–शोभा द्रष्टुमिच्छति चेत्तस्य बिम्बभूते मुखेऽपि सा संपादनीया। एवं बिम्बभूते परमेश्वरे यत् समर्प्यते तत् प्रतिबिम्बभूतो जीवो लभते। जीवस्य पुरुषार्थ–लाभविषये उपायान्तरं न वर्तत इति श्रीमन्मधुसूदनेनोक्तम्– दर्पण–प्रतिबिम्बितस्य मुखस्य तिलकादि–श्रीरपेक्षिता चेद्बिम्बभूते मुखे समर्पणीया सा स्वयमेव तत्र प्रतिफलति नान्यः कश्चित् तत्प्राप्तावुपायोऽस्ति यथा, तथा बिम्बभूतेश्वरे समर्पितमेव तत्प्रतिबिम्बभूतो जीवो लभते नान्यः कश्चित् तस्य पुरुषार्थ–लाभोऽस्त्युपाय इति दृष्टान्त–दार्ष्टान्तिकयोरर्थः[48] इति। श्रीभगवन्तम् अनवरतम् आराधनेन ज्ञानप्रतिबन्ध–रूपं पापं विनश्यति ज्ञानानुकूल–पुण्योपचयश्च भवति। सर्वकर्म–त्यागेन गुरुपसदन–पूर्वक–वेदान्तवाक्य–श्रवण–मनन–निदिध्यासनेन च तदा भक्तस्य निर्मलेऽन्तःकरणे 'तत्त्वमस्या'दिगुरूपदिष्ट–वेदान्तवाक्येन अहं ब्रह्मास्मीति निरुपाधिचैतन्य–रूपा साक्षात्कारात्मिका वृत्तिरुदेति। सर्वमेतत् सम्यक्तया स्पष्टीकृतमाचार्यपादेन– तस्य यदा भगवन्तमनन्तमनवरतमाराधयतोऽन्तःकरणं ज्ञानप्रतिबन्धक–पापेन रहितं ज्ञानानुकूल–पुण्येन चोपचितं भवति तदातिनिर्मले मुकुरमण्डल इव मुखमतिस्वच्छेऽन्तःकरणे सर्वकर्मत्याग–शम–दमादिपूर्वक–गुरूपसदन–वेदान्तवाक्य–श्रवण–मनन–निदिध्यासनैः संस्कृते तत्त्वमसीति गुरूपदिष्ट–वेदान्तवाक्य–करणिकाहं ब्रह्मास्मीत्यनात्माकार–शून्या निरुपाधि–चैतन्याकारा साक्षात्कारात्मिका वृत्तिरुदेति[49] इति।

उपादान–नाशाद् उपादेय–कार्यनाश इति हि सर्वतन्त्र–सिद्धान्तः। एतेन अविद्या–नाशेन ब्रह्माकारात्मिकया वृत्त्या सह अविद्याकल्पित–निखिलकार्य–प्रपञ्चस्य नाशो भवतीत्यपि प्रतिपादितम्। अपास्त–समस्त–द्वैतभावेन केवलं भगवत्साक्षात्कारेणैव मायाजालं छेत्तुं शक्यते।

ये चिदानन्दरूपा सर्वोपाधिरहिता चित्तवृत्ति–विषयीभूता श्रीभगवन्तं प्रपद्यन्ते तेषां चित्तवृत्तिः वेदान्त–वाक्योत्पन्ना निर्विकल्प–साक्षात्काररूपा इति। दुरतिक्रमणीया माया अनायासेनैव भगवत्प्रसादेन ते अतिक्रामन्ति। *गूढार्थदीपिका*यां सर्वमेतत् प्रतिपादयता उक्तम्– मामेव सर्वोपाधि–रहितं चिदानन्दं सदात्मानमखण्डं ये प्रपद्यन्ते वेदान्तवाक्य–जन्यया निर्विकल्पक–साक्षात्कार–रूपया निर्वचनानर्ह–शुद्धचिदाकारत्व–धर्मविशिष्टया सर्वसुकृत–फलभूतया निदिध्यासन–परिपाक–प्रसूतया चेतोवृत्त्या सर्वाज्ञान–तत्कार्य–विरोधिण्या विषयीकुर्वन्ति ते ये केचित् एतां दुरतिक्रमणीयामपि मायामखिलानर्थ–जन्मभूवमनायासेनैव तरन्ति अतिक्रामन्ति[50] इति। श्रीभगवन्तं ये पश्यन्ति ते सर्वोपाधि–निवृत्त्या सच्चिदानन्दघन–रूपेण तिष्ठन्ति।

दैवी ह्येषा गूणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥ (श्री. म. गी. ७/१४)

इति श्लोक–व्याख्यानावसरे 'प्रपश्यन्ति'स्थले 'प्रपद्यन्ते'पदं कथं प्रयुक्तं तस्य व्याख्याने भगवन्माहात्म्य–प्रतिपादक–विविध–विशेषण–प्रयोगादनन्तरं ये परमानन्दघन–मूर्त्तिमयी मामनुचिन्तयन्तः कालानतिवाहयन्ति ते मायागुण–विकारैः नाभिभूयन्त इति प्रतिपादितम्। परमतत्त्वभूतानन्त–सौन्दर्यसार–सर्वस्व–श्रीवासुदेवस्य वर्णनावसरे भगवद्गुण–प्रतिपादक–विशेषण–निचयेन आचार्यपादस्य भक्तिभावनिष्ठा अवज्ञायते। तथा चोक्तमाचार्येण– प्रपश्यन्तीति वक्तव्ये प्रपद्यन्त इत्युक्तेः ये मदेकशरणाः सन्तो मामेव भगवन्तं वासुदेवमीदृशमनन्त–सौन्दर्यसार–सर्वस्वमखिल–कलाकलापनिलयम् अभिनव–पङ्कजशोभाधिक–चरणकमलयुगल–प्रभवमनवरत–वेणुवादननिरत–वृन्दावनक्रीडासक्तमान–सहेलोद्धृत–गोवर्द्धनाख्य–महीधरं गोपालं निषूदित–शिशुपाल–कंसादि–दुष्टसंघम् अभिनव–जलदशोभासर्वस्व–हरणचरणं परमानन्दघनमय–मूर्त्तिमतिवैरिंच प्रपञ्चमनवरतमनुचिन्तयन्तो दिवसानतिवाहयन्ति, ते मत्प्रेम–महानन्द–समुद्रमग्नमनस्तया समस्त–मायागुण–विकारैर्नाभिभूयन्ते; किं तु मद्विलासविनोद–कुशला एते मदुन्मूलन–समर्था इति शङ्कमानेव

माया तेभ्योऽपसरति वारविलासिनीव क्रोधनेभ्यस्तपोधनेभ्यः[51] इति। मायातरणार्थी ईदृशमेव भगवन्तं सततमनुचिन्तयेदिति भगवतोऽभिप्रायः। श्रुतयः स्मृतयश्चात्र प्रमाणरूपेण स्वीकर्तव्याः। पुनश्च–

नाहं प्रकाशः सर्वस्य योगमायासमावृतः।

मूढोऽयं नाभिजानाति लोको मामजमव्ययम्॥ (श्री. म. गी. ७/२५)

इति श्लोक–व्याख्यानावसरे श्रीभगवति अविवेकिनो मनुष्यबुद्धिः कथं जायन्त इत्याशंक्यते। श्रीभगवान् सर्वभक्त–सकाशे स्वं रूपं न प्रकटयति। सर्वासां सविधे भगवतोऽप्रकाशस्य हेतुः योगमायैव। योगोऽत्र भगवत्संकल्पः तद्वशवर्तिनी माया च योगमाया–पदेन ज्ञेया। भगवत्संकल्पानुविषयिन्या मायया सम्यगावृतः सन् अभक्तो जनः स्वरूपेण तं न जानाति। श्रीभगवतः परम–स्वरूपमजानन्तः तेषां ज्ञानम् आवृतं वर्तन्ते। सर्वमेतद् दीपिकायां स्पष्टीकृतमाचार्येण– अहं सर्वस्य लोकस्य न प्रकाशः स्वेन रूपेण प्रकटो न भवामि, किं तु केषां चिन्मद्भक्तानामेव प्रकटो भवामीत्यभिप्रायः। कथं सर्वस्य लोकस्य न प्रकट इत्यत्र हेतुमाह योगमाया–समावृतः। योगो मम संकल्पस्तद्वशवर्तिनी माया योगमाया तयायमभक्तो जनो मां स्वरूपेण न जानातीति संकल्पानुविधायिन्या मायया सम्यगावृतः सत्यपि ज्ञानकारणे ज्ञान–विषयत्वायोग्यः कृतः[52] इति। तत्र सर्वयोगि–ध्येयं श्रीभगवतः ऐश्वर–रूपे जीवबुद्धि–शङ्काम् अपनिनीषुः श्रीमन्मधुसूदनकृत–भगवद्गुणबोधक–विशेषणराजि–प्रयोगेण भक्तिभाव–पराकाष्ठा स्फुटतयावगम्यते– ननु जन्मकालेऽपि सर्वयोगि–ध्येयं श्रीवैकुण्ठस्थमैश्वरमेव रूपमाविर्भावितवति संप्रति च श्रीवत्सकौस्तुभ–वनमाला–किरीट–कुण्डलादि–दिव्योपकरण–शालिनि कम्बु–कमल–कौमोदकी–चक्रवरधारि–चतुर्भुजे श्रीमद्वैनतेय–वाहने निखिल–सुरलोक–संपादित–राजराजेश्वराभिषेकादि–महावैभवे सर्वसुरासुर–जेतरि विविध–दिव्यलीलाविलास–शीले सर्वावतार–शिरोमणौ साक्षाद्वैकुण्ठ–नायके निखिललोक–दुःख–निस्ताराय भुवमवतीर्णे विरिंचि–प्रपञ्चासंभवि–निरतिशय–सौन्दर्यसार–सर्वस्व–मूर्तौ बाललीला–विमोहित–विधातरि तरणि–किरणोज्ज्वल–दिव्यपीताम्बरे निरूपम–श्यामसुन्दरे

करदीकृत–पारिजातार्थ–पराजित–पुरन्दरे वाणयुद्ध–विजिते शशाङ्क–शेखरे समस्त–सुरासुर–विजयि–नरकप्रभृति–महादैतेय–प्रकर–प्राणपर्यन्त–सर्वस्वहारिणि श्रीदामादि–परमरङ्क–महावैभव–कारिणि षोडशसहस्र–दिव्य–रूपधारिण्यपरिमेय–गुणगरिमणि महामहिमनि नारद–मार्कण्डेयादि–महामुनिगण–स्तुते त्वयि कथमविवेकिनोऽपि मनुष्यबुद्धि–र्जीवबुद्धिर्वेत्यर्जुनाशंकामपनिनीषुराह भगवान् नाहम्[53] इति।

देहसंबद्ध–मनुष्यजन्म गर्भवास–योनिद्वार–निर्गमनादि–दुःखालयस्थानम् अस्थिरं दृष्टनष्ट–स्वरूपम्। श्रीभगवन्तं सम्यग्दर्शिनामिह लोके पुनरावर्तनं न भवन्ति। रजस्तमो–मलरहित–शुद्धान्तकरणाः महात्मानः सर्वोत्कृष्टां मुक्तिं गताः। एतेन भगवद्विमुखानाम् असम्यग्दर्शिनां पुनरावृत्तिः भवन्तीति प्रतिपादितम्। तत्र–

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमाम्॥ (श्री. म. गी. ८/१५)

इति श्लोक–टीकायां सम्यगेवोदीर्यते आचार्यवरेण– भगवन्तं प्राप्ताः पुनरावर्तन्ते न वेति संदेहेनावर्तन्त इत्याह मामिति। मामीश्वरं प्राप्य पुनर्जन्म मनुष्यादि–देहसंबन्धं कीदृशं दुःखालयं गर्भवास–योनिद्वार–निर्गमनादि अनेकदुःख–स्थानम् अशाश्वतमस्थिरं दृष्टनष्ट–प्रायं न आप्नुवन्ति पुनर्नावर्तन्त इत्यर्थः। यतो महात्मानो रजस्तमोमल–रहितान्तःकरणाः शुद्धसत्त्वाः समुत्पन्न–सम्यग्दर्शना मल्लोक–भोगान्ते परमां सर्वोत्कृष्टां संसिद्धिं मुक्तिं गतास्ते[54] इति।

एवं भगवद्भक्तेरुपयोगित्वं बहुधा प्रतिपादितम्। प्रत्युतः क्लेश–कर्मादि–हेतूनां भूयो भूयः आविर्भावात् प्राणिनाम् अस्वातन्त्र्यात्तेषां जन्म–मरणादि—दुःख–संबन्धत्वमस्तीति वक्तव्यम्। प्रत्येकशः कल्पे सांसारिक–पदार्थानां समान–नाम–रूपत्व–विद्यमानात् कृतनाशाकृताभ्यागम–दोषपरिहारार्थं च संसारस्य अनादित्वं मान्यम्। "समाननामरूपत्वादावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च"[55] इति वेदान्त–सूत्र–सहयोगेनापि अनादि–संसारस्य स्थापना टीकाकारेण कृता। अतः श्रीभगवन्तम् उपागतानां जन्म–मरणादि–

दुःख-निवृत्तिस्तथा लोकेऽस्मिन् पुनरागमनरोधः संभवन्तीति दीपिकाकारेण प्रतिपादितम्-एवमाशु-विनाशित्वेऽपि संसारस्य न निवृत्तिः क्लेश-कर्मादिभिरवशतया पुनः पुनः प्रादुर्भावात्, प्रादुर्भूतस्य च पुनः क्लेशादिवशेनैव तिरोभावात्, संसारे विपरिवर्तमानानां सर्वेषामपि प्राणिनामस्वातन्त्र्यादवशानामेव जन्म-मरणादि-दुःख-प्रबन्ध-संबन्धादलमनेन संसारेणेति वैराग्योत्पत्त्यर्थं समान-नाम-रूपत्वेन च पुनः पुनः प्रादुर्भावात् कृतनाशाकृताभ्यागम-परिहारार्थम्...[56] इति।

अष्टमाध्याये सर्वेन्द्रियद्वार-संयम-गुणकेन योगेन स्वेच्छया उत्क्रान्तप्राणानाम् अर्चिरादि-मार्गेण ब्रह्मलोक-प्राप्तिस्तथा ज्ञानोदयेन कल्पान्ते परब्रह्म-प्राप्तिलक्षण-रूपा क्रममुक्तिः जातेति व्याख्याता। अतोऽनेनैव प्रकारेण मुक्तिः लभ्यते नान्यथा इत्याशंकायां भगवत्तत्त्व-विज्ञानादपि साक्षान्मोक्ष-प्राप्तिर्भवति इत्युक्त्वा प्रागुक्त-योगावधारण-पूर्वकेन प्राणोत्क्रमणार्चिरादिमार्ग-गमन-कालविलम्बादि-क्लेशं विना भगवत्तत्वस्य तद्भक्तेश्च साक्षान्मोक्ष-प्राप्तये नवमोऽध्यायोऽपि प्रारभ्यत इति प्रतिपादितं दीपिकाकारेण। श्रीमन्मधुसूदनमतेन श्रीकृष्णतत्त्वमेव परमतत्त्वम्। परमतत्त्वमनादृत्य देवतान्तर-याजिनां मोक्षरूप-फलाभावेऽपि तत्तद्देवता-यागानुरूप-क्षुद्रफलावाप्तिः अवश्यंभाविनीति भगवद्याजिनां तेभ्यो वैलक्षण्यम्-

यान्ति देवव्रता देवान् पितृन् यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्॥ (श्री. म. गी. ९/२५)

इति श्लोक-टीकायामुक्तम्। ये त्वज्ञानपूर्वकं पूजयन्ति अन्तःकरणोपाधि-गुणत्रयभेदात् ते त्रिधा। 'तं यथा यथोपासते तदेव भवति' इति श्रुतिरत्र प्रमाणत्वेनोपयुज्यते। तत्र सात्त्विका देवव्रता देवान्, राजसास्तु पितृव्रताः पितृन्, तामसास्तु यक्ष-रक्ष-विनायकादीनां भूतानां पूजकास्तान्येव च भूतानि यान्ति। अतो देवतान्तराराधनस्य तत्तद्देवतारूपत्व-फलमुक्त्वा भगवदाराधनस्य भगवद्रूपत्वमनन्त-फलमिति व्याख्यातमाचार्यपादेन। समानेऽपि आयासे अज्ञानान्धेनाभिभूतो जीवोऽनन्त-फलदं श्रीभगवन्तमनाराध्य अन्तवत् फलं यान्तीत्येवं

प्रतिपादितं श्रीमन्मधुसूदनेन– एवं देवतान्तराराधनस्य तत्तद्देवता–रूपत्वमन्तवत् फलमुक्त्वा भगवदाराधनस्य भगवद्रूपत्वमनन्तं फलमाह मां भगवन्तं यष्टुं पूजयितुं शीलं येषां ते मद्याजिनः सर्वासु देवतासु भगवद्भाव–दर्शिनो भगवदाराधन–परायणा मां भगवन्तमेव यान्ति। समानेऽप्यायासे भगवन्तमन्तर्यामिनमनन्त–फलदमनाराध्य देवतान्तरमाराध्यान्तवत् फलं यान्तीत्यहो! दुर्दैव–वैभवमज्ञानमित्यभिप्रायः[57] इति।

भक्तिस्तु श्रीभगवत्परितोष–निमित्तमेव। भक्त्या परमेश्वराय वासुदेवाय पत्र–पुष्पादि यत् किंचिद् प्रदीयते तुच्छमपि श्रीभगवान् तत् स्वीकरोति। भोजनार्थं प्रथमतया स्वीकरणं ग्रहणं वा क्रियते। प्रीत्यातिशयहेतोः अशनया सह पत्रादीनां ग्रहण–सादृश्यमत्र व्यज्यते। अत्र ‘न ह वै देवा अश्नन्ति न पिवन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति’ (छा. उ. ३/६/१) इति श्रुतिरेव प्रमाणम्। अतः–

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ (श्री. म. गी. ९/२६)

इति श्लोक–व्याख्याने आचार्यपादेन यथार्थतया भणितम्– पत्रं पुष्पं फलं तोयमन्यद्वा अनायास–लभ्यं यत् किंचिद्वस्तु यः कश्चिदपि नरो मे मह्यंमनन्त–महाविभूति–पतये परमेश्वराय भक्त्या न वासुदेवात् परमस्ति किंचिदिति बुद्धि–पूर्विकया प्रीत्या प्रयच्छति ईश्वराय भृत्यवदुपकल्पयति मत्स्वत्त्वानास्पद–द्रव्याभावात् सर्वस्यापि जगतो मयैवार्जितत्वात्, अतो मदीयमेव सर्वं मह्यमर्पयति जनः तस्य प्रीत्या प्रयच्छतः प्रयतात्मनः शुद्धबुद्धेस्तत् पत्रपुष्पादि तुच्छमपि वस्तु अहं सर्वेश्वरोऽश्नामि अशनवत् प्रीत्या स्वीकृत्य तृप्यामि[58] इति।

ब्राह्मणत्व–तपस्वित्वादिकं भगवत्स्वीकरण–निमित्तं भवितुं नार्हति। श्रीभगवतः श्रीदाम–नामधेय–ब्राह्मणानीत–तण्डूलकण–भक्षणमत्र दृष्टान्तरूपेण स्मर्यते। भगवद्भजनं कीदृशमित्युक्ते नित्य–नैमित्तिक–कर्मणां भगवदर्पणमवधेयम्। अवश्यंभावि–कर्मणां परमेश्वरे समर्पणमेव भगवद्भजनम्। एतादृशं समर्पण–फलस्य समर्पक–निष्ठत्वात् श्रीभगवति तत् किमपि फलं नोत्पद्यते। एतदर्थमेव –

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।

यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥ (श्री. म. गी. ९/२७)

इति श्लोके 'कुरुष्व' इति आत्मनेपद–विधानं क्रियते। सर्वमेतद् टीकायां स्पष्टीक्रियते– ...तेन यत्तव प्राणिस्वभाव–वशाद्विनापि शास्त्रमवश्यंभावि गमनाशनादि, यच्च शास्त्र–वशादवश्यंभावि होम–दानादि हे कौन्तेय! तत्सर्वं लौकिकं वैदिकं च कर्म अन्येनैव निमित्तेन क्रियमाणं मदर्पणं मय्यर्पितं यथा स्यात्तथा कुरुष्व। आत्मनेपदेन समर्पक–निष्ठमेव समर्पण–फलं न तु मयि किंचिदिति दर्शयति। अवश्यंभाविनां कर्मणां मयि परमगुरौ समर्पणमेव मद्भजनं न तु तदर्थं पृथग्–व्यापारः कश्चित् कर्तव्य इत्यभिप्रायः[59] इति।

श्रीभगवान् भक्तानेवानुगृह्णाति न त्वभक्तान् इत्यनेन परमेश्वरस्य राग–द्वेषवत्वं नाशङ्कनीयम्। सद्रूपेण स्फुरण–रूपेणानन्द–रूपेण च स सर्वेषां सविधे तुल्यरूपेण प्रतीयते। तर्हि भक्ताभक्तयोः फल–वैषम्यं निर्मलान्तःकरणेन सदा भगवदाकारा वृत्तिः उत्पादयन्तः श्रीभगवति वर्तन्ते। एवमति–स्वच्छ–भक्तचित्तवृत्तौ प्रतिबिम्बितो भूत्वा श्रीभगवान् तत्र अवस्थीयते। स्वच्छ–द्रव्यस्य स्वभावोऽयं येन स संबध्यते तदाकारं गृह्णाति। सर्वत्र समोऽपि श्रीभगवान् स्वच्छे भक्तचित्तेऽभिव्यज्यते न त्वस्वच्छे भक्तचित्ते इति स्पष्टीक्रियते *गूढार्थदीपिका*यां टीकाकारेण– कोऽसौ मयि ते ये मदर्पितैर्निष्कामैः कर्मभिः शोधितान्तःकरणास्ते निरस्त–समस्त–रजस्तमोमलस्य सत्त्वोद्रेकेणाति–स्वच्छस्यान्तःकरणस्य सदा मदाकारां वृत्तिमुपनिषन्मानेनोत्पादयन्तो मयि वर्तन्ते। अहमप्यति–स्वच्छायां तदीय–चित्तवृत्तौ प्रतिबिम्बितस्तेषु वर्ते[60] इति।

भगवद्भक्तेः महिमेयं यत् वासुदेवस्य भक्तोऽति–दुराचारोऽपि प्राण–संकटापन्नोऽपि न प्रनश्यति। अजामिल–प्रह्लाद–ध्रुव–गजेन्द्रादयश्चात्र दृष्टान्तरूपेण स्मर्तव्याः। श्रीभगवदाश्रय एव श्रेयोलाभस्योपायभूतः। भगवच्छरणेन सर्वविधा विपत्तिः दूरमपसरति। भगवदेक–शरणः परमानन्द–घनं सर्वोपद्रव–शून्यमभयमेव प्राप्स्यतीति नवमाध्यायान्ते टीकाकृता सम्यक्तयोच्यते–

श्रीगोविन्दपदारविन्दमकरन्दास्वादशुद्धाशयाः संसाराम्बुधिमुत्तरन्ति सहसा पश्यन्ति पूर्णं महः। वेदान्तैरवधायन्ति परमं श्रेयस्त्यजन्ति भ्रमं द्वैतं स्वप्नसमं विमलां विदन्ति चानन्दताम्॥[61] इति।

प्रेम–पूर्वकं भगवद्भजनं दशमाध्याये निरूपितम्। येषां चित्तवृत्तयः सदा श्रीभगवति वर्तन्ते, येषां चक्षुरादीन्द्रिय–व्यापाराः श्रीभगवद्भजनार्थमेव किं वा येषां प्राणा भगवद्भजनातिरिक्त–प्रयोजन–शून्यतया प्रतीयत इति प्रेम–पूर्वकं भगवद्भजनं विभूतियोगाध्याये–

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥ (श्री. म. गी. १०/९)

इत्यस्मिन् श्लोक–टीकायां विहितम्– ...मयि भगवति चित्तं येषां ते मच्चित्ताः। तथा मद्गता मां प्राप्ताः प्राणाश्चक्षुरादयो येषां ते मद्गत–प्राणा मद्भजन–निमित्त–चक्षुरादि–व्यापारा मय्युपसंहृत–सर्वकरणा वा। अथवा मद्गत–प्राणाः मद्भजनार्थ–जीवना मद्भजनातिरिक्त–प्रयोजनशून्य–जीवना इति यावत्[62] इति। भगवद्भक्ता भगवत्तत्वम् अन्योन्यं कथयन्ति स्वशिष्येभ्यश्च उपदिशन्ति। श्रीभगवति चित्तार्पणेन ते तुष्यन्ति सन्तोषं प्राप्नुवन्ति च। सन्तोषादनुत्तम–सुखलाभो भवतीति पातञ्जल–सूत्रवचनं तथा सन्तोषलभ्य–सुखं कामनालभ्य–सुखाद् महदिति पुराण–वचन–समर्थन–पुरःसरमाचार्यपादेन प्रोक्तम्– विद्वद्गोष्ठीषु परस्परमन्योन्यं श्रुतिभिर्युक्तिभिश्च मामेव बोधयन्तः तत्त्व–वुभुत्सु–कथया ज्ञापयन्तः। तथा स्वशिष्येभ्यश्च मामेव कथयन्त उपदिशन्तश्च। मयि चित्तार्पणं तथा बाह्य–करणार्पणं तथा जीवनार्पणमेवं समानामन्योन्यं मद्बोधनं स्वन्यूनेभ्यश्च मदुपदेशनमित्येवंरूपं मद्भजनं तेनैव तुष्यन्ति च, एतावतैव लब्ध–सर्वार्था वयमलमन्येन लब्धव्येनेत्येवं–प्रत्ययरूपं सन्तोषं प्राप्नुवन्ति च। तेन सन्तोषेण रमन्ति च रमन्ते च प्रिय–संगमेनेव उत्तमं सुखमनुभवन्ति। तदुक्तं पतञ्जलिना 'सन्तोषादनुत्तमः सुखलाभः' इति। उक्तं च पुराणे 'यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम्। / तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्॥' इति। तृष्णाक्षयः सन्तोषः[63] इति। बुद्धियोगमाश्रित्य भगवत्तत्त्व–विषयक–सम्यग्दर्शनेन परमभक्तः ईश्वरमात्मत्वेन प्राप्नोतीति सम्यक्तयोक्तं टीकाकारेण– येन बुद्धियोगेन मामीश्वरमात्मत्वेनोपयान्ति ये मच्चित्तत्वादि–

प्रकारैर्मां भजन्ते ते[64] इति। प्रीतिपूर्ण–भजनेन श्रीभगवत्कृपया च भक्तस्य बुद्धियोग–प्राप्तिर्भवति। बुद्धियोगोऽयं परमतत्त्व–लाभस्य मूलीभूत–कारणम्। सुसंस्कृता बुद्धिः तत्त्वलाभस्योपायरूपेव। प्रेमभजन–महिम्ना तत्त्वमिदमुपलभ्यते। ज्ञानमेव साक्षान्मोक्ष–प्रापकरूपम्। श्रीभगवदनुकम्पया प्रेम–भजनेनैव ज्ञानमिदं समुपलभ्यते।

कृत्स्नमिदं जगति यद्यद्विभूतिमदैश्वर्य–युक्तं किं वा बलाद्यतिशयेन युक्तं तत्सर्वं श्रीभगवतः शक्तेरंशेन संभूतम्। लोकेऽस्मिन् भगवद्व्यतिरिक्तं किंचिद् नास्तीत्युक्त्वा विभूति–योगस्यान्तिमे श्रीमन्मधुसूदनेन यद् भणितं तेन भक्तिभाव–पराकाष्ठा द्योतिता–

कुर्वन्ति केऽपि कृतिनः क्वचिदप्यनन्ते स्वान्तं विधाय विषयान्तरशान्तिमेव।
त्वत्पादपद्मविगलन्मकरन्दविन्दुमास्वाद्य माद्यति मुहुर्मधुभिन्मनो मे॥[65] इति।

एकान्तभक्ताय श्रीभगवदनुकम्पा केन प्रकारेणैव प्रयुज्यते सा पार्थाय विश्वरूप–दर्शनमुखेन प्रदर्श्यते। तत्र एकादशाध्यायगते–

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम्॥ (श्री. म. गी. ११/९)

श्लोकेऽस्मिन् टीकाकारेण सुष्ठूतया प्रोक्तम्- महायोगेश्वरो हरिर्भक्तानां सर्वक्लेशापहारी भगवान् दर्शनायोग्यमपि दर्शयामास पार्थाय एकान्त–भक्ताय परमं दिव्यं रूपमैश्वरम्[66] इति।

भगवत्साक्षात्कारः केन प्रकारेणैव संभवेदिति विषयेऽपि आचार्यपादेनोक्तं केवलम् अनन्यया एव भक्त्या भगवत्स्वरूप–साक्षात्कारः संभवः। अनन्यया भगवदेक–निष्ठया वा निरतिशय–प्रीत्या शास्त्रतः एवंविध–स्वरूपज्ञानम् उपलभ्यते। न हि केवलं शास्त्रतोऽनन्यया भक्त्या किं तु तत्त्वेन वेदान्तवाक्य–श्रवण–मनन–निदिध्यासन–परिपाक–निष्ठया भगवत्स्वरूप–साक्षात्कारः संभवः। भगवत्स्वरूप–साक्षात्कारादनन्तरम् अविद्या तत्कार्यमपि निवर्तते। सर्वमेतत्–

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुनः।

ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप॥ (श्री. म. गी. ११/५४)

इति श्लोकटीकायां स्पष्टीक्रियते श्रीमन्मधुसूदनेन– न केवलं शास्त्रतो ज्ञातुं शक्योऽनन्यया भक्त्या किं तु तत्त्वेन द्रष्टुं च स्वरूपेण साक्षात्कर्तुं च शक्यो वेदान्तवाक्य–श्रवण–मनन–निदिध्यासन–परिपाकेन। ततश्च स्वरूप–साक्षात्कारादविद्या–तत्कार्यनिवृत्तौ तत्त्वेन प्रवेष्टुं च मद्रूपतयैवाप्तुं चाहं शक्यो हे परन्तप[67] इति।

भगवल्लाभे सगुण–ब्रह्मविद्याया उपयोगित्वमपि निर्धारितं टीकाकारेण। मानवचित्तं जतुवत् काठिन्य–स्वभावमिति स्वीक्रियते। काम–क्रोधादि–विषयात्मक–तापकद्रव्य–संयोगेन चित्तं लाक्षा–द्रव्यवत् द्रवीभूतं जायते। अनन्य–शरणतया भगवति वासुदेवे मन आवेश्य ये उपासते ते युक्ततमाः। अहोरात्राणि श्रीभगवन्तं विषयान्तर–विमुखाः चिन्तयन्तो येऽतिवाहयन्ति तेषामेव युक्ततमत्वमत्राभिप्रेतम्। प्रसङ्गेऽस्मिन्–

मय्यावेश्य मनो मे मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः॥ (श्री. म. गी. १२/२)

इति श्लोकव्याख्याने टीकाकारेण यदुक्तं तदत्र प्रणिधानयोग्यम्– मयि भगवति वासुदेवे परमेश्वरे सगुणे ब्रह्मणि मन आवेश्यानन्य–शरणतया निरतिशय–प्रियतया च प्रवेश्य हिङ्गुलरस इव जतु तन्मयं कृत्वा ये मां सर्व–योगेश्वराणामीश्वरं सर्वज्ञं समस्त–कल्याणगुण–निलयं साकारं नित्ययुक्ताः सततोद्युक्ताः श्रद्धया परया प्रकृष्टया सात्त्विक्योपेताः सन्त उपासते सदा चिन्तयन्ति ते युक्ततमाः मे मम मता अभिप्रेताः। ते हि सदा मदासक्त–चित्ततया मामेव विषयान्तर–विमुखाश्चिन्तयन्तोऽहोरात्राण्यतिवाहयन्ति। अतस्त एव युक्ततमा मता अभिमताः[68] इति।

अत्र अचिन्त्यं तथा मनोवृत्तेरपि अविषयो ब्रह्मणो वाक्यगम्यत्वं कथं संभवेदित्याङ्का जायते। 'यतो वाचो निवर्तन्त अप्राप्य मनसा सह' (तै. उ. २/४) इति श्रुतौ ब्रह्मणः शब्दागम्यत्वं विनिर्णीतम्। कथं तर्हि 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृह. उ. ३/९/२६); 'दृश्यते त्वग्र्यया बुद्ध्या' (कठ. उ. १/३/१२) इति श्रुतिवचनानां तथा 'शास्त्रयोनित्वात्'[69] इति वेदान्त–

सूत्रार्थस्य उपपत्तिर्भवेत्? अत्रोल्लेख्यम्, अविद्या-कल्पित-संबन्धवशात् वेदान्तवाक्य-श्रवणजन्य-चरम-बुद्धिवृत्तौ परमानन्द-स्वरूपे शुद्धवस्तुनि प्रतिबिम्बिते कल्पितयोः अविद्या-तत्कार्ययोः निवृत्तिः भवत्येव। सर्वमेतत् स्पष्टीकृतं मधुसूदनेन- उच्यते, अविद्या-कल्पित-संबन्धेन शब्द-जन्यायां बुद्धिवृत्तौ चरमायां परमानन्द-बोधरूपे शुद्धे वस्तुनि प्रतिबिम्बितेऽविद्या-तत्कार्ययोः कल्पितयोर्निवृत्त्युपपत्तेरुपचारेण विषयत्वाभिधानात्[70] इति।

## ४.७. उपसंहृतिः

परमतत्त्वस्य यथार्थज्ञानं भक्त्या एव संभवति। परमतत्त्वं प्रति शुद्ध-चित्तस्याकर्षणमेव भक्तिः। आकर्षणमिदं गम्भीराद् गम्भीरतरं भूत्वा चित्तलयं करोति। स्वस्वरूपे परमतत्त्वस्य स्थितिस्तदा भवति। सर्वकरणोपाधि-संयोग-रहिततया शुद्ध-रूपेण स्वप्रकाश-तत्त्वं तदा स्फुरति। एतत्तु ज्ञान-पदवाच्यम्। प्रत्युतस्तु रजस्तमोमलासंस्पृष्टेन शुद्ध-सत्त्वगुण-विशिष्ट-चित्तेन विशुद्ध-सत्त्वोपाधि-समन्वितस्य परमतत्त्व-श्रीभगवतोऽनुभूतिरेव शुद्धा भक्तिः। भक्तिविवर्जित-शुष्क-विचारात्मक-ज्ञानं न वेदान्तशास्त्र-प्रतिपाद्यम्। केवलं भक्त्या पूर्ण-सत्य-ज्ञानानन्दघनः श्रीभगवन्तं साक्षात्क्रियते। तेन-

> भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
> ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ (श्री. म. गी. १८/५५)

इति श्लोक-व्याख्यायामाचार्य-पादेन सम्यक्तयोक्तम्- भक्त्या निदिध्यासनात्मिकया ज्ञान-निष्ठया मामद्वितीयमात्मानमभिजानाति साक्षात्करोति। यावान् विभुर्नित्यश्च यश्च परिपूर्ण-सत्य-ज्ञानानन्दघनः सदा विध्वस्त-सर्वोपाधिरखण्डैकरस एकस्तावन्तं चाभिजानाति। ततो मामेवं तत्त्वतो ज्ञात्वा अहमस्म्यखण्डानन्दाद्वितीयं ब्रह्मेति साक्षात्कृत्य विशते अज्ञान-तत्कार्य-निवृत्तौ सर्वोपाधि-शून्यतया मद्रूप एव भवति[७१] इति।

एवमद्वैतवेदान्त–मतानुसारिण आचार्य–पादस्य रचनायां वेदान्त–प्रतिपाद्य–सिद्धान्त–निचयेन सह भक्ति–मार्गस्यानुकूल–व्याख्यानानि अपि उपलभ्यन्ते। श्रीभगवतः ऐश्वर्यमहिम्नि तस्य समधिकी श्रद्धा आसीत्। प्रसङ्गेऽस्मिन्–

दुरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जयः।

बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥ (श्री. म. गी. २/४९)

इति श्लोक–व्याख्यायां ये फल–कामनया निकृष्टं कर्म कुर्वन्ति ते जन्म–मरणादि आवर्तन–चक्रेण अतीवदीना भवन्ति इत्युक्तम्। ते क्षुद्र–फलमात्र–लोभेन फलेच्छा–विरहित–कर्मानुष्ठानेन परमानन्दानुभव–विषये वञ्चिता इत्येतत्तासां दौर्भाग्यं 'कृपण'–पदेनात्र निर्णीतम्। अत्र मधुसूदन–सरस्वत्याः व्याख्यानशैली सहृदयान् भक्त–रसिकान् नितरां नन्दयन्ति– यथा हि कृपणा जना अतिदुःखेन धनमर्जयन्तो यत्किंचित् दृष्टसुख–मात्र–लाभेन दानादि–जनितं महत् सुखमनुभवितुं न शक्नुवन्तीत्यात्मानमेव वञ्चयन्ति तथा महता दुःखेन कर्माणि कुर्वाणाः क्षुद्रफल–मात्र–लोभेन परमानन्दानुभवेन वञ्चिता इत्यहो दौर्भाग्यं मौढ्यं च तेषामिति कृपणपदेन ध्वनितम्[72] इति।

पुनश्च–

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ (श्री. म. गी. १८/६६)

इति श्लोक–व्याख्याने अनन्तं परमानन्दघन–मूर्त्तिं श्रीवासुदेवमेव भजस्व इत्युक्त्वा भगवच्छरणागतेः भेदत्रय–व्याख्याने आचार्यपादेन यदुक्तं तेन रसिक–भक्तस्य द्रवीभूत–चित्तं परमानन्देनाप्लुतम्–

तस्यैवाहं ममैवासौ स एवाहमिति त्रिधा।

भगवच्छरणत्वं स्यात् साधनाभ्यासपाकतः॥

...

तत्राद्यं मृदु यथा–

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः॥

द्वितीयं मध्यं यथा–

हस्तमुत्क्षिप्य यातोऽसि बलात् कृष्ण किमद्भूतम्।
हृदयाद्यदि निर्यासि पौरुषं गणयामि ते॥

तृतीयमधिमात्रं यथा–

सकलमिदमहं च वासुदेव! परमपुमान् परमेश्वरः स एकः।
इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान् विहाय दूरात्॥[73] इति।

भक्तिज्ञानयोगयोः अपूर्व–समन्वयोऽप्यत्र प्रतिष्ठितः।

अन्ते वक्तव्यम्, श्रीकृष्णतत्त्व–भिन्न–परमतत्त्वं नास्तीति मधुसूदनेन यत् प्रोक्तं तन्न अद्वैतमत–विरुद्धम्। आचार्यपादाभिप्रेतं साकार–कृष्णोपासनम् उपास्य–परम–तत्त्वमेव। उपास्य–तत्त्वेषु वासुदेवस्य श्रेष्ठत्वात् तथा च भगवतः ज्ञेय–तत्त्वस्य निर्गुणत्वाद् निर्विशेषत्वादपि श्रीहरि–तत्त्वेन अद्वैत–तत्त्वं न खण्डितमित्यलमति–विस्तरेणेति शम्।

[1] गू. दी. , *गीता* ७/१६
[2] गू. दी. , *गीता* १८/६६
[3] गू. दी. , *गीता* १८/६५
[4] कै. उ. २
[5] ना. भ. सू. १९
[6] तत्रैव, सूत्रसंख्या २
[7] तत्रैव, सूत्रसंख्या ५१
[8] शा. सू. २
[9] शा. सू. भा. , पृष्टाङ्कः ५–६
[10] प. स. ४/७१
[11] भा. पु. ७/१/३१
[12] कै. दी. टी.
[13] श्री. भा. १/१/१
[14] प. प. सं. ४/७१
[15] ना. शा. ६/३६
[16] तै. उ. २/७
[17] ना. शा. , अध्यायः ६
[18] म. भा. , शान्तिपर्वणि– ३५७/२३ श्लोकटीकायाम्
[19] कू. पु. , अध्यायः ११
[20] ब्र. वै. पु. ५८/५१
[21] प. पु. १/३१/११३
[22] ब्र. वै. पु. १/२/४८
[23] ग. पु. २२०/७
[24] भा. पु. ९/४/६
[25] अ. वु. स. २८/८१–८२
[26] तदेव ३७/२७
[27] प. स. ४/७२
[28] बृ. ब्र. स. २/५/५६
[29] ना. प. रा. २/३/३८
[30] ना. प. रा. २/३६

[31] सा. सं. ७/१०७–१०८
[32] ब्र. सू. ३/२/२४
[33] शा. भा. ३/२/२४
[34] छा. उ.– ८/१/५
[35] कठ. उ.– २/३/२
[36] बृह. उ.– ३/८/९
[37] श्री. भा.– १/१/२७–२८
[38] ष. स.– ७६६
[39] कै. दी. टी. ११/१
[40] तन्त्रैव
[41] गू. दी. , उपक्रमणिका–६
[42] गू. दी. , उपक्रमणिका–९
[43] गू. दी. , उपक्रमणिका–३१,३२
[44] गू. दी. , उपक्रमणिका–४०
[45] गू. दी. , *गीता* ७/१
[46] तन्त्रैव
[47] गू. दी. , *गीता* ७/१४
[48] तन्त्रैव
[49] तन्त्रैव
[50] तन्त्रैव
[51] तन्त्रैव
[52] गू. दी. , *गीता* ७/२५
[53] तन्त्रैव
[54] गू. दी. , *गीता* ८/१५
[55] ब्र. सू. १/३/३०
[56] गू. दी. , *गीता* ८/१९
[57] गू. दी. , *गीता* ९/२५
[58] गू. दी. , *गीता* ९/२६
[59] गू. दी. , *गीता* ९/२७
[60] गू. दी. , *गीता* ९/२९
[61] गू. दी. , *गीता* ९/३४
[62] गू. दी. , *गीता* १०/९
[63] गू. दी. , *गीता* १०/९
[64] गू. दी. , *गीता* १०/१०
[65] गू. दी. , *गीता* १०/४२
[66] गू. दी. , *गीता* ११/९
[67] गू. दी. , *गीता* ११/५४
[68] गू. दी. , *गीता* १२/२
[69] ब्र. सू. १/१/३
[70] गू. दी. , *गीता* १२/३
[71] गू. दी. , *गीता* १८/५५

[72] गू. दी. , *गीता* २/४९
[73] गू. दी. , *गीता* १८/६६

**********

# पञ्चमोऽध्यायः

## *गूढार्थदीपिका*यां ज्ञानयोगतत्त्वम्

### उपोद्घातः

मधुसूदनसरस्वतीपादकृता *श्रीमद्भगवद्गीता*या *गूढार्थदीपिका*टीकायां ज्ञानयोगतत्त्वं केन प्रकारेणैव विधृतं तदेवास्मिन्नध्याये विशदीक्रियते। अष्टादशाध्यायसमन्वित–*श्रीमद्भगवद्गीतो*पनिषदं षट्कत्रयेण विभज्य ज्ञानकर्मणोः समन्वयाभावात् तृतीयषट्के ज्ञाननिष्ठातत्त्वम् आलोचितं श्रीमन्मधुसूदनसरस्वतीपादेन–

एकमेकेन षट्केन काण्डमत्रोपलक्षयेत्।
कर्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमान्त्ययोः॥[1] इति।

पृथक्–पृथक्–षट्के कर्म–भक्ति–ज्ञानतत्त्वानि विधृतेऽपि तेषां घनिष्ठसंबन्धाः सन्ति। यतः प्रथमषट्के कर्म तत्त्यागवर्त्मना च विशुद्धात्मा त्वं–पदार्थः; द्वितीयषट्के भगवद्भक्तिनिष्ठावर्णनवर्त्मना परमानन्दस्वरूपस्तत्पदार्थः; तृतीयषट्के च तत्–त्वं पदार्थयोः एकत्वं वर्ण्यते–

तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम्।
एवमप्यत्र काण्डानां संबन्धोऽस्ति परस्परम्॥[2] इति।

ज्ञानयोगपरं तृतीयषट्कमवलम्ब्य एवात्र पर्यालोचनं क्रियते।

### कोऽयं ज्ञानयोगः

अखिलवेदार्थसार–संग्रहभूतं *श्रीमद्भगवद्गीता*शास्त्रं योगमूलमिति निर्विवादम् एव। बहवोऽर्थाः सन्ति योगशब्दस्य। परमात्मना सह जीवात्मनः संयोगेन किंवा चित्तवृत्तिनिरोधेन योगस्य

संसिद्धिः भवति। अष्टाङ्गयोगस्य परमावस्थायां समाधावेव योगसिद्धिर्भवितुमर्हति। पुनश्च सिद्ध्यसिद्ध्योः समत्वरूप–चित्तसमाधानस्य योगपदवाच्यत्वं *श्रीमद्भगवद्गीताया*ं निर्धारितम्–

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जयः।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ (श्री. म. गी. २/४८) इति।

तत्र ज्ञायतेऽनेनेति ज्ञानमिति व्युत्पत्त्या परमात्मज्ञानसाधनमेव ज्ञानम्। परमात्मज्ञान–साधनत्वाज् ज्ञानस्य श्रेष्ठत्वमवधारणीयम्। उत्तमफलप्रदायकत्वाद् बहिरङ्ग–यज्ञादि–साधनानां मध्ये ज्ञानस्य सर्वोत्तमत्वमङ्गीकरणीयम्। प्रसङ्गेऽस्मिन् *गूढार्थदीपिकाया*ं सम्यगेवोक्तम्– ज्ञायतेऽनेनेति ज्ञानं परमात्मज्ञानसाधनं परं श्रेष्ठं परवस्तुविषयत्वात्। कीदृशं तत्, ज्ञानानां ज्ञानसाधनानां बहिरङ्गानां यज्ञादीनां मध्ये उत्तममुत्तमफलत्वात्, न त्वमानित्वादीनां, तेषामन्तरङ्गत्वेनोत्तमफलत्वात्[3] इति।

## *गूढार्थदीपिकाया*ं ज्ञानयोगतत्त्वम्

जीवब्रह्मैक्यज्ञानमेव परमाद्वैततत्त्वज्ञानम्। तत्त्वज्ञानेन अविद्याया निवृत्तिस्तथा अविद्याया आवरणशक्तिक्षये विक्षेपशक्तिरूपभ्रमस्यापि क्षयं भवेत्–

अविद्यानिवृत्तिस्तु तत्त्वज्ञानोदये भवेत्।
तत आवरणे क्षीणे क्षीयेते भ्रमसंशयौ॥[4] इति।

तत्त्वज्ञानोदये अनारब्धकर्मणां सम्यक् नाशे आगामिनि कर्मजनितानि अदृष्टान्यपि नोत्पद्यते। उक्तं चाचार्येण–

अनारब्धानि कर्माणि नश्यन्त्येव समन्ततः।
न त्वागामीनि जायन्ते तत्त्वज्ञानप्रभावतः॥[5] इति।

प्रथमषट्कद्वये तत्त्वं–पदार्थयोः अर्थनिर्धारणात् परं तृतीयषट्के परमात्मना सह जीवस्याभेदरूपतत्त्वज्ञानं प्रारभ्यते। परमात्मजीवात्मनोः भेदभ्रमं सर्वानर्थकारणमिति टीकायामुक्तम्– प्रथममध्यमषट्कयोस्तत्त्वं पदार्थावुक्तावुत्तरस्तु षट्को वाक्यार्थनिष्ठः

सम्यग्धीप्रधानोऽधुना आरभ्यते। ...तच्चाद्वितीयेन परमात्मना सह जीवस्याभेदमेव विषयीकरोति, तद्भेदभ्रमहेतुकत्वात् सर्वानर्थस्य[6] इति। भेदस्य अविद्याकल्पितानात्मधर्मत्वात्तस्मात् चेतनजीवस्य भिन्नत्वमवधारणीयम्। तेन असंसारिणैकेन परमात्मना सह जीवस्याभेदोऽस्तीति प्रतिपादितम्। अद्वैततत्त्वस्यावबोधार्थं देहेन्द्रियान्तःकरणविशिष्टक्षेत्रेभ्यो विवेकेन क्षेत्रज्ञः पुरुषो जीवः प्रतिक्षेत्रमेक एवेति प्रतिपादनाय क्षेत्रक्षेत्रज्ञयोः विचारः क्षेत्रक्षेत्रज्ञविभागयोगशीर्षके त्रयोदशाध्याये क्रियते। इन्द्रियान्तःकरणसहितम् अस्मदादीनां भोगायतनं शरीरं क्षेत्रमुच्यते। प्रत्युतः एतद् यो वेत्ति अहं ममेत्यभिमन्यते तं क्षेत्रज्ञ इत्यभिधीयते। स्वप्रकाशचैतन्यरूपं क्षेत्रज्ञं तथा अविद्याध्यारोपित–कर्तृत्वभोक्तृत्वादि–संसारधर्ममाविद्यकरूप–परित्यागेन ईश्वरम् असंसारिणम् अद्वितीय–ब्रह्मानन्दाभेदेरूपेण ज्ञेयम्। क्षेत्रज्ञस्वरूपस्यावबोधेन क्षेत्रक्षेत्रज्ञयोर्विवेकः अवज्ञायते। अतः क्षेत्रं मायाकल्पितं मिथ्यारूपं परं क्षेत्रज्ञश्च परमार्थसत्यम् अधिष्ठानस्वरूपश्च। क्षेत्रक्षेत्रज्ञयोः ज्ञानमिदं मोक्षसाधनम्। उच्यते च दीपिकायाम्– एवं च क्षेत्रं मायाकल्पितं मिथ्या, क्षेत्रज्ञश्च परमार्थसत्यस्तद्भ्रमाधिष्ठानमिति क्षेत्रक्षेत्रज्ञयोर्यज् ज्ञानं तदेव मोक्षसाधनत्वाज् ज्ञानम् अविद्याविरोधिप्रकाशरूपं मम मतम् अन्यत्वज्ञानमेव तदविरोधित्वादित्यभिप्रायः[7] इति। क्षेत्रक्षेत्रज्ञयोर्ज्ञानं ब्रह्मसूत्रादवगम्यते। ब्रह्म सूत्र्यते सूच्यते किंचिद्व्यवधानेन प्रतिपाद्यते एभिरिति ब्रह्मसूत्राणि इति व्युत्पत्त्या ब्रह्मसूत्रपदेन 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति' (तै. उ.– ३/१) इत्यादीनि उपनिषद्वाक्यानि एव बोध्यते। उपक्रमोपसंहारवाक्याभ्यां संशीतिशून्यार्थप्रतिपादक–ब्रह्मणः स्वरूपादिलक्षणपराणि उपनिषद्वाक्यानि बहुधा गीतमेव।

इच्छाद्वेषप्रयत्नादारभ्य शरीरेन्द्रियसंघातपर्यन्तं सर्वस्य क्षेत्रज्ञत्वमिति भिन्नवादिनां मतसत्त्वेऽपि एतेषां क्षेत्रस्वरूपं कथमुपयुज्यत इत्याशङ्कायामुक्तं महाभूतादिसर्वं सविकारयुक्तमेव। तेन स्वोत्पत्तिविनाशयोः द्रष्टुमशक्यत्वात्ते न विकारसाक्षी। स्वेनैव स्वदर्शने कर्तृकर्मविरोधप्रसङ्ग आयाति। अतः साक्षी निर्विकार एव। विक्रियामन्तरेण दुःखी तथा विकारिणः साक्षिता भवितुं

नार्हति। एतेन क्षेत्रचिह्नं विकारित्वमिति निर्विवादमेव। एवं क्षेत्रस्वरूपं निरूप्य तत्साक्षिणं क्षेत्रज्ञं क्षेत्राद्विवेकेन प्रतिपादितम्।

ज्ञानहेतुत्वविषये भक्तेरुपयोगित्वमत्र प्रतिपादितम्। भगवतो वासुदेवस्य सर्वोत्कृष्टत्वज्ञानपूर्विका प्रीतिः भक्तिरूपेणात्र ज्ञातव्या। वासुदेवात् परो नान्योऽस्ति स एव अस्माकं गतिरित्येवम् अव्यभिचारिणी भक्त्याः ज्ञानहेतुत्वमप्यत्र निर्धारितम्– किं च मयि च भगवति वासुदेवे परमेश्वरे भक्तिः सर्वोत्कृष्टत्वज्ञानपूर्विका प्रीतिः। अनन्ययोगेन नान्यो भगवतो वासुदेवात् परोऽस्त्यतः स एव नो गतिरित्येवंनिश्चयेनाव्यभिचारिणी केनापि प्रतिकूलेन हेतुना निवारयितुमशक्या। सा अपि ज्ञानहेतुः 'प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावदि'त्युक्तेः[8] इति।

कश्च वेदान्तज्ञानाधिकारीति विषये उक्तं वेदान्तवाक्यार्थज्ञाने विवेकनिष्ठस्य सामर्थ्यमस्ति। तत्र आत्मानमधिकृत्य प्रवृत्तम् अध्यात्मम्; पुनः आत्मानात्मविवेकज्ञानमध्यात्मज्ञानं तस्मिन् नित्यत्वं तत्रैव निष्ठावत्त्वम् अध्यात्मज्ञाननित्यत्वमेव। एतेन आत्मानात्मविवेकज्ञानपरायणस्य वेदान्तवाक्यार्थज्ञानं संभवेदित्यभिप्रायः। 'तत्त्वमस्या'दिवेदान्तवाक्यश्रवणाद् आत्मसाक्षात्कार–रूपतत्त्वज्ञानं तथा अविद्यातत्कार्यात्मकनिखिलदुःखनिवृत्तिस्तथा परमानन्दात्मावाप्तिरूपो मोक्षश्च भवति। महावाक्यजन्यज्ञानेन जीवब्रह्मात्मैक्यज्ञानं कथं संभवेदित्याशङ्कायामुच्यते वाक्यार्थज्ञानं पदार्थज्ञानमपेक्षते। 'तत्त्वमस्या'दि–महावाक्यार्थविचारप्रसङ्गेऽपि विषयोऽयं प्रयुज्यते। चत्वारो वेदाः महावाक्यमधिकृत्य पल्लवितमिति दृश्यते। तत्र 'प्रज्ञानं ब्रह्म'(ऐ. आ.– ३/३); 'अहं ब्रह्मास्मि'(बृह. उ.– १/४/१०); 'तत्त्वमसि'(छा. उ.– ६/८/७); 'अयमात्मा ब्रह्म'(मा. उ.– २) इति महावाक्यचतुष्टयं प्राप्यते। महतः तात्पर्यस्य प्रतिपादनाद् महावाक्यं किं वा परमपुरुषार्थप्रत्यग्–ब्रह्मैक्यनिष्ठत्वाद् महावाक्यमिति सार्थकनामधेयम्। तथा चोक्तं सर्वज्ञात्ममुनिना–

विना महावाक्यमतो न कश्चित् पुमांसमद्वैतमवैति जन्तुः। (सं. शा.– ३/३०३) इति।

अत्र 'तत्त्वमसी'ति महावाक्यं संबन्धत्रयेण अखण्डात्मकस्य ज्ञापकम्। वाक्यमिदं श्रवणात् परं 'तत्' 'तम्' चेति पदद्वयस्य प्रथमान्तत्वाद् भिन्नप्रवृत्तिनिमित्तकत्वाच्च तयोरभिन्नपदार्थ–बोधकत्वमवगम्यते। पुनः नीलमुत्पलमितिवाक्यवत् विशेष्यविशेषणभावावलम्बनेन गौणोऽभेदोऽत्र संभवेत् न वेति विचार्यम्। यतोऽभिधया सामानाधिकरण्यस्य उपपत्त्या लक्षणा अपि परिहरणीया। किं त्वत्र तत्त्वमिति विशेष्यपदद्वयस्य अभिधेयार्थस्य परस्परभिन्नत्वात् लक्षणया मुख्योऽभेदो बोध्यव्यः। एवं संबन्धत्रयस्य क्रमिकत्वमवज्ञायते। विषयोऽयं *संक्षेपशारीरके* एवं समुपवर्ण्यते–

सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः।
पश्चादेष विशेषणेतरतया पश्चाद्विरोधोद्भवः॥

उत्पन्ने च विरोधे एकरसके वस्तुन्यखण्डात्मके।
वृत्तिर्लक्षणया भवत्ययमिह ज्ञेयः क्रमः सूरिभिः॥(सं. शा.– १/१९६)

इति।

अत्रोल्लेख्यम्, अखण्डार्थ एवात्र लक्ष्यम्। भेदरहितब्रह्म एवाखण्डार्थः। महावाक्येन सह अखण्डार्थस्य संबन्धज्ञापनार्थम् एकप्रातिपदिकार्थपरता एव अखण्डार्थता इत्युच्यते। किं वा वाक्यस्य विशेष्यमात्रपरता एव अखण्डार्थता। वाक्यस्थपदनिचयो मिलितरूपेण एकस्य प्रातिपदिकस्यार्थमेव ज्ञापयति, तदेव अखण्डार्थः। यथा, 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्र सत्यादिपदसमूहो ब्रह्मेति प्रातिपदिकार्थस्यार्थं बोधयति। अत्र स्वार्थ एव प्रातिपदिकार्थः। वाक्येऽस्मिन् ब्रह्म एव विशेष्यपदम्; विशेष्यार्थपरता एवात्र अखण्डार्थता। विशेष्यमात्रबोधकत्वात् 'तत्त्वमसी'ति वाक्यस्यापि अखण्डार्थकत्वं स्वीकरणीयमिति ह्यद्वैताचार्याणामभिमतम्। वाक्यादखण्डार्थस्य प्रतीतिः कथं भवेदिति शङ्कायामुच्यते, आकाङ्क्षा–योग्यता–सन्निधियुक्त–पदसमूहस्य वाक्यपदलक्षणत्वाद् विशिष्टार्थप्रतिपादनार्थं परस्पराकाङ्क्षादिविशिष्टपदसमूहः प्रयुज्यते। पूर्वोक्तवाक्यलक्षणात् निर्विशेषे अर्थे शब्दस्य शक्तिर्न गृह्यत इत्यपि प्रतीयते।

अत्र पूर्वपक्षैः उच्यते, आकाङ्क्षादिधर्मत्रये वर्तमाने सति तत्रैव वाक्यत्वं विशिष्टार्थत्वमपि वर्तते। अतो वाक्यत्वेन सह निर्विशेषार्थबोधकत्वस्य परस्परविरुद्धत्वमवज्ञेयम्। एवं स्थिते 'तत्त्वमसीति वाक्यम् अखण्डार्थबोधकं वाक्यत्वात् सोऽयं देवदत्त इति वाक्यवत्' इत्यनुमितौ 'वाक्यत्वात्' इति हेतोः स्वरूपासिद्धिदोषदुष्टत्वं *शतदूषणी*कारेण एवं प्रदर्शितम्–

वाक्यत्वात् इति हेतुश्च स्वरूपासिद्धितां व्रजेत्।

आकाङ्क्षादित्रयाभावे, तद्भावे क्वाप्यविशिष्टधीः॥ इति।

पूर्वपक्षिकृताशङ्कायाः निराकरणमेवं क्रियते– अद्वैतमतेन सखण्डार्थकस्तथा अखण्डार्थकरूपेण वाक्यं हि द्विविधम्। सखण्डार्थकस्य संसृष्टार्थकस्य वा भेदसंसर्गार्थकः अभेदसंसर्गार्थकश्चेति भेदद्वयमस्ति। वाक्यविशेषस्याखण्डार्थबोधकत्वस्वीकरणार्थं लक्षणायाः पदवृत्तित्वं तथा वाक्यवृत्तित्वमपि तैरङ्गीक्रियते। वाक्यस्य अखण्डार्थबोधकत्वे तात्पर्य एव नियामकः। तात्पर्यानुसारेण शब्दः अभिधया लक्षणया व्यञ्जनावृत्त्या च अभिप्रेतार्थं प्रतिपादयति। वाक्यमपि तात्पर्यानुबोधेन विशेष्यमात्रस्य किं वा विशिष्टार्थस्य च बोधको भवति। पुरुषस्य वेदस्य चाभिप्रायोऽत्र तात्पर्यम्। अखण्डार्थप्रतिपित्सया 'तत्त्वमसी'ति वाक्यम् उच्चारितमिति हि तेषां मतम्। पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति संबन्धत्रयेण 'तत्त्वमसि'–महावाक्यम् अखण्डार्थबोधकं भवति।

तत्र सामानाधिकरण्यसंबन्धः आदौ समुपवर्ण्यते। भिन्नप्रवृत्तिनिमित्तयोः शब्दयोः एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्। यथा, 'सोऽयं देवदत्तः' इति वाक्ये स इति तत्पदस्य तत्कालतद्देशवैशिष्ट्यं प्रवृत्तिनिमित्तम्, एतत्कालैतद्देशवैशिष्ट्यम् अयं–शब्दस्य प्रवृत्तिनिमित्तम्; तथा च भिन्नप्रवृत्तिनिमित्तयोः सोऽयं–शब्दयोः एकस्मिन् देवदत्तपिण्डे तात्पर्यसंबन्धः सामानाधिकरण्यमित्यर्थः। एवं 'तत्त्वमसी'ति वाक्येऽपि परोक्षत्व–सर्वज्ञत्वादिवैशिष्ट्यं तत्पदप्रवृत्तिनिमित्तम् अपरोक्षत्वकिंचिज्ज्ञत्वादिवैशिष्ट्यं त्वं–पदप्रवृत्तिनिमित्तम्; तथा च भिन्नप्रवृत्तिनिमित्तयोः तत्त्वं–पदयोः एकस्मिन् चैतन्ये तात्पर्यसंबन्धः सामानाधिकरण्यमित्यर्थः।

विशेषणविशेष्यभावसंबन्धस्वरूपमप्यत्रालोच्यते। तत्र व्यावर्तकं विशेषणं व्यावर्त्तं च विशेष्यम्। 'सोऽयं देवदत्तः' इति वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्य अयं-शब्दार्थः एतत्कालविशिष्ट-देवदत्तस्य च अन्योन्यभेदव्यावर्तकतया विशेषण-विशेष्यभावः। एवं 'तत्त्वमसी'ति वाक्येऽपि तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वं-पदार्थापरोक्षत्वादि-विशिष्टचैतन्यस्य च अन्योन्यभेद-व्यावर्तकतया विशेषण-विशेष्यभावः।

पुनः लक्ष्यलक्षणभावसंबन्धस्वरूपमालोच्यते। असाधारणधर्मप्रतिपादकं वाक्यं लक्षणम्, तत्प्रतिपाद्यमविशिष्टं वस्तु लक्ष्यम्। तथा च 'सोऽयं देवदत्तः' इत्यस्मिन् वाक्ये सोऽयं-शब्दयोः तदर्थयोर्वा विरुद्धतत्कालैतत्काल-तद्देशैतद्देशविशिष्टपरिहारेणाविरुद्ध-देवदत्तविशिष्टदेवदत्त-पिण्डेन सह देवदत्तविशिष्टदेवदत्तवाचकशब्दस्य लक्ष्यलक्षणभावसंबन्धः। एवं 'तत्त्वमसी'ति वाक्येऽपि तत्त्वं-पदयोः तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादि-विशिष्टत्वपरित्यागेनाविरुद्ध-चैतन्येन सह तत्त्वं-पदयोः लक्ष्यलक्ष्यणभावसंबन्धः। तेन तत्त्वं-पदयोः तदर्थयोश्च त्यक्तविरुद्धांशयोः लक्षणत्वम्, अखण्डचैतन्यस्य लक्ष्यत्वमिति भावोऽत्र प्रतिपादितः। अत्रोल्लेख्यम्, तत्त्वमस्यादिवाक्यानां विरुद्धांशपरित्यागेन अविरुद्धचैतन्यमात्रबोधकत्वाद् इयमेव भागलक्षणा इत्युच्यते। लक्षणा अपि जहत्, अजहत्, जहदजहद्भेदेन त्रैविध्यं भजते। तत्र वाच्यार्थमशेषतः परित्यज्य तत्संबन्धिनि अर्थान्तरे या वृत्तिः सैव जहल्लक्षणा। प्रत्युत वाच्यार्थापरित्यागेन तत्संबन्धिनि अर्थान्तरे या वृत्तिः सैव अजहल्लक्षणा। पुनश्च वाच्यार्थैकदेशपरित्यागेन एकदेशवृत्तिः जहदजहल्लक्षणा इत्युच्यते। वाच्यार्थस्य अंशविशेषत्यागाद् इयं भागत्यागलक्षणा तथा भागमात्रस्य ग्रहणात् भागलक्षणा अप्युच्यते। 'तत्त्वमसी'ति वाक्यस्य परोक्षापरोक्षत्वादि-विशिष्टचैतन्यैकत्वलक्षणमुख्यार्थ-प्रतिपादकत्वासंभवाद् जहदजहत्-स्वार्थलक्षणया विरुद्ध-परोक्षत्वादिविशिष्टांशपरित्यागेन अविरुद्धाखण्डचैतन्यमात्रप्रतिपादकत्वम् अवज्ञेयम्। भागलक्षणया 'तत्त्वमस्या'दिमहावाक्यस्य तात्पर्यार्थः प्रत्यगात्मैकत्वे पर्यवस्यतीति बोधनार्थं सुरेश्वराचार्येण स्वकृत-*नैष्कर्म्यसिद्धौ* अप्युक्तम्-

सामानाधिकरण्यं च विशेषणविशेष्यता।

लक्ष्यलक्षणसंबन्धः पदार्थप्रत्यगात्मनाम्॥ (नै. सि.– ३/३) इति।

'तत्त्वमस्या'दि–वेदान्तवाक्यश्रवणात् दृश्यसकलजडपदार्थविलक्षणप्रत्यगात्मनः परमात्मना सह एकत्वबोधानन्तरम् आचार्योपदिष्टम् 'अहं ब्रह्मास्मी'ति वाक्यार्थमनुस्मरन् साक्षात्काररूपा अखण्डाकारान्तःकरणवृत्तिरुदेति। साधनचतुष्टयसंपन्नस्य अनुभवोऽयम् अपरोक्षरूपः। *यत् साक्षादपरोक्षं ब्रह्म* (बृह. उ.– ३/१/४) इति *बृहदारण्यक*श्रुतौ अपरोक्षस्वभावरूपं ब्रह्म उपदिष्टम्। शब्दजन्यत्वेऽपि अनुभवस्यास्य अपरोक्षात्मकत्वं सिद्धान्तिनामभिमतम्। 'अहं सुखी, दुःखी' इत्याकारात्मविषयकभ्रमोऽपि अपरोक्षरूपः। अपरोक्षसमानविषयकज्ञानेन अपरोक्षभ्रमो निवर्तते, नान्यथा। परोक्षज्ञानेन प्रत्यक्षभ्रमः कदापि न निवर्तनीयः। पुनः *अहं ब्रह्मास्मि* (बृह. उ.– १/४/१०) इत्यनुभवस्य परोक्षत्वे तेनैव अपरोक्षभ्रमनिवर्तकस्यानुपपत्तिर्भवेत्। अतः 'तत्त्वमस्या'दि–वाक्यजन्यज्ञानम् अपरोक्षरूपम् इत्यवधारणीयम्। *वेदान्तपरिभाषा*यामप्युच्यते– तज् ज्ञानम् अपरोक्षरूपं, परोक्षत्वे अपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः। (वे. प.– अष्टमः परिच्छेदः)। अत्रोल्लेख्यम्, इन्द्रियजन्यज्ञानस्य प्रत्यक्षत्वं पूर्वपक्षैः स्वीक्रियते। शब्दस्य प्रत्यक्षज्ञानजनकत्वे 'पर्वतो वह्निमान्' इति वाक्याद् अग्नेः प्रत्यक्षज्ञानं कथं न भवतीति तैरुच्यते।

अद्वैतिनामभिमतमिदम्– अत्र 'इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्' इति न स्वीकरणीयम्। तेषां मतेन, प्रत्यक्षत्वापरोक्षत्वं न हि करणनिबन्धनं तु प्रमेयनिबन्धनमेव। *वेदान्तपरिभाषा*यामुक्तम्– संविदापरोक्ष्यं न करणविशेषोत्पत्तिनिबन्धनं किं तु प्रमेयविशेषनिबन्धनम् इत्युपपादितम् (वे. प.– अष्टमः परिच्छेदः)। इन्द्रियजन्यज्ञानस्य प्रत्यक्षत्वे सुखदुःखादिविषयवद् अतीतार्थस्मृत्यादीनामपि प्रत्यक्षत्वप्रसङ्गः आयातीति रामतीर्थेण स्वकृत–*विद्वन्मनोरञ्जनी*–टीकायामुक्तम्– *किं च ज्ञानस्य परोक्षत्वापरोक्षत्वे न करणनिबन्धने किं तु अर्थनिबन्धने एकस्य एव मनसः सुखादिविषयकापरोक्षज्ञानहेतुत्वस्य अतीतार्थस्मृतिहेतुत्वस्य च दर्शनात्; इति।* अतः प्रत्यक्षत्वस्य प्रमेयविशेषनिबन्धनात् 'दशमस्त्वमसि' इत्यादिवाक्यवत् 'तत्त्वमस्या'दि–

वाक्यानामपि अपरोक्षज्ञानजनकत्वं सिद्धम्। *अद्वैतसिद्धौ* श्रीमन्मधुसूदनाचार्येण सम्यगेवोक्तम्– तस्मात्तत्त्वमस्यादि–वाक्यस्यापरोक्षज्ञानजनकत्वादविद्यानिवृत्त्यात्मक–मोक्षसाधन–ब्रह्म–साक्षात्काराय मननाद्यङ्गकं श्रवणमङ्गि नियमविधिविषय इति सिद्धम्। (अ. सि.– शब्दादपरोक्षोपपत्तिः परिच्छेदः)। एवं ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यं ज्ञानमपरोक्षम्। अपरोक्षत्वमत्र प्रमेयविषयस्याधीनम्, न तु करणस्येति ज्ञेयम्।

परमतत्त्वं सच्चिदानन्दस्वरूपं ब्रह्म एकमेवाद्वितीयम्। निर्गुणं निष्क्रियं शान्तमिति विशेषणैः ब्रह्मणि गुणक्रियासंबन्धानां निषेधो द्योतितः। अन्वयमुखेन उपदेष्टुमशक्यत्वात् 'नेति नेती'ति निषेधमुखेन उपदेशाद् ब्रह्मणि सर्वस्याः उपाधेः निषेधः कृतः। एतस्माद् ब्रह्म न केनचिच्छब्देनोच्यत इति प्रतिपादनाज् ज्ञेयतत्त्वस्योपदेशस्तथा ब्रह्मणः शास्त्रयोनित्वं कथं संभवेदित्याशङ्कायामुच्यते, लक्षणाबलेन आविद्यकसंबन्धपूर्वकेन शब्दो ब्रह्मस्वरूपमुपदिशति। मधुसूदनपादाचार्येणाप्युक्तम्– यथाकथंचिल्लक्षणया शब्देन प्रतिपादनादिति गृहाण। प्रतिपादनप्रकारश्चाश्चर्यवत् पश्यति कश्चिदेनमित्यत्र व्याख्यातः[9] इति।

अध्यारोपापवादन्यायेन निखिलप्रपञ्चाध्यारोपेण इदं ब्रह्म अनादिमत् सदिति व्याख्यातम्। 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति न्यायोऽत्र स्मर्यते। अध्यारोपो भ्रमः तन्निषेधस्तु अपवादः। 'नान्यत्र कारणात् कार्यं न चेत्तत्र क्व तद्भवेत्' इति नियमेन कारणमतिरिच्य कार्यपदार्थस्यावस्थितिः असंभवेव। अधिष्ठानमन्तरेण भ्रमोऽपि न भवेत्। निरधिष्ठानभ्रमः शून्यवादे पर्यवस्यति। जगद्रूपभ्रमस्यापि अधिष्ठानमेकमस्ति, तदेव ब्रह्म। अधिष्ठानसत्ताव्यतिरेकेण आरोप्यमानस्य प्रकाशो न संभवेत्। सर्वभूतवर्गस्य अधिष्ठानत्वेन ब्रह्मव्यतिरिक्तसत्ता नास्तीत्यत्रापि प्रतिपादितं टीकायाम्– अत एव अचरं स्थावरं च जङ्गमं भूतजातं तदेव अधिष्ठानात्मकत्वात्। कल्पितानां न ततः किंचिद्व्यतिरिच्यत इत्यर्थः[10] इति।

आकाशवत् सर्वव्यापकत्वाद् आत्मा भूतेषु अभिन्नम् एकमेव वर्तते। देहाभिन्नत्वेन प्रतीयमानादपि औपाधिकत्वेनापारमार्थिको व्योमवद् भेदावभासेन आत्मा प्रतिदेहं विभक्तमिव प्रतीयते। सर्वव्यापकः क्षेत्रज्ञः एकः एवास्तु परं जगत्कारणं ब्रह्म ततो भिन्नमिति नाशङ्कनीयम्।

रज्ज्वादेः सर्पादेर्मायाकल्पितस्य स्थितिलयोत्पत्तिकारणवत् ब्रह्म जगतो भूतभर्ता ग्रसिष्णु प्रभविष्णु च। एतस्माद् जगतः स्थितिलयोत्पत्तिकारणं ब्रह्म एव क्षेत्रज्ञं ज्ञेयं प्रतिदेहमेकमेवेति प्रतिपादितं तथा प्रतिदेहमात्मभेदवादिनां मतमप्यत्र निराकृतम्।

एवं महाभूताद्यारभ्य धृत्यन्तपर्यन्तक्षेत्रम्, अमानित्वाद्यारभ्य तत्त्वज्ञानार्थदर्शनपर्यन्तज्ञानम्, अनादिमत् परं ब्रह्म इत्यारभ्य विष्ठितपर्यन्तज्ञेयतत्त्वं श्रुतिस्मृतिभ्यः समाकृष्य मन्दबुद्ध्यनुग्रहाय श्रीभगवान् प्रकाशयामास। समग्रवेदस्य तथा गीताशास्त्रस्य मूलीभूततत्त्वमिदम्। ज्ञानस्यास्य कश्चाधिकारीति प्रसङ्गे श्रीभगवति समर्पितसर्वात्मभावो यः क्षेत्रं ज्ञानं ज्ञेयं च विज्ञाय परमानन्दभावाय मोक्षाय उपपद्यते स एवाधिकारी उच्यते। तुच्छभोगस्पृहां विहाय भगवदेकशरणः सन् पुरुषार्थलिप्सुः आत्मज्ञानसाधनानि अनुवर्तेत इत्यभिप्रायः। सर्वमेतच्छ्रुतिवाक्यसमुद्धरणपूर्वकं विशदीक्रियते आचार्यपादेन– ...मद्भक्त एवाधिकारीत्याह, मद्भक्तो मयि भगवति वासुदेवे परमगुरौ समर्पितसर्वात्मभावो मदेकशरणः स एतद् यथोक्तं क्षेत्रं ज्ञानं ज्ञेयं च विज्ञाय विवेकेन विदित्वा मद्भावाय सर्वानर्थशून्यपरमानन्दभावाय मोक्षायोपपद्यते मोक्षं प्राप्तुं योग्यो भवति। 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन' इति श्रुतेः[11] इति।

अध्यायेऽस्मिन् क्षेत्रभेददर्शनं स्वीकृत्य क्षेत्रज्ञभेददर्शनमेवापाकृतम्। तत्र क्षेत्रभेददर्शनमपि मायिकत्वेनापाकृत्य तद्भेददर्शनं निराकरोति। स्थावरजङ्गमानां जडवर्गानां पृथग्भावम् एकस्मिन् एवात्मनि कल्प्यते। कल्पितपदार्थस्य अधिष्ठानातिरिक्तसत्ताभावात् तत्त्वदर्शी आत्मैवेदं सर्वमिति शास्त्राचार्योपदेशाज् जडवर्गानां परस्परभिन्नत्वम् आत्मनि सद्रूपेऽनुपश्यति। भूतानां पृथक्त्वम् एकस्मादात्मन एव स्वप्नमायावत् समुद्भवदर्शनात् भेददर्शनाभावाच्च तत्त्वदर्शी सर्वानर्थशून्यं ब्रह्मैव भवति। तत्र *को मोहः कः शोक एकत्वमनुपश्यतः* (ईश. उ.– ७) इति श्रुतिप्रमाणं वर्तते। एवं क्षेत्रभेददर्शनस्य मायिकत्वमाचार्यपादेन एवं व्याख्यातम्– यदा यस्मिन् काले भूतानां स्थावरजङ्गमानां सर्वेषामपि जडवर्गानां पृथग्भावं पृथक्त्वं परस्परभिन्नत्वम् एकस्मिन्नेवात्मनि सद्रूपे स्थितं कल्पितं कल्पितस्याधिष्ठानादनतिरेकात् सद्रूपात्मस्वरूपादनतिरिक्तम् अनुपश्यति

शास्त्राचार्योपदेशमनु स्वयमालोचयति आत्मैवेदं सर्वमिति। एवमपि मायावशात्ततः एकस्मादात्मन एव विस्तारं भूतानां पृथग्भावं च स्वप्नमायावदनुपश्यति, ब्रह्म संपद्यते तदा सजातीय–विजातीय–भेददर्शनाभावाद् ब्रह्मैव सर्वानर्थशून्यं भवति तस्मिन् काले[12] इति।

भेदत्रयरहितस्य आत्मन अकर्तृत्वम् अव्ययत्वमप्यत्र निर्धारितम्। न वेतीत्यनेन अव्ययपदस्य सर्वविकारशून्यम् इत्यर्थोऽवगम्यते। तत्र धर्मिस्वरूपस्य उत्पत्तिमत्तया एकम्, धर्मिस्वरूपस्यानुत्पाद्यत्वेऽपि धर्माणामेवोत्पत्त्यादिमत्तया अपरं व्ययं भवेत्। यथा मृत्पिण्डाद् घटोत्पादनेन मृत्पिण्डरूपधर्मिणः व्ययं भवेत्; किं वा घटादिधर्मिण अविकृतेऽपि कठिनत्वाद्यवस्थान्तरं लक्ष्यते। ब्रह्मणि एतादृशं व्ययं न परिदृश्यते। तत्र–

अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥ (श्री. म. गी.– १३/३१)

इति श्लोकव्याख्यायाम् 'अनादित्वादि'त्यनेन एकस्य व्ययस्य निराकरोति। सर्वदा सत आत्मनः कारणाभावाज्जन्माभावः, जन्माभावे च अस्त्यादिभावविकाराभावात् स्वरूपेण न स न व्येतीत्यर्थोऽवधार्यते। 'निर्गुणत्वादि'त्यनेन अपरस्य व्ययस्य अपाकरोति। धर्मधर्मिणोः तादात्म्यात् धर्मिणमविकृत्य कश्चिद्धर्मो न उपैति; निर्धर्मक आत्मा धर्मद्वारापि न व्येतीत्यर्थोऽवगम्यते। *अविनाशी वा अरेऽयमात्मा अनुच्छित्तिधर्मा* (बृह. उ.– ४/५/१४) इति श्रुतिप्रमाणमत्र स्मर्यते। मधुसूदनसरस्वतीपादस्य युक्तिरियम् एवमुपस्थाप्यते– तत्राद्यमपाकरोति अनादित्वादिति। आदिः प्रागसत्त्वावस्था; सा च नास्ति सर्वदा सत आत्मनः। अतस्तस्य कारणाभावाज्जन्माभावः। न ह्यनादेर्जन्म संभवति। तदभावे च तदुत्तरभाविनो भावविकारा न संभवन्त्येव। अतो न स्वरूपेण व्येतीत्यर्थः। द्वितीयं निराकरोति निर्गुणत्वादिति; निर्धर्मकत्वादित्यर्थः। न हि धर्मिणमविकृत्य कश्चिद्धर्म उपैत्यपैति वा धर्मधर्मिणोस्तादात्म्यादयस्तु निर्धर्मकोऽतो न धर्मद्वारापि व्येतीत्यर्थः[13] इति।

एवं क्षेत्रक्षेत्रज्ञयोः परस्परभिन्नत्वं ये ज्ञानचक्षुषा विदुः ते आत्मविद्यया अविद्याख्यमायायाः अभावज्ञानरूपं कैवल्यमेवाप्नुवन्ति। क्षेत्रक्षेत्रज्ञज्ञानवतः सर्वानर्थनिवृत्त्या पुरुषार्थप्राप्तिर्भवेत्तदेव अध्यायस्यान्ते टीकाकारेणोक्तम्– ...परस्परवैलक्षण्यं जाड्यचैतन्यविकारित्वनिर्विकारत्वादिरूपं ज्ञानचक्षुषा शास्त्राचार्योपदेशजनितात्मज्ञानरूपेण चक्षुषा ये विदुर्भूतप्रकृतिमोक्षं च भूतानां सर्वेषां प्रकृतिरविद्या मायाख्या तस्याः परमार्थात्मविद्यया मोक्षमभावगमनं च ये विदुर्जानन्ति, यान्ति ते परं परमार्थात्मवस्तुस्वरूपं कैवल्यं, न पुनर्देहमाददत इत्यर्थः[14] इति।

चतुर्दशाध्यायस्य प्रारम्भे ज्ञानस्वरूपं प्रपञ्च्यते। परमात्मज्ञानसाधनमेव ज्ञानम्; परमात्मरूप–परवस्तु–विषयत्वाज् ज्ञानमिदं श्रेष्ठम्। बहिरङ्गयज्ञादेरपि ज्ञानसाधनत्वं मान्यम्, परम् अमानित्वादम्भित्वादि–ज्ञानसाधनानाम् अन्तरङ्गत्वेन तेषामुत्तमफलत्वं ज्ञेयम्। ज्ञानमिदं ज्ञात्वा मुनयो देहबन्धनाद् मोक्षाख्यं पदं गच्छन्ति। तत्र प्रकृतिपुरुषयोः संयोगः परमेश्वराधीनस्तथा ईश्वरसंकल्पो भूतवर्गस्य जन्महेतुरित्युपलब्धिरेव परमज्ञानम्। निर्विशेषस्वरूपेण तुरीयब्रह्मणा संकल्पस्तथा सृष्टिकर्तृत्वोऽपि असंभवः। अचेतनरूपया जडभूतया मायया अपि संकल्परूपकार्य न संपद्यते। मायाप्रतिबिम्बभूतेश्वरस्यैव सृष्टिसंकल्परूपा सिसृक्षा भवितुमर्हति। यथा कश्चित् पिता पुत्रकाम्यया रेतःसेकपूर्वकं योनौ गर्भमाधत्ते, गर्भाधानात् पुत्रोऽयं शरीरेण युज्यते कललाद्यवस्थां च प्राप्नोति; एवं मायोपहितेश्वरः प्रलयावस्थायां अविद्यादिसंस्कारसहितलीनं क्षेत्रज्ञं सृष्टिसमये कार्यकारणसंघातरूपेण भोग्यक्षेत्रेण सह योजयितुं चिदाभासरूपरेतःसेकपूर्वकं मायावृत्तिसहितं गर्भम् आदधति। ईक्षणस्य बहुभवनसंकल्पस्य वा हेतु एव चिदाभासः। जगतः क्षेत्रज्ञरूपबीजोऽयं चिदाभासः। एवमीश्वरकृतगर्भाधानाद् उत्पत्तिः संभवा तदपि दीपिकायां स्पष्टीकृतम्– यथा हि कश्चित् पिता पुत्रमनुशयिनं बाह्याद्याहाररूपेण स्वस्मिन् लीनं शरीरेण योजयितुं योनौ रेतःसेकपूर्वकं गर्भमाधत्ते, तस्माच्च गर्भाधानात् स पुत्रः शरीरेण युज्यते, तदर्थं च मध्ये कललाद्यवस्था भवति, तथा प्रलये मयि लीनमविद्याकामकर्मानुशयवन्तं क्षेत्रज्ञं सृष्टिसमये भोग्येन क्षेत्रेण कार्यकारणसंघातेन योजयितुं चिदाभासाख्यरेतःसेकपूर्वकं मायावृत्तिरूपं गर्भमहमादधामि।

तदर्थं च मध्ये आकाशवायुतेजोजलपृथिव्याद्युत्पत्त्यवस्थाः[15] इति। परमेश्वरसंकल्पस्तु प्रकृतिपुरुषयोः संयोगमूलम्। ईश्वर एव सृष्टिकार्यस्य मूलीभूतकारणमित्युपलब्धिरेव परमज्ञानम्। एतेन निरीश्वरसांख्यानां मतमपि निराकृतम्।

प्रत्युतः सृष्टकार्यजातं गुणोद्भूतमिति कारणात् ज्ञानसाधनानां मध्ये गुणविभागयोगस्यापि श्रेष्ठत्वमुक्तमेव। अत्र गुण–शब्देन सत्त्वः रजस्तमश्चेति गुणत्रयमेवावबुध्यते। गुणत्रयेषु सत्त्वगुणः स्फटिकमणिरिव स्वच्छत्वाद् भास्वरं ज्ञानात्मकत्वात् प्रकाशकं दुःखनिवारणत्वाच्च सुखदायकम्। पुनरपि रजोगुणोऽनुरञ्जनरूपं तृष्णासङ्गाभ्यां चोद्भूतम्। गुणोऽयं पुरुषं नितरां सकामकर्मसु निबध्नाति। पुनश्च तमस्त्वज्ञानाज्जातमावरणशक्तिप्रधानात् प्रकृत्यंशादुद्भूतम्। एतेषां गुणोऽयं सर्वेषां देहिनां भ्रान्तिजनकत्वात् प्रमादेनालस्येन निद्रया च निबध्नाति। पुनः सत्त्वगुणं सुखाभिमुखं करोति, रजः कर्मण्येव प्रेरयति, तमस्तु महत्सङ्गेनोत्पद्यमानमपि ज्ञानमाच्छाद्य अनवधाने सञ्जयति। रजस्तमश्चेति गुणद्वयं तिरस्कृत्य सत्त्वमदृष्टवशादुद्भवति। रजोऽपि सत्त्वं तमश्चेति गुणद्वयमभिभूयोद्भवति। एवं तमोऽपि सत्त्वं रजश्चोभावपि गुणावभिभूयोद्भवति। विषयेऽस्मिन् राधाकृष्णनमहोदयानाम् वक्तव्यं स्मरणीयम्–

So the terms 'sattva, rajas and tamas' are employed to mark predominant aspects rather than exclusive characters. Though the guṇas work together for the production of the world of effects, still they never coalesce. They are modified by mutual influence on one another or by their proximity. They evolve, join and separate. No one loses its power, though the others may be actively at work. (*Indian Philosophy*, Vol.II, PP. 265)

गुणत्रयस्य तारतम्यानुसारेण बुद्धि–ज्ञान–कर्म–कर्तृ–सुख–दान–तपस्यादीनां प्रभेदाः संलक्ष्यन्ते। गुणत्रयमिदं भोगापवर्गयोः साधनम्। एतेनास्य उपकारकत्वम्, उपकारकत्वाच्च परार्थपरत्वमवज्ञेयम्। सर्वतन्त्रस्वतन्त्र–श्रीमद्वाचस्पतिमिश्रेणापि *सांख्यतत्त्वकौमुदी*–टीकायामुक्तम्– "गुणाः परार्थाः।" पुरुषस्य भोगापवर्गसाधनरूपोपकारकत्वात् सत्त्वादेः गुणत्वमुक्तम्। गुणत्रयाबद्धपुरुषस्य बन्धनोच्छेदेन मुक्तिर्जायते। एतेन रज्जुना सह सादृश्यवशात् सत्त्वादेरपि गूणत्वं *सांख्यप्रवचनभाष्ये* श्रीमद्विज्ञानभिक्षुणा निरूपितम्– *पुरुषोपकरणत्वात्*

*पुरुषपशुबन्धक–त्रिगुणात्मक–महदादिरज्जुनिर्मातृत्वाच्च प्रयुज्यते।* (सा. प्र. भा.– १/६१). अतो मुमुक्षुणा गुणत्रयमपि सम्यग् रूपेणावगन्तव्यम्।

जलप्रतिबिम्बसूर्यस्य जलतद्गतकर्मणा सह संश्लिष्टत्वेऽपि जलतत्कम्पाद्यसंस्पृष्टत्ववद् गुणत्रयतत्कार्यासंस्पृष्टं यः सर्वभासकं सर्वसाक्षिणं निर्विकारम् एकं क्षेत्रज्ञं वेत्ति स भगवद्भावमधिगच्छति। विद्वान् सत्त्वरजस्तमोनाम्नः गुणानतीत्य जन्मना मृत्युना जरया दुःखैश्चाध्यात्मिकादिमायामयैर्विमुक्तो जीवन्नेव तत्त्वज्ञानेन अमृतमश्नुते। अत्रैव मनसि प्रश्नोऽयं समुदेति यत्, गुणातीतस्य लक्षणं तथा आचारादिविषयः कीदृशः? सर्वाणि गुणकर्माणि स्वसामग्रीवशादुद्भूतानि सन्ति दुःखरूपाण्यपि यो दुःखबुद्ध्या न द्वेष्टि, तथा विनाशसामग्रीवशान्निवृत्तानि तानि सुखरूपाण्यपि यो न कामयते सुखबुद्ध्या एतादृशरागद्वेषशून्यो गुणातीत उच्यते। यथा उदासीनो द्वयोर्विवदमानयोः पक्षमभाजमानो न द्वेष्टि न वा रज्यति तथायमात्मविद् रागद्वेषशून्यतया स्वस्वरूप एवासीनो न विचाल्यते सुखदुःखाद्याकारपरिणतैर्गुणैः। आत्मनि एव स्थितत्वात् द्वैतदर्शनशून्यत्वाच्च लोष्ट्राश्मकाञ्चनानि तत्समीपे हेयोपादेयभावरहितानि समानानि एव। दोषकीर्तनरूपा निन्दा तथा गुणकीर्तनरूपा आत्मसंस्तुतिरपि गुणातीतस्याचाररूपेण तुल्यवत् प्रतीयते। पुनश्च गुणातीतो देहयात्रामात्रव्यतिरेकेण सर्वकर्मपरित्यागी एव। परमेश्वरचिन्तया गुणातीतत्वं लभते। निर्विकल्पको वासुदेव एव सोपाधिकब्रह्मणः प्रतिष्ठास्वरूपः। प्रतितिष्ठत्यत्रेति प्रतिष्ठा इत्यनया व्युत्पत्त्या कल्पितरूपरहितम् अकल्पितं रूपमेव बोध्यव्यम्। श्रीवासुदेव एव एतादृशस्य ब्रह्मणो वास्तवं स्वरूपम्। अतो योऽनुपाधिकं ब्रह्म सेवते स ब्रह्मभूयाय कल्पत संसारान्मुच्यत इति तात्पर्यार्थोऽत्रावगम्यते। तदुक्तमाचार्यपादेन– ब्रह्मणस्तत्पदवाच्यस्य सोपाधिकस्य जगदुत्पत्तिस्थितिलयहेतोः प्रतिष्ठा पारमार्थिकं निर्विकल्पकं सच्चिदानन्दात्मकं निरूपाधिकं तत्पदलक्ष्यमहं निर्विकल्पको वासुदेवः प्रतितिष्ठत्यत्रेति प्रतिष्ठा कल्पितरूपरहितमकल्पितं रूपम् अतो यो मामनुपाधिकं ब्रह्म सेवते स ब्रह्मभूयाय कल्पत इति युक्तमेव[16] इति। प्रत्युत सोपाधिकब्रह्मणो निरूपाधिके कल्पितत्वात्, कल्पितस्य चाधिष्ठानानतिरेकाद् भगवतः

श्रीकृष्णस्य सर्वकल्पनाधिष्ठानत्वेन तस्य परमार्थसत्यनिरूपाधिब्रह्मरूपत्वं निरूपितमेव। एतेन श्रीकृष्णादन्यत् पारमार्थिकं वस्तु नास्तीति मधुसूदनसरस्वतीपादस्याभिप्रायोऽत्र व्याख्यातः– अतः किमतद्वस्तु तस्माच्छ्रीकृष्णादन्यद्वस्तु पारमार्थिकं नान्यत् किमपीत्यर्थः। तदेतदिहाप्युक्तं ब्रह्मणो हि प्रतिष्ठाहमिति[17] इति।

भगवद्भक्तस्तद्भावमाप्नोतु परं ब्रह्मणः सकाशाद्भगवतः श्रीकृष्णस्यान्यत्वात् कथं ते ब्रह्मभावाय कल्पत इति पूर्वपक्षिण आशङ्का अत्र निराकृता। श्रीभगवति एव ब्रह्मणः प्रतिष्ठा। मोक्षरूपामृतत्वस्य ज्ञाननिष्ठालक्षणस्य ऐकान्तिकस्य सुखस्य च पर्याप्तिः परमानन्दरूपे श्रीभगवति एव। एतेन भगवद्भिन्नं न किंचित्प्राप्यमित्यर्थोऽवगम्यते। अतो भगवद्भक्तो ब्रह्मभूयाय कल्पत इति यदुक्तं तद् युक्तमेव। उक्तं चाचार्यवरेण– तथा अमृतस्यामृतत्वस्य मोक्षस्य चाव्ययस्य सर्वथानुच्छेद्यस्य च प्रतिष्ठाहमेव मय्येव। मोक्षः पर्यवसितो मत्प्राप्तिरेव मोक्ष इत्यर्थः। तथा शाश्वतस्य नित्यमोक्षफलस्य धर्मस्य ज्ञाननिष्ठालक्षणस्य च पर्याप्तिरहमेव ज्ञाननिष्ठालक्षणो धर्मो मय्येव पर्यवसितो न तेन मद्भिन्नं किंचित्प्राप्यमित्यर्थः[18] इति। परमतत्त्वरूपः श्रीभगवान् एव वस्तुस्वरूपः। श्रीभगवतः सगुणरूपाकृष्टस्यापि परमतत्त्वानुपलब्धिः संभवेत्। मनुष्यदेहधारी भगवतः श्रीकृष्णस्य भक्तियोगेन तस्य ब्रह्मस्वरूपताज्ञापनाय–

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च॥ (श्री. म. गी.– १४/२७)

इति सूत्रस्थानीयोऽयं श्लोकः व्याख्यातः। श्लोकस्यास्य वृत्तिस्थानीयः पञ्चदशोऽध्याय आरभ्यत इति स्वयमेवाचार्येणाकुतम्– अस्य सूत्रस्य वृत्तिस्थानीयोऽयं पञ्चदशोऽध्याय आरभ्यते भगवतः श्रीकृष्णस्य हि तत्त्वं ज्ञात्वा तत्प्रेमभजनेन गुणातीतः सन् ब्रह्मभावं कथमाप्नुयाल्लोक[19] इति।

रागद्वेषादिवासनालक्षणानि एव संसारवृक्षस्य मूलानि। रागद्वेषादिवासनारूपाणि अवान्तरमूलानि धर्माधर्मरूपकर्मणः समुद्भवन्तीति कारणात् तानि एव कर्मानुबन्धीनि। मनुष्यदेहो विधि–निषेध–लक्षणरूप–वैदिककर्मण आश्रयस्थलः। यस्य आश्रमस्य यानि कर्माणि विहितानि तदेव कर्तव्यानि तदितरकर्माणि अविहितानि अकर्तव्यानि एव। मीमांसादर्शनस्य षष्ठाध्यायस्य प्रथमे पादे अधिकारिनिरूपणस्थले वर्णाश्रमान्तर्भूतानां कर्माधिकारो निरूप्यते। कर्माधिकारप्रसङ्गे मधुसूदनसरस्वतीपादस्य मतमत्रोल्लेख्यम्– कर्म धर्माधर्मलक्षणमनुबन्धुं पश्चाज्जनयितुं शीलं येषां तानि कर्मानुबन्धीनि। कुत्र? मनुष्यलोके; मनुष्यश्चासौ लोकश्चेत्यधिकृतो ब्राह्मण्यादिविशिष्टो देहो मनुष्यलोकस्तस्मिन् बाहुल्येन कर्मानुबन्धीनि। मनुष्याणां हि कर्माधिकारः प्रसिद्धः[20] इति।

समग्रगीताशास्त्रस्य मुकुटमणिसदृशे पञ्चदशोऽध्याये पुरुषोत्तमतत्त्वं व्याख्यातम्। मोक्षलाभस्योपायभूतस्य तत्त्वज्ञानस्य अन्तरङ्गसाधनरूपो वैराग्यविषयोऽत्र विशदीक्रियते। अनित्योऽयं संसारस्य अधिष्ठानः परमतत्त्वस्वरूपो ब्रह्म इत्यवधार्यते। लोकस्यास्य अनित्यत्वज्ञानेन पुत्रवित्तलोकैषणात्यागरूपासङ्गशस्त्रेण संसारं छित्त्वा शमादिषट्कसंपत्त्या सर्वकर्मसंन्यासेन परमपदमन्वेषितव्यमिति आचार्यमतमत्र प्रपञ्चितम्– असङ्गः सङ्गविरोधि वैराग्यं पुत्रवित्तलोकैषणात्यागरूपम्, तदेवं शस्त्रं रागद्वेषमयसंसारविरोधित्वात्, तेनासङ्गशस्त्रेण दृढेन परमात्मज्ञानौत्सुक्यदृढीकृतेन पुनः पुनर्विवेकाभ्यासनिशितेन छित्वा समूलमुद्धृत्य वैराग्यशमदमादिसंपत्त्या सर्वकर्मसंन्यासं कृत्वेत्येवत्[21] इति। अत्रेदमवधेयम्, शम–दम–उपरति–तितिक्षा–समाधान–श्रद्धा एव षट्कसंपत्तिः। श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः शम उच्यते। यथा तीव्रायां वुभुक्षायां भोजनादन्यव्यापारो मनसि न रोचते तथा स्रक्चन्दनादिविषयेषु अत्यन्तमरुचिवशात् तत्त्वज्ञानसाधनेषु श्रवणमननादिषु अत्यन्तमभिरुचिः जायते तदा पूर्ववासनावलात् स्रक्चन्दनादिविषयेषु गम्यमानं मनो येनान्तःकरणनिवृत्तिविशेषेण निगृह्यते, स वृत्तिविशेषः शम इत्यर्थः। पुनः बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनं दम एव। अत एव ज्ञानसाधनश्रवणादिभ्यो विलक्षणेषु शब्दादिविषयेषु प्रवर्तमानानि श्रोत्रादीनि

बाह्येन्द्रियाणि येन वृत्तिविशेषेण निवर्तन्ते स दम इत्यर्थः। निगृहीतानामेतेषां बाह्येन्द्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानीन्द्रियाणि सर्वथा न गच्छन्ति, तथा तेषां निग्रहो येन वृत्तिविशेषेण क्रियते सोपरतिः। किं वा विहितानां नित्यादिकर्मणां विधिना चतुराश्रमस्वीकारकर्मणा परित्यागः, नाहं कर्ता इत्यवस्थानमपि उपरतिरित्यर्थः। शीतोष्णादिद्वन्द्वसहिष्णुता एव तितिक्षा। अर्थात्, शरीरधर्मस्य शीतोष्णादेः तज्जन्यसुखदुःखादेश्च शरीरेण त्यक्तुमशक्यत्वात्, स्वप्रकाशचिद्रूपे स्वात्मनि च शीतोष्णादेरत्यन्ताभावादिति विवेकदीपेन मिथ्याभानस्य शीतोष्णादेर्द्वन्द्वस्य यत् सहनं सा तितिक्षा इत्यर्थः। समाधानं च शब्दादिविषयेभ्यो निगृहीतस्यान्तःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारकेषु अमानित्वादिसाधनविषयेषु समाधिः नैरन्तर्येण तच्चिन्तनमेव। श्रद्धा एव गुरूपदिष्टवेदान्तवाक्येषु विश्वासः। श्रद्धाहीनस्य हवनादिर्न फलमश्नुते। श्रद्धाव्यतिरेकेण तत्त्वज्ञानस्य साफल्यमपि असंभवेव। गीतायां श्रीभगवद्वचनमत्र स्मर्तव्यम्–

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥ (श्री. म. गी.– १७/२८)

इति।

शमादिषट्कसंपत्तिरियं साधनचतुष्टयमध्येऽन्तर्भूयते। शमादय एव विद्याया अन्तरङ्गसाधनम्। अन्तरङ्गसाधनसंपन्नस्यैव मुमुक्षा भवति, न त्वन्यस्य।

*श्रीमद्भगवद्गीता*याः पञ्चदशाध्यायगते–

न तद्भासयते सूर्यो न शशाङ्को न पावकः।
यद् गत्वा न निवर्तन्ते तद्धाम परमं मम॥ (श्री. म. गी.– १५/०६)

इत्यस्मिन् श्लोके गन्तव्यं वैष्णवं पदं गत्वा योगिनो न निवर्तन्त इत्युक्तम्। स्वयंप्रकाशरूपम् आदित्यादिसकलजडज्योतिर्पदार्थस्यावभासकं प्रकृष्टं तद्धाम विष्णोः स्वरूपात्मकं पदम्। अत्र पूर्वपक्षैः आशङ्क्यते, यदि गच्छन्ति तर्हि स्वर्गवद् आवर्तन्त इत्यत्र कथं यद् गत्वा न निवर्तन्त

इति युक्तिग्राह्यतामुपयाति? यदि नावर्तन्ते तर्हि गत्वेति न निवर्तन्त इति परस्परविरुद्धमपि भवति। प्रसङ्गेऽस्मिन् शास्त्रे लोके च प्रसिद्धो नियमोऽत्र स्मर्तव्यः–

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम्॥

अत्र सिद्धान्तिमतं यथा गन्तव्यब्रह्मणा सह गन्तुर्जीवस्याभिन्नत्वाद् 'गत्वे'ति औपचारिकप्रयोगोऽत्र कृतः। केवलं ज्ञानमात्रेणैव अज्ञाननाशात् जीवस्य स्वकीयाज्ञानव्यवहितस्वरूपे स्थितिर्भवेत्। अतो वस्तुगत्या अप्राप्तस्य प्राप्त्यभावादपि गौण्या वृत्त्या प्राप्तिरिति निर्दिश्यते। प्रतिबिम्बवादमतेन जीवो यथा ब्रह्मणः प्रतिबिम्बस्तथा जलप्रतिबिम्बितसूर्यस्य जलनाशेन बिम्बभूतसूर्यगमनं किंवा अवच्छेदवादमतेन जीवो यदा बुद्ध्यवच्छिन्न–ब्रह्मभागस्तदा घटाकाशस्य घट्नाशे महाकाशं प्रति गमनं ततोऽनावृत्तिश्च भवति। एवं स्वरूपतः जीवस्य ब्रह्माभिन्नत्वाद् बुद्धिरूपोपाधिनाशेन भेदभ्रमस्यापि निवृत्तिर्भवेत्। एतेन गत्वेति गौणप्रयोगोऽप्यत्र उपयुज्यते। सर्वमेतत् स्पष्टीक्रियते *गूढार्थदीपिका*याम्– गन्तुर्जीवस्य गन्तव्यब्रह्माभिन्नत्वाद् गत्वेत्यौपचारिकम्, अज्ञानमात्रव्यवहितस्य तस्य ज्ञानमात्रेणैव प्राप्तिव्यपदेशात्। यदि ब्रह्मणः प्रतिबिम्बो जीवस्तदा यथा जलप्रतिबिम्बितसूर्यस्य जलापाये बिम्बभूतसूर्यगमनं ततोऽनावृत्तिश्च, यदि बुद्ध्यवच्छिन्नो ब्रह्मभागो जीवस्तदा यथा घटाकाशस्य घटापाये महाकाशं प्रति गमनं ततोऽनावृत्तिश्च, तथा जीवस्याप्युपाध्यपाये निरूपाधिस्वरूपगमनं, ततोऽनावृत्तिश्चेत्युपचारादुच्यते, एकस्वरूपत्वाद्भेद–भ्रमस्य चोपाधिनिवृत्त्या निवृत्तेः[22] इति।

ब्रह्म एव जीवस्य पारमार्थिकं स्वरूपं तदसकृदेवोक्तम् अध्यायेऽस्मिन्। तत्र–

ममैवांशो जीवलोके जीवभूतः सनातनः।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥ (श्री. म. गी.– १५/१७)

इत्यस्मिन् श्लोके जीवस्य ब्रह्मस्वरूपत्वाद् अज्ञाननिवृत्त्या ब्रह्मस्वरूप–प्राप्तस्य ततो न प्रच्युतिरिति प्रतिपादितम्। सुषुप्तिकाले सर्वकार्यसंस्कारसहितेन अज्ञानमपि वर्तत इत्यतो जीवस्य पुनः संसारादिव्यवहारः प्रवर्तते। वस्तुतोऽसंसारिणोऽपि देहतादात्म्यं प्रापितस्य जीवस्य देहाद्भिन्नत्वं प्रतीयते। इन्द्रियाणां स्वविषयेषु प्रवर्तकत्वात् तेभ्यो जीवस्य व्यतिरेकः प्रतिपद्यते। अत्र पूर्वपक्षै आशङ्क्यते, जीवस्य देहेन्द्रियादिविलक्षणत्वाद् उत्क्रान्त्यादिसमये कथं सर्वे न पश्यन्ति? तत्रोक्तम्, दर्शनयोग्यमपि विषयविक्षिप्तचित्तेनाभिभूतस्ते तं न पश्यन्ति ज्ञानचक्षुषस्तु पश्यन्त्येव। एवम् 'ममैवांशो...' इति पूर्वोक्तश्लोकादारभ्य श्लोकपञ्चकस्य परस्परसंगतिः अवज्ञायते। एतदेवोक्तं मधुसूदनसरस्वतीपादेन– एवं देहेन्द्रियादिविलक्षणमुत्क्रान्त्यादिसमये स्वात्मरूपत्वात् किमिति सर्वे न पश्यन्तीत्याशङ्कायां विषयविक्षिप्तचित्ता दर्शनयोग्यमपि तं न पश्यन्तीत्युत्तरमुच्यते उत्क्रामन्तमित्यादिना श्लोकेन। तं ज्ञानचक्षुषः पश्यन्तीति विवृतं यतन्तो योगिन इति श्लोकार्द्धेन। विमूढा नानुपश्यन्तीत्येतद्विवृतं यतन्तोऽपीति श्लोकार्द्धेनेति पञ्चानां श्लोकानां संगतिः[23] इति। परमतत्त्वश्रीभगवत्प्राप्त्या जीवस्य जन्ममरणरूपगतागतेः निवृत्तिः भवत्येव। परमार्थतो ब्रह्मस्वरूपस्य जीवस्य ब्रह्मस्वरूपावस्थितेन तस्मात् प्रच्युतिर्न संभवेत्। अज्ञानावरणे विद्यमाने सति जीवस्य स्वरूपावस्थित्यभावात् सुषुप्तौ सत्संपन्नेऽपि अविद्यावशेन जीवस्य पुनः संसारागमनं दृश्यते। उत्क्रमणकाले जीवः पूर्वस्माच्छरीराद् इन्द्रियाणि गृहीत्वा संयाति यथा कुसुमादेः गन्धात्मकान् सूक्ष्मानंशान् गृहीता वायुर्याति।

श्रीहरि एव परमपुरुषः। क्षराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्वयदोषेणासंस्पृष्टो नित्यशुद्धबुद्धमुक्तस्वभावः श्रीहरि एव उत्तमः पुरुषः। क्षरतीति क्षरो विनाशी इत्यर्थे विनाशशीलकार्यराशि एव क्षरः। यथा सर्वाणि भूतजातानि। प्रत्युतो न क्षरतीत्यक्षरो विनाशरहित इत्यर्थे क्षराख्यस्योत्पत्तिबीजरूपा मायाशक्ति एवाक्षरपदेन ज्ञेया। क्षराक्षराभ्यामुत्कृष्टतमः सर्वविकारशून्यः सर्वस्य नियन्ता परमात्मेत्युदाहृतो वासुदेव एव उत्तमः पुरुषः। बृद्धव्यवहारेषु कविकाव्यादौ च 'हरिर्यथैकः पुरुषोत्तमः स्मृतः' इत्यपि प्रसिद्धः। स्वस्य ईश्वरत्वं कारुण्यवशाद् मनुष्यवदाचरणेन स पार्थाय प्रत्यबोधयत्। सच्चिदानन्दस्वरूपं पुरुषोत्तमनारायणस्य महिमेयम्

अपरिमेयम्। योगिन इन्द्रियाणि निगृह्य भोगद्रव्याणि विसृज्य निर्मलान्तःकरणैः मोक्षार्थं यतन्ते। परं भक्तो भगवतोऽनन्तमहिमानमास्वादयन् अमृतत्वं लभते। एतेन भगवन्महिमाश्रवणस्य मुक्तिफलत्वमपि निरूपितमाचार्यवरेण– ...'स उत्तमः पुरुषः' इति वेद उदाहृत एव लोके च कविकाव्यादौ 'हरिर्यथैकः पुरुषोत्तमः स्मृतः' इत्यादि प्रसिद्धम्। कारुण्यतो नरवदाचरतः परार्थान् पार्थाय बोधितवतो निजमीश्वरत्वम्। सच्चित्सुखैकवपुषः पुरुषोत्तमस्य नारायणस्य महिमान हि मानमेति[24] इति। प्रेमलक्षणेन भक्तियोगेन कृतधियां संसारार्णवतरणहेतुस्वरूपं व्रजस्त्रीणां हाररूपं चिदानन्दाकारं सर्वज्ञपुरुषोत्तमं कर्मकुशलाः भूयो भूयो भजन्ति। वंशीविभूषितकरकमलसदृशं नवजलधरसदृशवपुकान्तिरूपम् अरविन्दसदृशनेत्रद्वयसमन्वितं श्रीहरिव्यतिरिक्तं तत्त्वमस्तीति न ज्ञायते श्रीमन्मधुसूदनेन। भगवत्पादपद्मे सततनिमग्नेन परापरातीततत्त्वलाभेन द्वैतोपलब्ध्यभावात् कैवल्यपदं लभत इति भक्तिभावमाधुर्यं मधुसूदनाचार्यस्य रचनायां बहुधा प्रपञ्चितम्– चिदानन्दाकारं जलदरुचिसारं श्रुतिगिरां व्रजस्त्रीणां हारं जलधिपारं कृतधियाम्। विहन्तुं भूभारं विदधदवतारं मुहुरहोमहोवारंवारं भजत कुशलारम्भाः हि। ...

> वंशीविभूषितकरान्नवनीरदाभात् पीताम्बरादरुणविम्बफलाधरौष्ठात्।
> पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् कृष्णात् परं किमपि तत्त्वमहं न जाने॥
>
> सदा सदानन्दपदे निमग्नं मनोमनोभावमपाकरोति।
> गतागतायासमपास्य सद्यः परापरातीतमुपैति तत्त्वम्॥[25] इति।

पूर्वजन्मीयकर्मानुसारेण अभिव्यज्यमाना वासनाः संसारस्यावान्तरमूलोत्वेनोक्ताः। दैव्यासुरी राक्षसी चेति वासनात्रयानुसारेण प्राणिनां प्रकृतयः त्रिधा भवन्ति। दैवी प्रकृतिः वेदसंमत–कर्मात्मज्ञानोपायानुष्ठान–प्रवृत्तिहेतुः सात्त्विकी शुभवासना एव। सात्त्विकीसंपदसंपन्नस्य सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थित्यादिवृत्तयः सन्ति। अन्तःकरणस्य निर्मलता एव सत्त्वसंशुद्धिः। अन्तःकरणस्य भगवतत्त्वस्फूर्तियोग्यता एव सम्यक्ता पदेन ज्ञेया। प्रत्युत परवञ्चन–मायानृतादि–परिवर्जनमपि सत्त्वसंशुद्धिरेव। 'अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।' (श्री.

म. गी.– १६/०१) इति श्लोकस्य 'ज्ञानयोगव्यवस्थितिः' इत्यत्र शास्त्रादात्मतत्त्वस्यावगम एव ज्ञानम्। एकाग्रचित्ततया आत्मतत्त्वावबोधस्य स्वानुभवारूढत्वमत्र योगः। एतादृशज्ञानयोगयोः सर्वदा तन्निष्ठता एव ज्ञानयोगव्यवस्थितिः। पुनरपि, पदद्वयस्य व्याख्यान्तरमपि क्रियते आचार्यपादेन। तत्र श्रवणादिपरिपाकेण अन्तःकरणस्य असंभावना–विपरीतभावनादि–दोषराहित्यमेव सत्त्वसंशुद्धिः। 'ज्ञानयोगव्यस्थितिः' इत्यस्य ज्ञान–पदेन आत्मसाक्षात्कारः, योग–पदेन च मुमुक्षुपुरुषस्य मनोनाश–वासनाक्षयानुकूल–प्रयन्त एव बोध्यव्यः। ज्ञानयोगाभ्यां विशिष्टा संसारिविलक्षणा या अवस्थितिः सैव जीवन्मुक्तिः ज्ञानयोगव्यवस्थितिर्वा इत्येवमपि विशदीक्रियते। जीवन्मुक्तिपूर्वकस्य विदेहमुक्तिरेव ग्रन्थकास्याशयोऽत्र व्याख्यातः। अन्तःकरणशुद्धिः भगवद्भक्तिं विना न संपद्यत इति कारणात् सत्त्वसंशुद्धिपदेन भगवद्भक्तिरपि विहिता। सर्वमेतदाचार्येण एवमभिहितम्– ...ज्ञानमात्मसाक्षात्कारः, योगो मनोनाशवासनाक्षयानुकूलः पुरुषप्रयत्नस्ताभ्यां विशिष्टा संसारिविलक्षणा या अवस्थितिर्जीवन्मुक्तिर्ज्ञानयोगव्यवस्थितिरित्येवं व्याख्यायते– तदा फलभूतैव दैवी संपदियं द्रष्टव्या। भगवद्भक्तिं विनान्तःकरणसंशुद्धेरयोगात्तया सा अपि कथिता[26] इति।

'द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च' (श्री. म. गी.– १६/०६) इति श्लोकव्याख्यायाम् आशङ्का उत्थाप्यते, दैवी आसुरी च प्रकृतिभिन्ना मानुषी प्रकृतिरस्ति न वेति। प्रसङ्गेऽस्मिन् *त्रयाः प्राजापत्याः प्रजापतौ पितरौ ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा* (बृह. उ.– ५/२/१) इति श्रुतिरप्युपलभ्यते। अत्रोक्तम्, सर्वस्मिन्नपि संसारमार्गे दैव आसुरश्च द्विप्रकारावेव मनुष्यसर्गौ भवतः, न तु राक्षसो मानुषो वा अधिकः संसर्गः। यो मनुष्यः शास्त्रीयसंस्कारबलेन स्वभावसिद्धौ रागद्वेषावभिभूय धर्मपरायणो भवति स दैवी, यश्च स्वभावसिद्धरागद्वेषबलेन शास्त्रीयसंस्कारमभिभूय अधर्मपरायणो भवति स आसुरीप्रकृतिसंपन्ना एव। अतो धर्माधर्माभ्यामतिरिच्य तृतीया प्रकृतिर्नास्ति। श्रुतावपि– *द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरा* (बृह. उ.– १/३/१) इत्यत्र द्वौ भूतसर्गौ स्वीक्रियते। 'त्रयाः प्राजापत्याः' इत्यादौ दमदानदयाविधिपरे श्रुतिवाक्ये दमदानदयारहिता मनुष्या असुरा

एव केनचित् साधर्मेण देवा मनुष्या असुरा इत्युपचर्यन्ते। एतेन दैवी आसुरी व्यतिरिक्ता प्रकृतिकल्पनायाः प्रयोजनं नोपलभ्यते। शास्त्रविहितकर्मादौ केवलं मनुष्याधिकारात् प्रजापतिः 'द' इत्यक्षरेण य उपदेशः कृतस्तेन दमरहितान् मनुष्यान् प्रति दमोपदेशः, दानरहितान् प्रति दानोपदेशः, दयारहितान् प्रति दयोपदेशो विवक्षितः, न तु विजातीया देवासुरमनुष्या विवक्षिताः। पुनरपि, पूर्वोक्तश्रुतिवाक्यस्यान्ते दमं दानं दयां शिक्षेदिति विहितत्वाद् मनुष्यानुद्दिश्य तदेव विहितमिति निश्चप्रचम्। एवं सुयुक्त्या पूर्वपक्षीयमतखण्डनपुरःसरमाचार्यपादेन यथार्थतयोक्तम्– तथा चान्ते उपसंहरति– 'तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्दद इति दाम्यत दत्त दयध्वमिति तदेतत् त्रयं शिक्षेद्दमं दानं दयामिति' (बृह. उ.– ५/२/३). तस्माद्राक्षसी मानुषी च प्रकृतिरासुर्य्यामेवान्तर्भवतीति युक्तमुक्तं द्वौ भूतसर्गाविति[27] इति।

परस्परविरुद्धेयं दैवी प्रकृतिरासुरी प्रकृतिश्चेति। दैवी प्रकृतिः भगवल्लाभस्य तथा अपरा एव बन्धनस्य कारणभूतम्। दैवी–प्रकृत्यां सत्त्वगुणाधिक्यं तथा आसुरी–प्रकृत्यां रजस्तमसोः प्रावल्यं वर्तत एव। श्रीभगवान् हिंसापरान् अतिनिन्दितान् अशुभकर्मकारिण आसुरान् तत्तत्कर्मानुसारेण व्याघ्रसर्पादियोनिषु नरकसंसरणमार्गेषु पातयति। अत्र पूर्वपक्षै आशङ्क्यते, भगवत्कृपया तेषां कदाचिन्निस्तारः संभवेत्तर्हि निस्ताराभावादत्र परमेश्वरस्य कथं न वैषम्यम्? अत्रोच्यते, पूर्वपूर्वकर्मानुसारेण जन्मनिर्धारणात् परमेश्वरस्य वैषम्यं तथा नैर्घृण्याभावादत्र कृपाप्रसङ्गो नास्ति। *छान्दोग्योपनिषदि* गीयते– *अथ कपूयचरणा अभ्याशोह कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चण्डालयोनिं वेति। कपूयचरणाः कुत्सितकर्माणः* (छा. उ.– ५/१०/७) इति। पापकर्मबीजसत्त्वात् श्रीभगवान् तेषां पापाकर्माण्येव कारयति। कारुणिकत्वेऽपि तेषां पापकर्माणि न नाशयति पापकर्मनाशकपुण्योपचयाभावादेव। ईश्वरत्वात् पाषाणेषु यवाङ्कुरसृष्टिवद् अयोग्यस्यापि योग्यतां संपादयितुं समर्थोऽपि सत्यसंकल्पत्वात् स न करोति। महर्षिबादरायणेन *ब्रह्मसूत्रे*ऽपि सूत्रितम्– 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयती'ति। (ब्र. सू.– २/१/३४). शास्त्राज्ञालङ्घिषु स्वभक्तद्रोहिषु श्रीभगवत अप्रसन्नत्वं निर्विवादम्; यतः प्रसन्नतायाः कारणमत्र नास्ति। कारणाभावे कार्याभाव इति नियमोऽत्र स्मर्तव्यः।

प्रत्युत यत्र प्रसादकारणमस्ति श्रीभगवान् तस्मिन् प्रसीदति एव। एतेन श्रीभगवतो वैषम्याशङ्का पक्षपातित्वाशङ्का वा नोपजायते। परमेश्वरसकाशात् कर्मफलप्राप्तिरिति हि 'परात्तु तच्छतेरिति' (ब्र. सू.– २/३/४) वेदान्तसूत्रेऽपि प्रतिपादितम्। कुतर्कमवलम्ब श्रीभगवन्तं प्रति वैषम्यापादनेऽपि तस्य महामायत्वाद् दोषाशङ्का नास्ति। श्रुतिप्रमाणसमर्थनपुरःसरं स्वमतम् आचार्यपादेनेवं व्यवस्थितम्– न तु संकल्पयति आज्ञालङ्घिषु स्वभक्तद्रोहिषु दुरात्मस्वप्रसन्नत्वात्। अत एव श्रूयते 'एष उह्येव साधु कर्म कारयति तं यमुन्निनीषते एष उह्येवासाधु कर्म कारयति तं यमधो निनीषत' इति (कौ. उ.– २/२/८). येषु प्रसादकारणमस्त्याज्ञापालनादि तेषु प्रसीदति। येषु तु तद्वैपरीत्यं तेषु न प्रसीदति, सति कारणे कार्यं कारणाभावे कार्याभाव इति किमत्र वैषम्यम्[28] इति।

सर्वानर्थमूलं कामः क्रोधस्तथा लोभ इत्येतत्त्रयत्यागेनैव सर्वापि आसुरीसंपत्त्यक्ता भवति। समुत्पन्नविवेकेन आसुरीसंपदः कार्यप्रतिबन्धात् अनुत्पत्तिरपि भवत्येव। आसुरीसंपत्त्यागेन श्रेयोमार्गानुगमनेन परागतिः लभ्यते। श्रेयः आचरणस्य अश्रेयोऽनाचरणस्य च शास्त्रमेव कारणम्। शास्त्रादपूर्वोऽर्थावधारणाद् वेदः तदुपजीविस्मृतिपुराणादीनां शास्त्रपदवाच्यत्वं सिद्धम्। शास्त्रसंबन्धिप्रवर्तनानिवर्तनाबोधकः कर्तव्याकर्तव्यज्ञानहेतुः विधिर्लिङादिशब्द एव शास्त्रविधिः। विधिनिषेधातिरिक्तं ब्रह्मप्रतिपादकं शास्त्रमस्तीति सूचयितुम्– 'यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।' (श्री. म. गी.– १६/२३) इति श्लोकस्य 'शास्त्रविधिम्' इत्यत्र विधि–शब्दः प्रयुज्यत इत्येव व्याख्यातं श्रीमन्मधुसूदनेन। तेनोक्तम्– शिष्यतेऽपूर्वोऽर्थो बोध्यतेऽनेनेति शास्त्रं वेदः तदुपजीविस्मृतिपुराणादि च, तत्संबन्धी विधिर्लिङादिशब्दः कुर्य्यादित्येवं प्रवर्तना–निवर्तनात्मकः कर्तव्याकर्तव्य–ज्ञानहेतुर्विधिनिषेधाख्यस्तं शास्त्रविधिं, विधिनिषेधातिरिक्तमपि ब्रह्मप्रतिपादकं शास्त्रमस्तीति सूचयितुं विधिशब्दः[29] इति। केवलं विधिवाक्यमेव शास्त्रं भवितुं नार्हति। यतो विधिवाक्यं साध्यवस्तुस्वरूपधर्मस्य बोधकम्। ब्रह्मणः सिद्धस्वरूपत्वात् तथा विधिवाक्यस्य क्रियाद्योतकत्वाच्च ब्रह्मतत्त्वप्रतिपादकशास्त्रवाक्यं न विधिवाक्यम्। वेदान्तशास्त्रमध्ये

विधिवाक्यैः यत् प्रतीयते तन्न विधिवाक्यानि, विधिवत्प्रतीयमानत्वात्तानि 'विधिवन्निगद' इति कथितानि। प्रमाणान्तरावेद्यापूर्वार्थज्ञापकशास्त्रेण पुरुषार्थः सिध्यति। साध्य–सिद्धस्वरूपेण च पुरुषार्थो द्विविधः। तत्र धर्मः साध्यस्वरूपो ब्रह्मभूयतारूपो मोक्षश्च सिद्धस्वरूपः। साध्यवस्तुप्रतिपादकस्तथा सिद्धवस्तुनिर्देशकरूपेण शास्त्रोऽपि द्विधा विभज्यते। साध्यवस्तुप्रतिपादकशास्त्रस्यापि प्रवर्तना–निवर्तनाभेदेन भेदद्वयं स्वीकार्यम्। तत्र 'कुर्यात्', 'न कुर्यात्' इत्यादयो लिङादिप्रतिपादकशब्दाः प्रवर्तन–निवर्तनयोर्द्योतकाः। तत्र विहितस्यानुष्ठानेन निषिद्धस्य च परिवर्जनेन धर्मः एतद्विपरीताचरणेन अधर्म एव भवेत्। श्रीमत्कुमारिलभट्टपादेन मीमांसादर्शनस्य व्याख्यायामुक्तम्– 'धर्माधर्मार्थिभिर्नित्यं मृग्यौ विधिनिषेधकौ।' निग्रहानुग्रहापेक्षा ब्राह्मणत्वशुद्रत्वादिकारणमपेक्ष्यते। यथा 'राजा राजसूयेन यजेत' इत्यत्र विधिवाक्यविचारपुरःसरं क्षत्रियत्वविशिष्टराज्ञो राजसूययज्ञानुष्ठानं विहितम्। अनधिकारिणा ब्राह्मणेन राजसूययज्ञानुष्ठानं प्रत्यवायजनकम्। एवमनधिकारित्वाच्छुद्रस्य शालग्रामशिलार्चनेऽपि प्रत्यवायो भवत्येव। धर्मस्वरूपनिर्णायकसूत्रव्याख्यायां श्रीमत्कुमारिलभट्टपादेनाभिहितम्–

वैश्यस्तोमेन किं वा स्याद् विप्रराजन्ययोः फलम्।
पञ्चम्यामिष्टिकरणान्मध्याह्ने चाग्निहोत्रतः॥

तस्माद् यद् यादृशं कर्म यत् फलोत्पत्तिशक्तिकम्।
शास्त्रेण ज्ञाप्यते तस्य तादृशस्यैव तत्फलम्॥ इति।

शास्त्रविधेः विपरीताचरणेन अजीर्णरोगाक्रान्तस्य घृतौदनभोजनवद् दोषजनकमेव भवेत्। वेदान्तदर्शनस्य 'अशुद्धमिति चेन्न शब्दात्' (ब्र. सू.– ३/१/२५) इति सूत्रभाष्येऽपि श्रीभगवता शंकराचार्येण प्रोक्तम्– "न, शास्त्रहेतुत्वाद् धर्माधर्मविज्ञानस्य। अयं धर्मः, अयमधर्मः इति शास्त्रमेव विज्ञाने करणम्, अतीन्द्रियत्वात्तयोः अनियतदेशकालनिमित्तत्वाच्च। यस्मिन् देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते, स एव देशकालनिमित्तान्तरेषु अधर्मो भवति। तेन शास्त्रादृते धर्माधर्मविषयं विज्ञानं न कस्यचिदस्ति।" धर्मविषये शास्त्रव्यतिरिक्तं प्रमाणं नास्ति, कुतर्कस्यापि स्थानं नास्ति। धर्माधर्मस्वरूपविज्ञातार्थं शास्त्रमेवावलम्वनीयमिति सर्वैः

स्वीक्रियते। परमर्षिणा जैमिनिना उक्तम्– 'धर्मस्य शब्दमूलत्वात्' इति। अपूर्वार्थबोधकत्वाच्छास्त्रमेव स्वतन्त्रप्रमाणम्। प्रमाणान्तरेण अवेद्यविषयविज्ञातार्थत्वात् शास्त्रस्य अज्ञातार्थज्ञापकत्वरूपप्रामाण्यं सिध्यति। मीमांसादर्शनेऽपि प्रतिपादितम्– 'अप्राप्तेः शास्त्रमर्थवत्' (मी. द.– ६/२/१८) इति।

कर्मानुष्ठातॄणां कर्मसिद्धिविषये श्रद्धा एव कारणम्। यस्य यादृशी श्रद्धा सिद्धिरपि तादृशी भवति। धर्माधर्मरूपसंस्कारानुसारेण श्रद्धायाः सात्त्विकी, राजसी तामसी चेति भेदत्रयं विद्यते। न हि केवलं श्रद्धा परं तु आहारः, यज्ञः, तपः, दानमपि त्रैविध्यं भजते। फलाकाङ्क्षारहितया श्रद्धया कर्मसंपादनमेव सात्त्विकं कर्म– 'श्रद्धया परया तप्तम्' (श्री. म. गी.– १७/१७) इति। प्रत्युपकारार्थं फलमुद्दिश्य वा राजसं कर्म क्रियते। प्रत्युत अश्रद्धया फलाकाङ्क्षया यत् क्रियते तदेव तामसं कर्म– 'असत्कृतमवज्ञातं तत्तामसमुदाहृतम्' (श्री. म. गी.– १७/२२) इति। आहारयज्ञतपोदानादीनां त्रैविध्यकथनेन सात्त्विकानि आदेयानि राजसतामसानि तु परिहर्तव्यानीत्यवगम्यते। अत्राशङ्क्यते पूर्वपक्षैः अदृष्टार्थानां यज्ञतपोदानानाम् अङ्गवैगुण्यादपूर्वानुत्पत्तौ फलाभावात् सात्त्विकानामपि आनर्थक्यप्रसङ्गात् यज्ञादीनां संपादनं कथमुपयुज्यते? तत्रोच्यते, श्रुतिषु ओमिति ब्रह्मणो नाम प्रसिद्धम्। ओम्– अ, उ, म इति त्र्यवयवविशिष्टनामधेयम्। एवम् ॐ तत् सदिति त्र्यवयवमेकं नाम प्रणववद् भगवतो नामधेयम्। ॐ तत् सदिति भगवन्नाम्ना सह यज्ञदानतपःक्रियासंयोगाद् यज्ञादीनामवैगुण्यं भवेत्। 'नष्टाश्वदग्धरथवत्' इति न्यायोऽत्र स्मर्तव्यः। यतो यज्ञादिवैगुण्यपरिहाराय ॐ तत् सदिति भगवन्नामस्मरणं विधेयम्। पुनो भगवन्नामस्मरणेन यज्ञादिवैगुण्यपरिहाराय फलमपि भवत्येव। प्रसङ्गेऽस्मिन् 'प्रसादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् / स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति' स्मृतिवचनमपि स्मर्तव्यम्। पुनश्च ॐ तत् सदित्यनेन पुरा वेधाः ब्राह्मणाः, वेदाः, यज्ञाश्च असृजत्। 'ब्राह्मणाः' इति पदमत्र ब्राह्मण–क्षत्रिय–वैश्यरूप–त्रैवर्णिकोपलक्षणम्। 'वेदाः' पदेन यज्ञादेः करणभूताः वेदाः, 'यज्ञाः' पदेन च कर्माणि विहितानि। एतस्माद् यज्ञादिसृष्टिहेतुत्वेन ॐ तत् सदिति ब्रह्मनिर्देशो यज्ञादिवैगुण्यपरिहारसमर्थः। सर्वमेतद्

*गूढार्थदीपिकायां* प्रतिपादितमाचार्येण– ब्रह्मणो निर्देशः स्तूयते कर्मवैगुण्य–परिहारसामर्थ्यकथनाय– ब्रह्मणो निर्देशः स्तूयते कर्मवैगुण्यपरिहारसामर्थ्यकथनाय– ब्रह्मणो इति त्रैवर्णिकोपलक्षणम्। ब्राह्मणाद्याः कर्तारः, वेदाः करणानि, यज्ञाः कर्माणि, तेन ब्रह्मणो निर्देशेन करणभूतेन पुरा विहिताः प्रजापतिना। तस्माद् यज्ञादिसृष्टिहेतुत्वेन तद्वैगुण्यपरिहारसमर्थो महाप्रभावोऽयं निर्देश इत्यर्थः[30] इति। एवम् ओङ्कारोच्चारणानन्तरं वेदवादिनां विधिशास्त्रबोधिताः यज्ञदानतपःक्रियाः सततं वैगुण्यराहित्येन प्रवर्तन्ते। असात्त्विकमपि श्रद्धासहयोगेनानुष्ठितेऽपि यज्ञस्य वैगुण्यं ओमिति ब्रह्मणो नामनिर्देशेन सात्त्विकं सगुणं च भवति। ब्रह्मणः ओमिति एकावयवोच्चारणादवैगुण्यं सिध्यति चेत्तर्हि सर्वस्योच्चारणात् किं भवेदिति ब्रह्मणः स्तुत्यतिशयत्वं महाप्रभाववत्वं चात्र समुपवर्ण्यते।

मोक्षसंन्यासयोगशीर्षके अष्टादशाध्यायस्य प्रारम्भे सात्त्विकानां ग्रहणाय राजसतामसानां च परिवर्जनाय श्रद्धा–आहार–यज्ञ–तपोदानत्रैविध्येन कर्मिणामपि त्रैविध्यमुक्तम्। संन्यास–त्रैविध्यकथनेन संन्यासिनां त्रैविध्यसत्त्वेऽपि गुणातीतत्वात् फलभूतसर्वकर्मसंन्यासस्य सात्त्विक–राजस–तामसरूप–भेदत्रयं भवितुं नार्हति। प्रत्युत अनुत्पन्नतत्त्वबुभुत्सूनां कर्माधिकृतानां कर्मसंन्यासस्य गुणत्रयाधीनत्वमुक्तम्। तत्र अविदुषां कर्माधिकृतानां किंचित्कर्मपरित्यागस्य त्यागांशरूपगुणेन सह संबन्धवशात् केचन संन्यासपदवाच्यमिति मन्यन्ते। अतोऽत्र संन्यासस्य स्वरूपं तथा त्यागस्य तत्त्वमपि ज्ञातव्यम्। श्रीभगवत्सकाशे अर्जुनेनापि प्रार्थितम्–

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।
त्यागस्य च हृषीकेश पृथक् केशिनिसूदन॥ (श्री. म. गी.– १८/०१)

इति।

अत्र बाह्योपद्रवनिवारणसामर्थ्याद् 'महाबाहो', 'केशिनिसूदन' इति पदद्वयं प्रयुज्यते। भगवतः अन्तरुपद्रवनिवारणसामर्थकथनाय 'हृषीकेश' इति सम्बोधनं प्रयुक्तम्। एवम् एकस्मिन्नेव श्लोके सम्बोधनत्रयेण श्रीभगवन्तं प्रति अनुरागातिशयत्वमेव प्रदर्शितम्– महाबाहो

केशिनिसूदन इति सम्बोधनाभ्यां बाह्योपद्रव–निवारण–स्वरूपयोग्यताफलोपधाने प्रदर्शिते; हृषीकेशेत्यन्तरुपद्रव–निवारण–सामर्थमिति भेदः। अत्यनुरागात् सम्बोधनत्रयम्[31] इति।

संन्यासः त्यागश्च पर्यायशब्दः। सर्वकर्मसंन्यासे कर्मानुष्ठानं नास्ति परं कर्मफलस्य त्यागोऽस्ति। प्रत्युत त्यागविषये कर्मानुष्ठानत्वेऽपि फललिप्सा नास्ति, फलत्यागोऽत्राभिप्रेतः। संन्यासतत्त्वस्यालोचनं सुबृहत्कार्यम्। एतदर्थं स्वल्पवाग्वैचित्रविषयसंपन्नस्य वर्णनमादौ कर्तव्यमिति सूचिकटाहन्याये त्यागतत्त्वस्यालोचनं पूर्वं क्रियते। अत्रोल्लेख्यम्, फलकामनया विधिबोधितानां काम्यानां कर्मणाम् अन्तःकरणशुद्धौ अनुपयुक्तानाम् इष्टिपशुसोमादीनां कर्मणां त्यागः संन्यासः इति पूर्वपक्षिनां मतम्। नित्य–काम्यभेदेन कर्मणो भेदद्वयमस्ति। नित्यकर्मानुष्ठानेन ज्ञानप्रतिबन्धकपापक्षयेण तत्त्वज्ञानं समुत्पद्यते। अतो विविदिषायां नित्यकर्मणां विनियोगात् सत्त्वशुद्धिविविदिषोत्पत्तिद्वारेण तत्त्ववुभुत्सूना नित्यकर्माणि भगवदर्पणबुद्ध्या अनुष्ठेयानि। अतः सर्वाणि काम्यकर्माणि परित्याज्यानीति हि तेषां मतम्। अत्र सिद्धान्तिभिः उच्यते– सर्वेषां काम्यानां नित्यानां च कर्मणां प्रतिपदोक्तफलत्यागं विचक्षणाः त्यागो वदन्ति। कर्मणो फलजनकत्वं विविदिषाजनकत्वं च द्वयमेव शास्त्रसंमतम्। आदौ कर्मणः स्वरूपज्ञानजिज्ञासायाम् उत्पत्तिविधिना केवलं कर्मस्वरूपमेवावबुध्यते। एतदनन्तरं फलजिज्ञासायां स्वर्गादिफलबोधकवाक्येन साकम् अन्तःकरणशुद्धिपूर्वकविविदिषाविषयेऽपि कर्मणः संबन्धः प्रतीयते। कर्मणो विविदिषाजनकत्वं *तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन* (बृह. उ.– ४/४/२२) इति श्रुतिवाक्यादवज्ञायते। *संक्षेपशारीरके*ऽपि अनुरूपोक्तिः समवेक्ष्यते–

> एकाहाहीनसत्रद्वयविधिविहितानेककर्मानुभाव–
> ध्वस्तस्वान्तोपरोधाः कथमपि पुरुषाश्चिद्दिदृक्षां लभन्ते।
>
> यज्ञेनेत्यादिवाक्यं शतपथविहितं कर्मवृन्दं गृहीत्वा
> स्वोत्पत्त्याम्नानसिद्धं पुरुषविविदिषामात्रसाध्ये युनक्ति॥ (सं. शा.– १/६४) इति।

एतेन कर्मणः परित्याज्यत्वमयुक्तमेव परं पुरुषप्रचोदकं कर्मफलं परित्याजनीयमित्यत्र विवक्षितम्। कर्मफलत्यागस्य संन्यासपदवाच्यत्वमत्राभिप्रेतम्। अतोऽन्तःकरणशुद्धये फलाभिसंधिमकृत्वा काम्यानि कर्माण्यपि कर्तव्यानि। नित्यकर्मणां विविदिषासंयोगादपरित्याज्यत्वं तथा फलेन सह काम्यकर्मणां परित्याज्यत्वमेव संन्यास इति हि– 'काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः' (श्री. म. गी.– १८/०२) श्लोकस्यास्य पूर्वार्धस्यार्थः। प्रत्युत संयोगपृथग्–न्यायेन काम्यानां नित्यानां च कर्मणां विविदिषासंयोगात् स्वरूपतोऽनुष्ठानेऽपि फलाभिसंधिमात्र–परित्यागस्य त्याग–पदवाच्यत्वं श्लोकस्य उत्तरार्धे कथितम्। *बृहदारण्यकसंबन्धवार्तिक*कार–सुरेश्वराचार्यस्य मतमुद्धृत्य सर्वमेतद् *गूढार्थदीपिका*यां स्पष्टीकृतम्– नित्यानामेव विविदिषासंयोगेन काम्यानां कर्मणां फलेन सह स्वरूपतोऽपि परित्यागः पूर्वार्धस्यार्थः। काम्यानां नित्यानां च संयोगपृथक्त्वेन विविदिषासंयोगात्तदर्थं स्वरूपतोऽनुष्ठानेऽपि प्रातिस्विकफलाभिसंधिमात्र–परित्याग इत्युत्तरार्धस्यार्थः। तदेतदाहुर्वार्तिककृतः–

> वेदानुवचनादीनामैकात्म्यज्ञानजन्मने। / तमेतमिति वाक्येन नित्यानां वक्ष्यते विधिः॥
>
> यद्वा विविदिषार्थत्वं सर्वेषामपि कर्मणाम्। / तमेतमिति वाक्येन संयोगस्य पृथक्त्वतः॥
>
> (बृह. सं. वा.– ३२१/३२२) इति।[३२]

घट–पटशब्दयोरिव संन्यास–त्यागशब्दयोः भिन्नजातीयार्थत्वं नास्ति। सकलकाम्यकर्मत्यागः संन्यासस्तथा सर्वकर्मणां फलाभिसंधित्याग एव त्यागशब्दस्यार्थः। अन्तःकरणशुद्ध्यर्थं कर्मानुष्ठाने फलाभिसंधित्यागस्य विद्यमानाद् उभययोः एकार्थोऽपि निर्णीतः।

अत्राशङ्का उत्थाप्यते, बन्धहेतुत्वात् सर्वं कर्म दोषवद् दुष्टमिति हेतोः कर्माधिकृतैरपि कर्म त्याज्यमिति केषांचिन्मतम्। अत्रोच्यते, अन्तःकरणशुद्धिद्वारा विविदिषोत्पत्त्यर्थं कर्माधिकारिभिः यज्ञ–दान–तपःकर्म न त्याज्यम्। कर्माधिकारिकर्तृकः फलाभिसंधिपूर्वककर्मत्यागः सत्त्व–रजस्तामसादिभेदेन त्रिधा। किं वा विशेषणाभावाद्विशेष्याभावादुभयाभावाच्च कर्म त्रिविधः कथ्यते। तत्र फलाभिसंधिपूर्वककर्मत्यागः सत्यपि कर्मणि फलाभिसंधिरूपविशेषणत्यागाद् यः

सात्त्विकः त्यागो भवेत्तदेवादेयः। तत्र सात्त्विकेन फलाभिसंधित्यागपूर्वककर्मानुष्ठानरूपत्यागेन शुद्धान्तःकरणस्य समुत्पन्नविविदिषया आत्मज्ञानसाधनभूत–श्रवणाख्यादि–वेदान्तवाक्यविचारे प्रवृत्तिः भवेत्। यज्ञादीनि कर्माणि ज्ञानोपयोगिनी तथापि फलाभिसंधिपूर्वकेनानुष्ठानेन बन्धनहेतुत्वादपि कर्तृत्वाभिनिवेशं त्यक्त्वा अन्तःकरणशुद्धये मुमुक्षुभिः कर्माणि न परित्याज्यानीति आचार्यमतं टीकायां विशदीकृतम्– ज्ञानोपयोगिनीं तु शुद्धिमादधति यानि यज्ञादीनि कर्माणि एतानि फलाभिसंधिपूर्वकत्वेन बन्धनहेतुभूतान्यपि मुमुक्षुभिः संगमहमेवं करोमीति कर्तृत्वाभिनिवेशं फलानि चाभिसंधीयमानानि त्यक्त्वा अन्तःकरणशुद्धये कर्तव्यानीति मे मम निश्चितम्। अत एव हे पार्थ! कर्माधिकृतैः कर्माणि त्याज्यानि न त्याज्यानि वेति द्वयोर्मतयोर्न त्याज्यानीति मम निश्चितं मतमुत्तमं श्रेष्ठम्[33] इति।

पुनश्च पूर्वपक्षिभिः उच्यते– न हि केवलं काम्यकर्मणः दर्शपूर्णमासज्योतिष्टोमादेः पश्वादिहिंसायुक्तत्वात् नित्यकर्मणोऽपि दोषयुक्तत्वमस्ति। अत्र 'अग्नीषोमीयं पशुमालभेत' इत्यादि क्रत्वङ्गहिंसाविहितविशेषविधिवाक्यं 'न हिंस्यात् सर्वभूतानी'ति सामान्यनिषेधस्य तदितरपरत्वं न युक्तमिति हि सांख्यमतम्। विधिनिषेधयोः भिन्नविषयत्वेऽपि तयोः एकत्रैव समावेशो भवितुमर्हति। निषेधेन हिंसायाः पुरुषस्यानर्थत्वज्ञापकत्वेऽपि हिंसा अक्रत्वर्था इति न प्रतिपादिता। हिंसाया अनर्थहेतुता द्योतिता परं सा यज्ञस्य साङ्गत्वसाधनं संपादयति अन्यथा यज्ञवैगुण्यमेव भवेत्। हिंसाविधिः क्रत्वर्थयज्ञस्य साङ्गत्वसंपादिका, एतेन हिंसा न हि अनर्थहेतुरूपा इत्यपि न वक्तव्या। कथितं च– 'हिंसा हि पुरुषस्य दोषम् आवक्ष्यति, क्रतोश्च उपकरिष्यति' इति। 'न हिंस्यादि'ति शास्त्रेण हिंसाया अनर्थहेतुता ज्ञापिता तथा 'अग्नीषोमीयम्' इति हिंसायाः क्रत्वर्थता कथितेव। क्रतूपकारकत्वपुरुषानर्थहेतुत्वयोः एकत्रैव संभवात् ज्योतिष्टोमादिसर्वं हिंसायुक्तत्वाद् दुष्टमेव। विधिविहिता क्रत्वर्था हिंसा अपि निषिद्धेव। विहितस्य निषिद्धत्वं तथा निषिद्धस्यापि विहितत्वं श्येनादियागवदुपयुज्यत इति कारणात् विधिविहितस्य निषिद्धत्वं कथं भवेदिति शङ्का नोत्थापनीया। यतः 'श्येनेनाभिचरन् यजेते' इत्यभिचारविधिना विहितोऽपि 'न हिंस्यात् सर्वभूतानी'ति निषेधविषयत्वात्तदनर्थहेतुरेव।

रागद्वेषादिवशीकृतस्य अनर्थरूपदोषसहिष्णोरेव ज्योतिष्टोमादि–यज्ञकार्ये अधिकारो वर्तते। अतो विधिविहितस्यानर्थफलकत्वं नास्तीति मतमयुक्तम्। आर्षकाव्ये *महाभारते* अहिंसया प्रवर्तमानत्वात् जपयज्ञस्य श्रेष्ठत्वमुक्तम्। ब्राह्मणो जप्येनैव संसिद्ध्येदित्यनेन मनुनापि समर्थितमिदम्। सर्वभूतेषु अहिंसा विद्यमानात् मैत्रो ब्राह्मणः कथ्यते। एवमहिंसां प्रशंसता हिंसायाः दुष्टत्वमेव प्रतिपादितम्। अतो दोषासहिष्णुना कर्माधिकारिणापि श्येनादिकमिव ज्योतिष्टोमादि नित्यं कर्म त्याज्यमिति हि पूर्वपक्षिणामभिमतम्– तथा चोक्तं *महाभारते*– 'जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते। / अहिंसया हि भूतानां जपयज्ञः प्रवर्तते॥' इति। मनुनापि– 'जप्येनैव तु संसिद्ध्येद् ब्राह्मणो नात्र संशयः / कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते॥' इति वदता मैत्रीमहिंसां प्रशंसता हिंसाया दुष्टत्वमेव प्रतिपादितम्। अन्तःकरणशुद्धिश्चेदीदृशेन गायत्रीजपादिना सुतरामुपपत्स्यत इति हिंसादिदोषदुष्टं ज्योतिष्टोमादि नित्यं कर्म दोषासहिष्णुना श्येनादिकमिव कर्माधिकारिणापि त्याज्यमिति प्राप्ते ब्रूमः[34] इति।

अत्र सिद्धान्तिमतं यथा, शास्त्रीयविधिना कर्तव्यतयोपदेशात् क्रत्वर्थहिंसायाः अनर्थहेतुत्वमयुक्तम्। प्रत्युत स्वर्गादिबलवदिच्छाविषयभूता यागादिसाधनताबोधरूपा प्रवर्तना विधिना साध्यते। 'अग्निषोमीयं पशुमालभेत' इति विधिवाक्यं शास्त्रविहितत्वात् ज्योतिष्टोमादिनित्यकर्म हिंसादिमिश्रितत्वेन दोषदुष्टमिति मतमयुक्तम्। प्रसङ्गेऽस्मिन् बादरायणकृतम् 'अशुद्धमिति चेन्न शब्दात्' (ब्र. सू.– ३/१/२५) इति वेदान्तसूत्रं स्मर्तव्यम्। भगवता मनुप्रोक्तं 'जप्येनैव तु संसिद्ध्येद्' इति वाक्यमिदं जपप्रशंसापरं न तु क्रत्वर्थहिंसायाः अनर्थत्वज्ञापकम्। 'न हि निन्दा निन्देति प्रवर्तते' इति न्यायेन क्रत्वर्थहिंसायाः अनर्थत्वे तात्पर्याभावाद् निषेधोऽपि नास्ति। अतः पूर्वपक्षिप्रोक्तं विहितकर्मणि निषिद्धत्वज्ञानम् अनुष्ठेयेऽननुष्ठेयत्वज्ञानं विपर्यासरूपो मोह एव। सिद्धान्तिनां मतमत्र विशदीकृत्य सुष्ठूक्तं *गूढार्थदीपिका*याम्– ज्योतिष्टोमादिकर्म अग्नीषोमीयहिंसादिमिश्रितत्वेन दुष्टमिति चेन्न अग्नीषोमीयं पशुमालभेतेत्यादि–विधिशब्दादित्यक्षरार्थः। जपप्रशंसापरं तु वाक्यं न क्रत्वर्थहिंसाया अधर्मत्वबोधकं तस्य तत्रातात्पर्यात्। तथा च सांख्यानां विहिते

निषिद्धत्वज्ञानमनर्थाहितावनर्थहेतुत्वज्ञानं धर्मे चाधर्मत्वज्ञानमनुष्ठेये चाननुष्ठेयत्वज्ञानं विपर्यासरूपो मोहः तस्मान्मोहान्नित्यस्य कर्मणोः यः परित्यागः स तामसः परिकीर्तितः। मोहो हि तमः[35] इति।

कर्मत्यागप्रसङ्गे सात्त्विकस्त्याग उपादेय इत्युक्तमाचार्यपादेन। कार्यमिदं कर्तव्यमिति बुद्ध्या फलाश्रवणेऽपि कर्तृत्वाभिनिवेशं फलं च त्यक्त्वा अन्तःकरणशुद्धिपर्यन्तं यत् नित्यं कर्म क्रियते स एव सात्त्विकः त्यागः। अत्र मनसि प्रश्नोऽयं समुदेति, नित्यकर्मणां फलं नास्ति तर्हि कथं फलं त्यक्त्वा इत्युच्यते? अत्रोल्लेख्यम्, 'सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः' (श्री. म. गी.– १८/०९) इति भगवद्वचनात् कर्ममात्रस्यैव फलमस्तीति कारणात् निष्फलकर्मणः अनुष्ठानासंभवात् नित्यानामपि फलमस्तीति गम्यते। विषयोऽयमुदाहरणमुखेन स्पष्टीक्रियते। फलार्थे रोपिते आम्रवृक्षे यथा छायागन्धौ अनूत्पद्येते एवं धर्माचरणेनापि आनुषङ्गिकं फलमुत्पद्यते। आपस्तम्बस्मृतिवचनमत्र समुद्धरणीयम्– 'तद्यथाम्रे फलार्थे निर्मिते छायागन्धावनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्त' इति। नित्यकर्मणः अकरणे प्रत्यवायो भवेदिति स्मृतिनियमेन प्रत्यवायपरिहार एव नित्यानां फलमिति गम्यते। भाष्यकारेण मेधातिथिना अपि प्रोक्तम्– 'एतदेव नित्यानां कर्मणां फलं यत् प्रत्यवायपरिहार' इति। नित्यानां स्वर्गलाभादिफलाभावेऽपि स्वर्गप्राप्त्यपेक्षया उत्कृष्टफलमस्ति। यतो नित्यानां निष्कामेनानुष्ठानेन चित्तगतकालुष्यापनोदनेन शुद्धान्तःकरणस्य ज्ञानोदययोग्यता संपद्यते। कर्मत्यागस्य असामर्थत्वमेव आत्मज्ञानरहितस्य संसारित्वे हेतुः। श्रूयते च– 'न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः' इति। अधिष्ठानादिपञ्चके कर्महेतौ तादात्म्याभिमान एवाज्ञस्य कर्मत्यागासामर्थत्वे हेतुः। अधिष्ठानम्, कर्ता, पृथग्विधं करणम्, विविधाः पृथक् चेष्टाः तथा दैवमेव कर्महेतुत्वेनोपयुज्यते। इमानि पञ्च सर्वकर्मणां निष्पत्तये निवर्तकान्येव। दुर्ज्ञानान्येतानि तत्त्वानि अनवहितचेतसा न परिज्ञायते परं सर्वज्ञस्य श्रीकृष्णस्य वचनात्तथा सांख्यशास्त्रादवज्ञायते। सर्वानर्थनिवृत्तये पुरुषार्थप्राप्तये चैतानि तत्त्वानि ज्ञातव्यानि। जीवो ब्रह्म

तयोरैक्यं तथा च तद्बोधोपयोगिनः श्रवणादयः पदार्थाः यत्र संख्यायते व्युत्पाद्यतेऽस्मिन्निति व्युत्पत्त्या सांख्यं वेदान्तशास्त्रमित्यर्थोऽवगम्यते।

अत्र पूर्वपक्षिभिः आशङ्क्यते, आत्मतत्त्वप्रतिपादके वेदान्तशास्त्रे अनात्मभूतानि पञ्च कर्मकारणानि कथं प्रतिपाद्यन्ते? अत्रोच्यते सिद्धान्तिभिः, तत्त्वज्ञानोत्पत्तिपूर्वकेण कर्मान्तनिर्देशार्थं शास्त्र–पदस्य विशेषणरूपेण कृतान्त–पदं निर्दिष्टं तदेव–

'सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्' (श्री. म. गी.– १८/१३)

इति श्लोकव्याख्यायामाचार्येण प्रोक्तम्। 'कृत'–पदेनात्र कर्म उच्यते। तत्त्वज्ञानोत्पत्त्या कर्मणः अन्तो यस्मिन् शास्त्रे कथ्यते तदेव 'कृतान्त' इति। अनात्मधर्म कर्म अविद्यावशाद् आत्मनि अध्यारोपितत्वात् आत्मज्ञानेन अविद्याबाधात् कर्मणोऽपि अन्तो भवति। अनात्मभूतानि पञ्च कर्मकारणानि आत्मनः कर्मासंबन्धप्रतिपादनार्थं वेदान्तशास्त्रे प्रतिपादितान्येव। एतेन अद्वैतशास्त्रतात्पर्यस्य क्वापि हानिर्न भवेत्। गीतायाम्–

'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' (श्री. म. गी.– ४/३३)

इति भगवद्वचनादपि ज्ञानस्य सर्वकर्मान्तत्वं व्यवस्थापितम्। वेदान्तशास्त्रस्य कृतान्तत्वप्रतिपादनेन पूर्वपक्षिणाम् आशङ्का अप्यत्र निराकृता। सर्वमेतत् प्रतिपादयता *गूढार्थदीपिका*यामुच्यते– यदा ह्यन्यधर्म एव कर्मात्मन्यविद्यया अध्यारोपितमित्युच्यते तदा शुद्धात्मज्ञानेन तद्बाधात् कर्मणोऽन्तः कृतो भवति। अतः आत्मनः कर्मासंबन्धप्रतिपादनायानात्मभूतान्येव पञ्च कर्मकारणानि वेदान्तशास्त्रे मायाकल्पितान्यनूदितानीति नाद्वैतात्ममात्रतात्पर्यहानिस्तेषां तदङ्गत्वेनैवेतरत्र प्रतिपादनात्। इहापि च सर्वकर्मान्तत्वं ज्ञानस्य प्रतिपादितं 'सर्वं कर्माखिलं पार्थ! ज्ञाने परिसमाप्यते' इति। तस्माज् ज्ञानशास्त्रस्य कर्मान्तत्वमुपपन्नम्[36] इति।

जीवन्मुक्तिस्वीकारे दीपिकाकारस्य मतमत्र उल्लेख्यम्। अखण्डमद्वितीयानन्दं ब्रह्म साक्षात्कारानन्तरं या मुक्तिः सैव जीवन्मुक्तिः। जीवन्मुक्तपुरुषस्य अविद्यायाः कार्यभूतं देहेन्द्रियसंघातादिकं विद्यते; विदेहकैवल्यलाभेन तत् प्रणश्यति। विरोधिस्वभावत्वात् प्रदीपेन तमः ज्ञानेनाज्ञानं निवर्तितमपि अज्ञानकार्य अहङ्कारादि प्रारब्धकर्मभोगमनुवर्तत इति दृष्टमेव। अत्र अविद्याविनाशरूपकारणनाशेन देहेन्द्रियसंघातरूपकार्य कथं वर्तत इत्याशङ्का जायते। तत्रोच्यते, उपादाननाशे कार्यसद्भावो न केवलं वैदान्तिकैः नैयायिकैरपि स्वीक्रियते। ते समवायिकारणनाशाद् द्रव्यनाशं स्वीकृत्य निरूपादानं द्रव्यं क्षणमात्रं तिष्ठतीत्यङ्गीक्रियते। ये तु असमवायिकारणनाशेन कार्यद्रव्यनाशं स्वीकुर्वन्ति तेषां मतेनापि आश्रयनाशस्थले कार्यद्रव्यं क्षणद्वयमनुपादानं तिष्ठति। एवं स्थिते प्रतिबन्धकसन्निपाते कार्यद्रव्यस्य बहुकालावस्थितिः संभवेत्। प्रत्युत विदेहमुक्तिं प्रति प्रारब्धकर्मरूपप्रतिबन्धकत्वं श्रुतिसिद्धम् अन्तःकरणदेहाद्यवस्थितिरूपम् अर्थापत्तिप्रमाणसिद्धं चैव। एवं शिष्यसेवकाद्यदृष्टस्यापि प्रतिबन्धकत्वमस्ति। विस्तरशः आचार्यपादस्य मतमत्र स्पष्टीक्रियते– यद्यपि ज्ञानेनाज्ञानं निवर्तितमेव दीपेनेव तमस्तस्य तद्विरोधिस्वभावत्वात्, तथापि तदुपादेयमहङ्कारदेहादि निरुपादानमेव यावत् प्रारब्धकर्मभोगमनुवर्तते दृष्टत्वादेव, न हि दृष्टेऽनुपपन्नं नाम। ...नित्यपरमाणुसमवेतद्व्यणुकनाशे त्वसमवायिकारणनाशादेव द्रव्यनाशः। समवायनिरूपित–कारणनाशत्वमुभयोरनुगतमिति नाननुगमः। ये त्वसमवायिकारणनाशमेव सर्वत्र कार्यद्रव्यनाशकमिच्छन्ति तेषामाश्रयनाशस्थले क्षणद्वयमनुपादानं कार्यं तिष्ठति। एवं च तत्रैव प्रतिबन्धकसन्निपाते बहुकालावस्थितिः केन वार्यते[37] इति। तत्त्वज्ञानात् परं शरीरनिष्पाद्यकर्म तथा भोगोऽपि वर्तते। जीवन्मुक्तिविषये *तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये* (छा. उ.– ६/१४/२) इति श्रुतिरेव प्रमाणम्। श्रीभगवता शंकराचार्येणापि ज्ञानोत्पत्तेः प्राक् सञ्चिते सुकृतदुष्कृते क्षीयेते परम् अर्धभुक्तफले तादृशे सुकृतदुष्कृते न क्षीयेते तदेव 'अनारब्धकार्ये एव तु पूर्वे तदवधेः' (ब्र. सू.– ४/१/१५) इति *ब्रह्मसूत्रस्य* भाष्ये प्रतिपादितम्– 'अप्रवृत्तफले एव पूर्वे जन्मान्तरसञ्चिते, अस्मिन्नपि च जन्मनि प्राग्ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते

ज्ञानाधिगमात् क्षीयेते; न त्वारब्धकार्ये सामिभुक्तफले याभ्यामेतद् ब्रह्मज्ञानायतनं जन्म निर्मितम्' इति। जीवन्मुक्तपुरुषव्यतिरिक्तः कोऽपि तत्त्वज्ञानोपदेशविषये समर्थो न भवेत्। अन्यथा अन्धपरंपरान्याय एव प्रसज्येत। श्रुतावाम्नातम्– 'अन्धेनैव नीयमानो यथान्धः' इति। तत्त्वज्ञानोपदेशस्य अन्यथोपपन्नाभावाद् अर्थापत्तिबलेनापि जीवन्मुक्तिः स्वीक्रियते। जीवन्मुक्तपुरुषस्य आचार्यपदवाच्यत्वम् 'आचार्यवान् पुरुषो वेद' इति श्रुतौ निरूपितम्।

वेदान्तशास्त्रप्रतिपाद्य–साक्षात्परमतत्त्वस्य अपरोक्षानुभूतिरूपज्ञानं न भक्तिविवर्जितम्। भक्त्या ज्ञाननिष्ठया च परमात्मस्वरूपभूतम् अखण्ड–सत्य–ज्ञानानन्दरूपं श्रीभगवन्तं साक्षात्क्रियते। एवं तत्त्वतो ज्ञात्वा अखण्डानन्दाद्वितीयं ब्रह्म अहमिति साक्षात्कृत्य सर्वोपाधिशून्यतया भगवद्रूप एवाधिगच्छति। एवमद्वैतज्ञानतत्त्वं स्फुरितं *गूढार्थदीपिका*याम्– भक्त्या निदिध्यासनात्मिकया ज्ञाननिष्ठया मामद्वितीयमात्मानमभिजानाति साक्षात्करोति। यावान् विभुर्नित्यश्च यश्च परिपूर्ण–सत्यज्ञानानन्दघनः सदा विध्वस्तसर्वोपाधिरखण्डैकरस एकस्तावन्तं चाभिजानाति। ततो मामेवं तत्त्वतो ज्ञात्वा अहमस्म्यखण्डानन्दाद्वितीयं ब्रह्मेति साक्षात्कृत्य विशते अज्ञानतत्कार्यनिवृत्तौ सर्वोपाधिशून्यतया मद्रूप एव भवति[38] इति। कर्मणा शुद्धान्तःकरणस्य भगवदेकशरणतया संन्यासो भगवत्प्रसादेन लभते। संन्यासस्य अनधिकारी प्रतिषिद्धानि कर्माणि कुर्वाणः अपि भगवदर्पितसर्वात्मभावेन वासुदेवस्यानुग्रहात् नित्यम् अव्ययं पदमवाप्नोति। भगवदेकशरणः एतादृशः प्रतिषिद्धानि कर्माणि न करोति, कुर्यात्तथापि भगवत्प्रसादात् प्रत्यवायानुत्पत्त्या मोक्षं प्राप्नोति। प्रत्युत भगवद्वचनेषु अहङ्कारवशाद् विश्वासमकृत्वा कामकारेण संन्यासग्रहणेऽपि पुरुषार्थाद् भ्रष्ट इति समवेक्ष्यते। भगवदेकशरणतायाः प्रशंसा टीकायामेवं कृता– एवं भगवान् वासुदेव एव व्यपाश्रयः शरणं यस्य स मदेकशरणो मय्यर्पितसर्वात्मभावः संन्यासानधिकारात् सर्वकर्माणि सर्वाणि कर्माणि वर्णाश्रमधर्मरूपाणि लौकिकानि प्रतिषिद्धानि वा सदा कुर्वाणो मत्प्रसादान्ममेश्वरस्यानुग्रहाद् अवाप्नोति हिरण्यगर्भवन्मद्विज्ञानोत्पत्त्या शाश्वतं नित्यं पदं वैष्णवमव्ययमपरिणामि। ...भगवदेकशरणतास्तुत्यर्थं सर्वकर्माणि सर्वदा कुर्वाणोऽपीत्यनूद्यते[39] इति।

मोक्षप्रसङ्गे मधुसूदनसरस्वती–पादस्य भक्तिमार्गानुसारिव्याख्या तस्य *वेदान्तकल्पलतिके*–त्यभिधेये ग्रन्थेऽपि समुपलभ्यते–

दुरापः शास्त्रार्थो नियतयतमानैरपि बुधै–
र्न संप्राप्तुं शक्यो मलिनमतिना यद्यपि मया।

तथापि श्रीविश्वेश्वरचरणपङ्केरुहसुधा–
सुधाराभिः सिक्तो न कथमपि रिक्तोऽस्मि भविता॥ (वे. क. ल.–
श्लोकसंख्या २) इति।

पुनः ग्रन्थेऽस्मिन् मोक्षे तत्साधनविषये च विविधदर्शन–संमत–मतनिचयस्य समुल्लेखपुरःसरम् अन्ते समुल्लिखितम्– औपनिषदाः, तु भगवता नीलाचलनायकेन नारायणेनानुगृहीताः, निरतिशयानन्दबोधरूप आत्मा एव, अनाद्यविद्यानिवृत्त्युपलक्षितो मोक्षः, इति आचक्षते[40] इति।

श्रीभगवति वासुदेवे सततचिन्तनेन भक्तो भगवन्मना भवति। भगवद्भक्तः प्रेम्ना भगवद्विषयेणानुरागेण सदा तद्विषयं मनः विधीयते। भगवद्विषयोऽनुराग एव तत्पूजनेन तथा पूजोपकरणाभावेनापि कायेन वाचा मनसा च नमस्कारेण स्यादित्युक्तम्। अर्चन–वन्दनाद्यन्येषामपि भागवतधर्माणामुपलक्षणमिदम्। श्रीभागवते नवलक्षणा भक्तिः समुपवर्ण्यते–

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥

इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियेत भगवत्यद्धा तन्मध्येऽधीतमुत्तमम्॥ (भा. पु.– ७/५/२३–२४)
इति।

एवं नियतभागवतधर्मानुष्ठानेन भगवन्मना वासुदेवमेव प्राप्स्यसीति विषये संशयं न कुर्यादित्यपि व्याख्यातं टीकायाम्– ...मां भगवन्तं वासुदेवमेव एष्यसि प्राप्स्यसि वेदान्तवाक्यजनितेन

मद्बोधेन। त्वं चात्र संशयं मा कार्षीः, सत्यं यथार्थं ते तुभ्यं प्रतिजाने सत्यमेव प्रतिज्ञां करोम्यस्मिन्नर्थे[41] इति। परमानन्दघनमूर्तिमनन्तं श्रीभगवन्तं वासुदेवमेव परमं तत्त्वं मत्वा प्रेमप्रकर्षेण सर्वानात्मचिन्ताशून्यया तैलधारावदविच्छिन्नया मनोवृत्त्या सतत–मनुचिन्तयेदित्यर्थोऽवगम्यते।

साधनाभ्यासपरिपाकवशाद् भगवच्छरणत्वं त्रिधा एव। अहं तस्य, असौ मम, स अहमेवेति भेदत्रयकथनेन भक्तिज्ञानयोगयोः समन्वयोऽत्र प्रतिष्ठितः। गीतोपनिषदि साध्य–साधनभावापन्नं कर्म–भक्ति–ज्ञाननिष्ठात्रयं प्रपञ्चितम्। तत्र 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' (श्री. म. गी.– १८/४६) इत्यत्र सर्वकर्मसंन्यासात् प्राक् कर्मनिष्ठायाः, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' (श्री. म. गी.– १८/५५) इत्यत्र सर्वकर्मसंन्यासपूर्वक–श्रवणादि–परिपाकसहकृत–ज्ञाननिष्ठायाः तथा उभयसाधनमूलोभयफल–भूतायाः भक्तिनिष्ठायाः 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' (श्री. म. गी.– १८/६६) इत्यत्र उपसंहरणं क्रियते। निष्ठात्रयं प्रतिपाद्य भगवच्छरणागतेः भेदत्रयव्याख्यानावसरे आचार्यपादेन यदुक्तं तेन रसिकभक्तस्य द्रवीभूतचित्तं परमानन्देनाप्लुतमिति प्रतीयते। तदुक्तमाचार्यवरेण–

तत्राद्यं मृदु यथा–

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः॥

द्वितीयं मध्यं यथा–

हस्तमुत्क्षिप्य यातोऽसि बलात् कृष्ण किमद्भुतम्।
हृदयाद्यदि निर्यासि पौरुषं गणयामि ते॥

तृतीयमधिमात्रं यथा–

सकलमिदमहं च वासुदेव! परमपुमान् परमेश्वरः स एकः।
इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान् विहाय दूरात्॥[42] इति।

श्रीकृष्ण एव परमतत्त्वमिति हि श्रीमन्मधुसूदनमतम्। परमतत्त्वस्य यथार्थज्ञानं केवलं भक्त्या एव संभवेत्तथा भक्तिर्हि परमतत्त्वं प्रति शुद्धचित्तस्याकर्षणरूपेव। अत्र बुद्धिवृत्त्या तत्त्वविषयिका चर्चा वेदान्त–प्रतिपाद्यज्ञानरूपेति न वक्तव्या। परमतत्त्वस्य साक्षादपरोक्षानुभूतिः ज्ञानपदवाच्येव। त्रिगुणातीततत्त्वस्य निस्त्रैगुण्यरूपेणानुभवोऽयम्। उपलब्धिरियं वेदान्त–प्रतिपाद्यज्ञानमिति आचार्याभिप्रेतम्। प्रत्युत रजस्तमोमलासंस्पृष्टेन शुद्धसत्त्वगुणविशिष्टचित्तेन विशुद्धसत्त्वोपाधिसमन्वितस्य परमतत्त्वश्रीभगवतोऽनुभूतिरेव शुद्धा भक्तिः। सात्त्विकोपाधेरावरणेनानुभवाद्भक्तिरपि च सर्वोपाध्यतिक्रान्त–निरावरणसुन्दररूपेण द्रष्टृ–दृश्यशून्य–ज्ञानस्वरूपस्य साक्षात्प्रकाशाज् ज्ञानमिति हि भक्तिज्ञानयोर्भेदः। चित्तस्य सत्त्वोत्कर्षादृते कदापि ज्ञानं न लभते। रजोस्तमोमलापसृताच्छनैः शनैः सत्त्वोत्कर्षाधिक्याद् विशुद्धसत्त्वमूर्ति–श्रीभगवन्तं प्रति चित्ताकर्षणं प्रगाढं भवति। भक्तिरियं ज्ञानस्य सोपानभूतम्।

अद्वैतवेदान्तिमधुसूदनसरस्वती धर्माचरणविषये वैष्णवमतादर्शी आसीत्। गौडीयवैष्णवमतेन जीवस्तु परमात्मनः अंशभूतः; परमात्मना सह जीवस्याभेदोऽत्र न स्वीक्रियते। परमेश्वरेण सह भक्तस्य सायुज्यं तत्राभिप्रेतम्, न तु ऐकात्म्यम्। वैष्णवमतेन सह मधुसूदनस्याद्वैतभावनायाः भिन्नत्वेऽपि मतद्वयस्य तुलनात्मिका चर्चा अत्र क्रियते। वैष्णवमतेन, प्रकृतिशरीरे प्रविष्ट ईश्वरो निखिलोऽयं प्रपञ्चं सृजति। कारणरूपेण ईश्वरस्य चेतनत्वं कार्यरूपेण च जाड्यत्वमङ्गीकरणीयम्। भगवतः अविचिन्त्यशक्तेः स्वरूपनिर्धारणस्यासंभवात् जडचैतन्ययोर्विरुद्धधर्मयोः समावेशः एकस्मिन्नेव नित्यचैतन्यविग्रहस्वरूपभूतपरमात्मनि संभवेत्। जीवब्रह्मणोः देहदेहिभावेन गुणगुणिभावेन वा भिन्नत्वमभिन्नत्वमपि स्वीकार्यम्। गौडीयवैष्णवदर्शनस्वीकृतोऽचिन्त्यभेदाभेद–संबन्धोऽत्र विचार्यः। अत्रोल्लेख्यम्, पुरा वङ्गदेशवासिन्य आर्यावर्तवासिन्यो वा 'गौडीय'शब्दाभिधेया आसन्। सुप्रसिद्धमाभाणकवाक्यमिदं श्रूयते–

सारस्वताः कान्यकुब्जा उत्कला मैथिलाश्च ये।
गौडाश्च पञ्चधा चैव पञ्चगौडाः प्रकीर्तिताः॥ इति।

श्रीचैतन्यमहाप्रभोर्जीवत्कालं यावच्छ्रीचरणानुसारिणो 'गौडीय'रूपेण परिचीयते। स्वसंप्रदायसहस्राधिदेवाराध्यगौरसुन्दरस्य ईशत्वात् संप्रदायस्यास्य 'गौरेश्वरसंप्रदाय' इति नामान्तरमपि परिलक्ष्यते। ब्रह्मणः समुद्भूतत्वाद् माध्वमतपुष्टत्वात् श्रीगौराधीशे चरमपरिणतिलाभाच्चायं 'ब्राह्म–माध्व–गौरेश्वर'संप्रदाय इत्यपि वक्तुं शक्यते। प्रमेयविषयेऽसामञ्जस्येऽपि माध्वमतपुष्टद्वैतवादमवलम्ब्य श्रीगौराङ्गस्याचिन्त्यभेदाभेदवादस्य स्थापनमिति केषांचिन्मतम्।

अचिन्त्यभेदाभेदसंबन्धोऽत्र विचार्यः। शक्तिमतः शक्तेर्पृथक्करणमसंभवमेव। तत्तु अग्नेर्दाहिकाशक्तिरूपा। दाहिकाशक्तिभिन्ना अग्नेरस्तित्वं न कल्प्यते। दाहिकाशक्तिः सर्वदा अग्नावेव वर्तते। शक्तिमानवस्तु एव विशेष्यः शक्तिश्च तस्य विशेषणम्। विशेष्यविशेषणयोः सम्पर्कोऽविच्छेद्यरूपः। स्वरूपस्य प्रकाशोन्मुखेन शक्तेः शक्तित्वं सिध्यति, न त्वन्यथा। कार्योन्मुखसंपन्नविशेष्य एवात्र विशेषणम्, उभयोर्मेलने समुद्भवति एकमेव वस्तु। यथा– अग्न्युत्तापयोः सूर्यकिरणयोर्मेलनेन अग्नेः सूर्यस्य चात्मप्रकाशो दृश्यते। अनेनाविविक्तशक्तिशक्तिमत्त्वमभेदतया प्रतिपादितम्। तयोर्मध्ये न केवलमभेदसम्पर्को भेदसम्पर्कोऽपि स्वीक्रियते वैष्णवाचार्यैः। मन्त्रौषधिप्रयोगेनाग्नेर्दाहिकाशक्तिर्यदा स्तिमिता जाता तदा प्रज्ज्वलिताग्निस्पर्शेन दहनरूपकार्य न संभवेत्, अग्निस्तु परिदृश्यत एव। अनेन अग्नेः तस्य दाहिकाशक्तेश्च भिन्नत्वमवधारणीयम्। अतः शक्तिशक्तिमतोर्भेदोऽप्यङ्गीकर्तव्यः। भेदाभेदसंबन्धोऽयं गौडीयवैष्णवमतेन तर्कातीतोऽचिन्त्यरूपः। उदाहरणमुखेन विषयोऽयं स्पष्टीक्रियते। कस्तूर्याः सुगन्धः कस्तूरीदेहमध्ये वर्तते। एतेन कस्तूर्या सह गन्धस्याभेदः प्रतीयते। अभेदे स्वीकृते सति प्रश्नोऽयं समुदेति, कस्तूरीशरीराद्बहिः गन्धोऽनुभूयते स्यात्तर्हि मृगमदगन्धयोरभेदः कथमुपपद्यते? उपादानभेदेन वस्तुभेदात्तयोर्भेदोऽपि स्वीकर्तव्यः। मृगमदस्य देहाद् बहिःप्रदेशे गन्धस्य विस्तारेऽपि मृगदेहस्य गुरुत्वपरिमाणवत्त्वस्य किंचिदपि तारतम्यं न परिलक्ष्यते। भेदस्याङ्गीकारे अवस्थेयं न व्याख्यागम्या भवेत्। अतो मृगमदगन्धयोर्मध्ये न भेदसंबन्धो नाप्यभेदसंबन्धोऽङ्गीकर्तव्यः। परं

संबन्धोऽयमचिन्त्यभेदाभेदरूपः। भेदाभेदादिविरुद्धैः चिन्तयितुमशक्यत्वादचिन्त्यमित्युक्तम्। शक्तिमात्रस्यैवाचिन्त्यज्ञानगोचरत्वं दर्शनसंप्रदायेऽस्मिन् निर्णीतम्। हेतुना वस्तुशक्तेर्निरूपणायोग्यत्वाद्वस्तुशक्तेरस्तित्वं नास्वीकारार्हम्। अविचिन्त्य–शक्तिप्रभावेणैव जीवजगद्भ्यां सह परब्रह्मश्रीहरेर्लीलामाधुर्यं संपादितम्। श्रुतावपि ब्रह्मणः विचित्रशक्तेर्वर्णनं समुपलभ्यते। एवं गौडीयवैष्णवदर्शनस्वीकृतोऽचिन्त्यभेदाभेदवादो विशदीकृतः।

मधुसूदनसरस्वतीमतेन श्रीकृष्ण एव परमतत्त्वमिति वचनम् अद्वैतमतविरुद्धमिति न निरुपितम्। आचार्यपादाभिप्रेता साकारकृष्णोपासना एवात्रोपासनायां परमतत्त्वम्। उपास्यतत्त्वेषु भगवतः श्रेष्ठत्वेऽपि तस्य ज्ञेयत्वमवश्यमेव निर्गुणं निर्विशेषं च। एतेन श्रीकृष्णतत्त्वेनाद्वैततत्त्वं न खण्डितमिति निश्चप्रचम्। गौडीयमतेन तु, निर्गुणप्रतिपादकश्रुतिवाक्येभ्यो ब्रह्मणः निर्गुणत्वं न निरूपितम्। ब्रह्मणि सत्त्वादिप्राकृतगुणत्रयं नास्ति परम् अप्राकृतानन्तकल्याणगुणोऽस्तीति हि श्रुतिवाक्यानां प्रकृततात्पर्यम्। श्रीभागवते ब्रह्म परमात्मा भगवानिति शब्देन उच्यते–

'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते' (भा. पु.– १/२/११) इति।

वासुदेवस्य भगवत्स्वरूपमप्यत्र विनिर्णीतम्– 'कृष्णस्तु भगवान् स्वयम्' (भा. पु.– १/३/२८) इति। परमशक्तिमतो ब्रह्मणो वर्णनं *श्वेताश्वतरोपनिषद्य*पि श्रूयते– 'परास्य शक्तिर्विविधैव श्रूयते। स्वाभाविकी ज्ञान–बल–क्रिया च' (श्वे. उ.– ६/८) इति। ब्रह्मणि यत् सर्वज्ञत्वं सर्वशक्तिमत्त्वमानन्दरूपत्वं चास्ति तत्तु निर्विशेषब्रह्मणि न संभवति। ब्रह्मणः चिद्विलासत्वं लीलामयत्वं च 'लोकवत्तु लीलाकैवल्यम्' (ब्र. सू.– २/१/३३) इति वेदान्तसूत्रेऽपि प्रतिपादितम्। ब्रह्मणः अनन्तशक्तिमध्ये शक्तित्रयं प्रधानत्वेन कल्प्यते– पराशक्तिः(स्वरूपशक्तिः); जीवशक्तिः(क्षेत्रज्ञशक्तिः); मायाशक्तिश्च। जीवजगतोरुभयोरेव ब्रह्मणः शक्तिरूपत्वं परब्रह्मणश्च सर्वशक्तिमत्त्वं गौडीयवैष्णवसंप्रदायेऽस्मिन् विनिर्णीतम्। अनन्तकोटिजीवसत्ता जीवशक्त्या अंशरूपा। श्रीभगवान् स्वयमेव जीवशक्त्याः प्रसङ्गसामान्यं *श्रीमद्भगवद्गीता*यां निगदितम्–

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।

अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ (श्री. म. गी.– ०७/०४) इति।

जगदिदं ब्रह्मणः बहिरङ्गा मायाशक्त्याः परिणामभूता एवेतदप्यत्र कथितम्–

अपरेयमितस्त्वन्यां प्रकृतिं बिद्धि मे पराम्।

जीवभूतां महाबाहो ययेदं धार्यते जगत्॥ (श्री. म. गी.– ०७/०५) इति।

ब्रह्मणः मायाशक्तिपरत्वमपि श्रुतौ गीयते–

'माया तु प्रकृतिं विद्यान्मायिनस्तु महेश्वरम्।' (श्वे. उ.– ०४/१०) इति।

एवं निखिलोऽयं प्रपञ्चेण सह परब्रह्मणः शक्तिशक्तिमतोः संबन्धः सुनिर्दिष्टः। संबन्धस्यास्य स्वरूपं किमित्यस्य समाधानप्रसङ्गे वैष्णवाचार्यैरुक्तम्– "स्वरूपमिदं न भेदसंबन्धरूपो न त्वभेदसंबन्धरूपो न वा भेदाभेदसंबन्धरूपः परं त्वचिन्त्यभेदाभेदसंबन्धरूप एव" इति।

## उपसंहृतिः

*गूढार्थदीपिका*यां ज्ञानयोगविषये मधुसूदनसरस्वतीकृता व्याख्या पर्यालोचनप्रसङ्गे माध्वमतपुष्टगौडीयवैष्णवमतेन साकमद्वैतवेदान्तदर्शनस्य प्रभेदा अत्र विचार्यते। मध्वाचार्यसंमतं नवधा तत्त्वम् एवंविधम्– प्रथमम्, श्रीहरिः विष्णुर्वा सर्वोत्तमं तत्त्वम्; द्वितीयम्, सर्वशास्त्रप्रतिपाद्य–श्रीहरिसंबन्धिज्ञानं केवलं शास्त्रादवज्ञायते; तृतीयम्, जगदिदं सत्यम्; चतुर्थम्, जीवस्य तथा जगतः श्रीहरेर्भिन्नत्वं स्वीकरणीयम्; पञ्चमम्, जीवाः श्रीहरेर्नित्यसेवकाः; षष्ठम्, बद्ध–मुक्तभेदेन जीवानां भेदद्वयमङ्गीकरणीयम्; सप्तमम्, श्रीविष्णोः पादपद्मलाभस्तथा जीवस्य स्वरूपाभिव्यक्तिर्वा मुक्तिरेव। अष्टमम्, शुद्धा भक्तिः मुक्तेः साधनभूता; प्रत्यक्षानुमानशब्दभेदेन प्रमाणं त्रिविधमिति हि नवमं तत्त्वम्। ब्रह्मैव एका स्वतन्त्रसत्ता। श्रीहरिः एव ब्रह्म। संप्रदायेऽस्मिन् न तु ब्रह्मणो निर्गुणत्वं परं सगुणत्वमेव स्वीक्रियते। अनन्तकल्याणगुणनिचयस्य आकरभूतस्य ब्रह्मणः सर्वदोषशून्यत्वं ज्ञेयम्। 'एकमेवाद्वितीयम्' इति वाक्यं ब्रह्मण एकत्वस्य तथा अद्वितीयत्वस्य ज्ञापकम्। तथापि ब्रह्मभिन्नं

तत्त्वं नास्तीति न हि एकत्वस्याद्वितीयत्वस्य चार्थः। जीवस्य तथा जगतो ब्रह्मसदृशं नित्यत्वं सत्यभूतत्वमप्यवधेयम्। परं ब्रह्माधीनत्वात् तयोः ब्रह्मणः 'द्वितीयम्' इति न वक्तव्यम्। जगदतिरिक्तोऽपि ब्रह्म जीवस्यान्तरात्मारूपेण जगल्लीनमपि। सक्रियब्रह्मणः अष्टविधा क्रिया यथा– सृष्टिः, स्थितिः, प्रलयः, शासनम्, ज्ञानदानम्, स्वरूपप्रकाशः, बन्धः, मुक्तिश्चेति। ब्रह्म जगतो निमित्तकारणमात्रम्, न तूपादानकारणम्। कुम्भकारस्य मृत्पिण्डात् मृन्मयघटनिर्माणवद् ब्रह्म अपि अचेतनप्रकृतेः जगदिदं सृजति। अत्रोल्लेख्यम्, अद्वैतवेदान्तमतेन ब्रह्म जगतो न हि केवलं निमित्तकारणं परं तूपादानकारणमपि। माध्वमतेन सहाद्वैतमतस्य प्रभेदोऽत्र लक्ष्यते।

पुनश्च, सच्चिदानन्दमयं ब्रह्म अनन्तमूर्तिविशिष्टम्। विष्णोः स्वरूपेण सह गुण–नाम–रूप–लीला–देहादीनामभिन्नत्वाद् हस्तपदादिविशिष्टोऽपि तस्य स्वगतभेदरहितत्वमवज्ञेयम्। अतो माध्वसंमतं ब्रह्म सगुणमपि स्वगतभेदशून्यम्; परमद्वैतमतेन निर्गुणत्वान्निर्विशेषाच्च ब्रह्म स्वगतभेदरहितमिति विवेकः।

माध्वमतेन ज्ञानमेव मुक्तेः सोपानम्। कामनासंयुक्तचेतसि ज्ञानस्योदयो न भवत्येव। एतदर्थम्, निःशेषेण सकामकर्मपरित्यागपूर्वकं निष्कामकर्म अनुष्ठेयम्। स्वतन्त्रास्वतन्त्रपदार्थद्वयस्य प्रकृतस्वरूपनिरूपणमेव ज्ञानम्। तेन ब्रह्मणः कर्तृत्वम्, जीवजगतोः ब्रह्माधीनत्वं तथा जीवेश्वरादिभेदपञ्चकस्य पूर्णोपलब्धिरेव ज्ञानम्। मध्वाचार्यसंमतद्वैतवादेन साकं बहुष्वेव विषयेषु रामानुजाचार्यस्य मतसादृश्यं परिलक्ष्यते। अत्र राधाकृष्णनमहोदयैः सम्यगेवोक्तम्–

A leading form of reaction against Śaṃkara's Advaitism is the dualistic philosophy associated with the name of Mādhva, which has many points in common with Rāmānuja's view of reality. Mādhva stands out for unqualified dualism and insists on the five great distinctions of God and the individual soul, God and matter, one soul and another, and one part of matter and another. (*Indian Philosophy*, Vol. II, pp 738).

ज्ञानात् प्रगाढा भगवद्भक्तिः ईश्वरप्रीतिर्वा स्वतः समुद्भवति। भगवद्भक्तिरियं ध्यानजनकम्। साधकः परमेश्वरं निरन्तरं ध्यायति; ध्यानमेव मुक्तेः साक्षात्कारणम्। भगवत्कृपा मुक्तिलाभस्य

कारणभूतेति हि मध्वाचार्यमतम्। भगवत्प्रसादमन्तरेण मुक्तिः सर्वथा असंभवेति बहुधा उच्यते। प्रसङ्गेऽस्मिन् सुरेन्द्रनाथदाशगुप्तमहाभागानामुक्तिरियं समुद्धरणीया–

It is only through devotion(bhakti) that there can be liberation; even the emancipated enjoy the eternal flow of pleasure through devotion; bhakti, or devotion, is here defined as an affection with the full consciousness of the greatness of the object of devotion, and it is regarded as the universal solvent. Even the performance of all religious duties cannot save a man from hell, but bhakti can save a man even if he commits the worst sin. Without bhakti even the best religious performances turn into sin, and with bhakti even the worst sin do not affect a man. God is pleased only with bhakti and nothing else, and He alone can give salvation. (*A History of Indian Philosophy*, Vol. IV, pp 58)

संप्रदायेऽस्मिन् ब्रह्मणा सह जीवब्रह्मणोः भेदज्ञानं ज्ञानपदवाच्यमिति स्वीक्रियते। जीवब्रह्मणोः अभेदज्ञानं न हि मुक्तिकारणं परमनन्तानर्थकारणमिति मान्यम्। अद्वैतमते तु तयोः अभेदज्ञानं साक्षान्मुक्तिकारणमिति भेदः।

अत्रोल्लेख्यम्, माध्वमतपुष्टत्वेऽपि प्रमेयादिविषये गौडीयवैष्णवमतेन सह माध्वमतस्य प्रभूतवैषम्यमस्ति। यथा, श्रीमन्मध्वाचार्यः *भागवततात्पर्यम्* इति ग्रन्थे निगदितम्, व्रजगोपीभ्यो महिषीनिचयो भक्तितः श्रेष्ठा। महीषीभ्यः यशोदा, यशोदायाः देवकी, देवक्याः वसुदेवः, वसुदेवादर्जुनः, अर्जुनाच्छ्रीवलरामः श्रेष्ठः। परं परमपुरुषोत्तमस्य ब्रह्मापेक्षा भक्तस्याभावात् तस्यैव सर्वश्रेष्ठत्वमुपयुज्यते। माध्वमते ब्रह्मा एव प्राणवायुः, प्राणवायोरुपासनमेव श्रेष्ठोपासनम्। अत एवोक्तं *भागवततात्पर्ये*–

कृष्णप्रियाभ्यो गोपीभ्यो भक्तितो द्विगुणाधिकाः।
महिष्यष्टौ विना यास्ताः कथिताः कृष्णवल्लभाः॥

ताभ्यः सहस्रसमिता यशोदा नन्दगेहिनी।
ततोऽप्यभ्यधिका देवी देवकी भक्तितस्ततः॥

वसुदेवस्ततो जिष्णुस्ततो रामो महाबलः।
न ततोऽभ्यधिकः कश्चिद् भक्त्यादौ पुरुषोत्तमे।

विना ब्रह्माणमीशेशं स हि सर्वाधिकः स्मृतः॥[43] इति।

किं तु मतमिदं गौडीयसंप्रदायविरुद्धम्। श्रीरायरामानन्देन सह साध्यसाधननिर्णयप्रसङ्गे राधापारम्यवाद एव स्वीक्रियते। एतेन श्रीराधाप्रेम एव श्रेष्ठत्वेन भजते। तत्र श्रीकृष्णदासकविराजगोस्वामिना भणितम्–

व्रजबधू सङ्गे कृष्णेर रासादि विलास।
येइ इहा कहे शुने करिया विश्वास॥

हृद्रोग–काम तार तत्काले हय क्षय।
तिन गुण क्षोभ नाहि, महाधीर हय॥

उज्ज्वल मधुर प्रेम–भक्ति सेइ पाय।
आनन्दे कृष्ण–माधुर्ये विहरे सदाय॥[44] इति।

रघुनाथदासगोस्वामिकृत–*प्रेमाम्भोजमकरन्दः* इति ग्रन्थस्य स्तोत्रानुवादप्रसङ्गेऽपि कृष्णदासकविराजेन राधिकाप्रेममाहात्म्यमिदं संसूचितम्।

मध्वाचार्यकृतस्य *श्रीमद्भागवतस्य* भाष्यादौ ब्रह्ममोहनलीला अस्वीकृता। विषयोऽयम् एकस्मिन्नेव महाग्रन्थस्यैकांशस्य स्वीकरणमन्यांशस्यास्वीकरणमिति अर्धकुक्कुटीन्यायेन उपमीयते। प्रमाणचूडामणिसदृशस्य *श्रीमद्भागवतस्य* भाष्यादौ श्रीमज्जीवादिकृत–ब्रह्ममोहनलीलाया व्याख्या समुपलभ्यते। श्रीसनातनस्य *बृहद्भागवतामृते,* श्रीरूपस्य *संक्षेपभागवतामृते,* श्रीजीवस्य *कृष्णसन्दर्भे*ऽपि वृषभानुनन्दिनी श्रीराधा स्तूयते। परं विषयेऽस्मिन् मध्वाचार्यकृता व्याख्या गौडीयमतविरुद्धा।

माध्वमतेन श्रीकृष्णप्रेयस्यः गोप्यः स्वर्वेश्याभिः सह तुल्यते। मतमिदं वैष्णवशास्त्रविरुद्धमिति निश्चप्रचम्। श्रीकृष्णमहिषीप्रधाना सत्यभामापि श्रीराधिकासदृशसौभाग्यं प्रार्थयते। श्रीराधिकायाः सौभाग्यातिशयस्य पराकाष्ठा एतेन द्योतिता। कृष्णभक्तशिरोमणिः श्रीराधा

अरुन्धत्यपेक्षया गरियसी लक्ष्म्यपेक्षया सुन्दरी। ब्रह्मापि श्रीराधिकायाः दासानुदास एव। *बृहद्गौतमीयतन्त्रे* उच्यते–

देवी कृष्णमयी प्रोक्ता राधिका परदेवता।

सर्वलक्ष्मीमयी सर्वकान्तिः संमोहिनी परा॥ इति।

*पद्मपुराणस्य* कार्तिकमाहात्म्यस्य शौणकनारदसंवादेऽपि समुपलभ्यते–

वृन्दावनाधिपत्यं च दत्तं तस्मै प्रत्युष्यता।

कृष्णेनान्यत्र देवी तु राधा वृन्दावने वने॥ इति।

गोप्यस्तु श्रीराधायाः कायव्यूहस्वरूप इति हि वैष्णवाचार्याणां स्वतःसिद्धसिद्धान्तः।

पुनश्च, वैष्णवशास्त्रादौ शान्तरसात् शृङ्गाररसस्य, शृङ्गारे दाम्पत्यभावादौपपत्यभावस्योत्कर्षः स्थिरीक्रियते। श्रीकृष्णचरणारविन्दभजनार्थमार्यपथपरित्यागात् श्रीमदुद्धवोऽपि गोपीपदमभजत्। तत्र उद्धवः श्रीकृष्णापेक्षया न हीनः। *श्रीमद्भागवतेऽ*पि श्रीभगवता प्रोक्तम्–

नोद्धवोऽन्वपि मन्न्यूनो यद् गुणैर्नार्दितः प्रभुः।[45] इति।

मध्वाचार्यस्तु उद्धवाच्चतुर्मुखब्रह्मणः श्रेष्ठत्वं प्रतिपादितम्। *भागवततात्पर्ये* तेनोक्तम्–

यादवेभ्यश्च सर्वेभ्य उद्धवो भगवत्प्रियः।

उद्धवाश्च प्रियतमः प्रद्युम्नस्तु महारथः॥

तस्मादपि प्रियतमो रामः कृष्णस्य सर्वदा।

नैव तस्मात् प्रियतमो विनैकन्तु चतुर्मुखम्॥ इति।

प्रत्युतः

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनः।

मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥ (श्री. म. गी.– ८/१६)

उद्धृतेऽस्मिन् श्लोके ब्रह्मलोकस्यापि विनाशित्वात् ब्रह्मलोकस्तमभिव्याप्य सर्वे लोकाः पुनरावर्तनशीलाः इति हि भगवदभिप्रेतम्। क्रममुक्तिफलाभिरुपासनाभिर्ब्रह्मलोकं प्राप्तास्तेषामेव ब्रह्मणा सह मोक्षो भवति, नान्येषाम्। तथा चोक्तम्–

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥

ब्रह्मलोकस्यापि विनाशः संभवतीति ह्यत्रोक्तम्। एतद्धि श्रीधरस्वाम्यादिवैष्णवाचार्याणामभिमतम्। माध्वमते तु ब्रह्मलोकस्य विनाशो न भवति। गीताभाष्ये तेन निगदितम्– 'महामेरुस्थब्रह्मसदनमारभ्य न पुनरावृत्तिः।' इति। *नारायणगोपालकल्प*नामधेयग्रन्थस्य प्रमाणमुद्धृत्य तत्कृतगीताभाष्ये श्रीभगवत्प्रोक्तवाक्यस्य विरुद्धव्याख्यानं तेन कृतम्।

पुनश्च, भागवतपुराणस्य दशमस्कन्धान्तर्गतोनत्रिंशतोऽध्यायात् त्रयस्त्रिंशतोऽध्यायपर्यन्ताद् अध्यायपञ्चकमेव 'रासपञ्चाध्यायी' इत्यभिधीयते। सर्वलीलामुकुटमणेः रासलीलायाः वर्णनमत्र दृश्यते। रासपञ्चाध्यायाः भाष्यं सर्वैः वैष्णवाचार्यैः विरचिताः। मध्वाचार्यस्तु केवलमूनत्रिंशतोऽध्यायस्य भाष्यं प्रणीतवान्। तत्रापि जारबुद्ध्या श्रीकृष्णोपासनाया निन्दा क्रियते। एतत्तु सर्वथा गौडीयवैष्णवशास्त्रविरुद्धम्।

एवं प्रमेयादिविषये गौडीयवैष्णवमतेन सह माध्वमतस्य प्रभूतवैषम्यं सुस्पष्टतया प्रतिफलितम्। परमाद्वैतवेदान्तिमधुसूदनसरस्वती धर्माचरणविषये वैष्णवमतावलम्वी आसीदिति कारणात् गौडीयवैष्णवदर्शनस्य मूलीभूततत्त्वेन सह माध्वमतेन सह गौडीयवैष्णवमतादर्शस्य पार्थक्यमप्यत्र आलोचितमित्यलमतिविस्तरेणेति शम्।

[1] गू. दी. , उपक्रमणिका– ५
[2] गू. दी. , उपक्रमणिका– १०
[3] गू. दी. , गीता, १४/०१
[4] गू. दी. , उपक्रमणिका– १९
[5] गू. दी. , उपक्रमणिका– २०
[6] गू. दी. , गीता, १३/०१
[7] गू. दी. , गीता, १३/०२
[8] गू. दी. , गीता, १३/१०
[9] गू. दी. , गीता, १३/१३
[10] गू. दी. , गीता, १३/१५
[11] गू. दी. , गीता, १३/१८
[12] गू. दी. , गीता, १३/३०
[13] गू. दी. , गीता, १३/३१
[14] गू. दी. , गीता, १३/३४

[15] गू. दी. , गीता, १४/०३
[16] गू. दी. , गीता, १४/२७
[17] तत्रैव
[18] तत्रैव
[19] गू. दी. , गीता, १५/०१
[20] गू. दी. , गीता, १५/०२
[21] गू. दी. , गीता, १५/०३
[22] गू. दी. , गीता, १५/०६
[23] गू. दी. , गीता, १५/०७
[24] गू. दी. , गीता, १५/१८
[25] गू. दी. , गीता, १५/१९–२०
[26] गू. दी. , गीता, १६/०१
[27] गू. दी. , गीता, १६/०६
[28] गू. दी. , गीता, १६/१९
[29] गू. दी. , गीता, १६/२३
[30] गू. दी. , गीता, १७/२३
[31] गू. दी. , गीता, १८/०१
[32] गू. दी. , गीता, १८/०२
[33] गू. दी. , गीता, १८/०६
[34] गू. दी. , गीता, १८/०७
[35] तत्रैव
[36] गू. दी. , गीता, १८/१३
[37] गू. दी. , गीता, १८/५५

[38] तत्रैव
[39] गू. दी. , गीता, १८/५६
[40] वे. क. ल. , अनुच्छेदः २
[41] गू. दी. , गीता, १८/६५
[42] गू. दी. , गीता, १८/६६
[43] भा. ता. , ११/१२/२२
[44] चै. च. (अन्त्यलीला, पञ्चमपरिच्छेदः, ४३–४५)
[45] भा. पु. , ३/४/४१

**********

# षष्ठोऽध्यायः

# उपसंहृतिः

मानवानां श्रेयःविधानार्थं ज्ञानं कर्म भक्तिश्चेति योगत्रयस्य विधानं शास्त्रादावुपदिष्टम्। तदुक्तं *श्रीमद्भागवते*–

योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्।। (भा. पु. – ११/२०/०६) इति।

भक्तियोगस्य तदितरयोगद्वयापेक्षया विशेषत्वमस्ति। यतो निष्कामकर्मयोगस्य चित्तशुद्धिक्रमेण ज्ञानजनकत्वं स्वीक्रियते परं ज्ञानयोगस्य मोक्षप्रदायकत्वेऽपि तन्न साक्षाद्भक्तिजनकम्। भक्तिस्तु यादृच्छिकी, स्वतन्त्रा, निरपेक्षा एव। महाप्रभुप्रोक्तं *श्रीचैतन्यचरितामृतो*द्धृतं वचनमत्र समुद्धरणीयम्–

कृष्णभक्ति हय अभिधेयप्रधान।
भक्तिमुखनिरीक्षक कर्म योग ज्ञान।। (चै. च., मध्य.– २२/१४) इति।

*श्रीमद्भागवतस्य* 'मद्भक्तिं वा यदृच्छया' (भा. पु.– ११/२०/११) इति श्लोकटीकायां श्रीलविश्वनाथचक्रवर्तिपादेन भणितम्– *यदि च यादृच्छिकशुद्धभक्तसङ्गलाभस्तदा मद्भक्तिं च केवलां तया च प्रेमाणं प्राप्नोति, यदि च कर्ममिश्र–ज्ञानमिश्र–भक्तिमत्साधुसङ्गलाभस्तदा ततः प्राप्तया कर्ममिश्रया ज्ञानमिश्रया च प्रधानीभूतया भक्त्या अन्ततः शान्तिरतिं प्राप्नोति* इति। बाह्यविषयात् चित्ताकर्षणपूर्वकं श्रीभगवति मनःसन्निवेशो योग इत्येवं योग–शब्दस्यार्थनिरूपणप्रसङ्गेऽपि *भागवते* उक्तम्–

एतावान् योग आदिष्टो मच्छिषैः सनकादिभिः।
सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा।।

भक्तियोगप्रसङ्गे *श्रीमद्भगवद्गीता*याः सप्तमाध्यायेऽपि अनुरूपोक्तिः समवेक्ष्यते–

> मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः।
> असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥ (श्री. म. गी.– ०७/०१)
> इति।

श्रीभगवद्व्यतिरिक्ते आश्रये भक्तियोगो न प्रवर्तते। केवलं श्रीभगवानेव भक्तियोगस्य विषयत्वेन भजते। श्रीभगवति अनन्यतया चित्तसन्निवेशस्तथा षड्विधशरणागतिलाभस्य भक्तियोग–पदवाच्यत्वं *श्रीमद्भागवत*स्याभिप्रेतम्–

> स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे।
> अहैतुक्यप्रतिहता ययात्मा सुप्रसीदति॥ (भा. पु.– १/२/६) इति।

अधोक्षजे श्रीकृष्णे शुद्धात्मनः अहैतुकी अप्रतिहतासेवाप्रवृत्तिव्यतिरेकेण क्रियान्तरस्य प्रवृत्तिर्न भवत्येव। अन्याभिलाषिताशून्या ज्ञानकर्मादिना अनावृता भक्त्या अभ्युदये परमात्मा जीवात्मा चोभयमेव सन्तोषमधिगच्छति। निष्कामेनानुष्ठिता क्रिया श्रीभगवदर्पणं विना कर्मकाण्डे एव परिणमते, न तु कर्मयोगे। एवमधोक्षजश्रीभगवन्तमतिरिच्य देवानुद्दिश्य प्रयुक्ता भक्तिरपि भक्तियोगेन न परिगणनीया।

अत्रोल्लेख्यम्, पितृभक्ति–मातृभक्ति–देशभक्तिरित्यादिस्थलेषु भक्ति–शब्दस्य यः प्रयोगः दृश्यते तत्तु अपप्रयोगमात्रमिति वक्तुं शक्यते। भगवद्भक्तेरभिप्रेतार्थस्तु भिन्नम्। केवलं श्रीभगवति एव भक्ति–शब्दस्य प्रयोगः सङ्गच्छते। ‘भज सेवायाम्’[1] इत्यनेन भज्–धातोर्भक्तिशब्दनिष्पन्नत्वात् भजनीयवस्तोः तथा भजनकर्तुर्मध्ये विद्यमानभावस्य भजनपदवाच्यत्वमधेयम्। श्रीभगवान् एव भजनीयवस्तुः, जीवमात्रमेव तस्य सेवकः। जीवात्मनः शुद्ध्यवस्थायां श्रीभगवन्तं प्रति स्वाभाविकोऽनुरागो वर्तते। मायाबद्धावस्थायाम् अनुरागोऽयं विकारभावं प्राप्य बहुधा विचित्रा गतिः लभते। आत्मनः शुद्ध्यवस्थायां जीवस्तु श्रीभगवतो नित्यसेवकः। उक्तं च श्रीकृष्णदासकविराजेन–

कृष्ण नित्यदास जीव, ताहा भुलि गेल।

सेइ दोषे माया तार गलाय बान्धिल।

ताते कृष्ण भजे, करे गुरुर सेवन।

मायाजाल छुटे, पाय कृष्णेर चरण॥ (चै. च., मध्य- २२/१७-१९)

इति।

माया कृष्णबहिर्मुखताप्राप्तजीवस्य शुद्धस्वरूपमेव आवृणोति। सा स्थूलसूक्ष्मोपाधिद्वयाभ्यां जीवं कर्मालाने बन्धाति। तदा केचित् कर्मकाण्डं केचिद्वा ज्ञानकाण्डं समाश्रयन्ति। तत्र बद्धदशायां कर्मफलस्य अनित्यताबोधे ज्ञानकाण्डाश्रयी निर्भेदब्रह्मानुसंधानपरा इति दृश्यते। शुद्ध्यवस्थायां तु जीवस्य श्रीभगवतः भक्तिः सेवा वेति क्रियामात्रमेव परिलक्ष्यते। नित्यसिद्धजीवस्य नित्यसिद्धावस्थेयम्। जन्म-मरणरूपसंसाराबद्धजीवः सत्सङ्गेन गुरुकृपया च भक्तियोगं समाश्रित्य भक्तपदमाप्नोतीति शास्त्रेषु गीयते-

भक्तिस्तु भगवद्भक्तसङ्गेन परिजायते।

सत्सङ्गः प्राप्यते पुंभिः सुकृतैः पूर्वसञ्चितैः॥ इति।

श्रीमन्महाप्रभुवचनमप्यत्र समुद्धरणीयम्-

ब्रह्माण्ड-भ्रमिते कोन भाग्यवान् जीव।

गुरु-कृष्ण-प्रसादे पाय भक्तिलता बीज॥

कोन भाग्ये कोन जीवेर श्रद्धा यदि हय।

तवे सेइ जीव साधुसङ्ग ये करय॥

साधुसङ्ग हैते हय श्रवण कीर्तन।

साधनभक्त्ये हय सर्वानर्थ-निवर्तन॥ (चै. च., मध्य. २३/५-६) इति।

भक्तेः केवला अनन्या वा तथा प्रधानीभूता कर्मज्ञानादिमिश्रा चेति भेदद्वयं वर्तते। तत्रानन्याभक्तिविषये *भक्तिरसामृतसिन्धौ* सम्यगुच्यते-

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा॥ (भ. र. सि.– १/११) इति।

महद्भाग्यायत्तस्यैव एतादृशा भक्तिः लभते। एतद्व्यतिरेकेण कर्मिणां ज्ञानिनां तथा योगिनां मध्येऽपि दृष्टा भक्तिः भक्तिरित्युक्तेऽपि तत्तु गुणीभूता न तु प्रकृतभक्तिस्वरूपा। यतो भक्तिः स्वरूपतया निर्गुणा एव। कर्मफलसिद्ध्यर्थं कर्मिणां मध्ये या भक्तिः स्वीक्रियते सा सगुणा फलप्रदानात् परम् अन्तर्हिततत्वाद् अनित्या अपि। प्रत्युत शुद्धा भक्तिः निर्गुणा नित्या च। *श्रीमद्भागवते* सगुणभक्त्याः परिचयः समुपलभ्यते–

अभिसंधाय यो हिंसां दम्भं मात्सर्यमेव वा।
संरम्भी भिन्नदृग्भावं मयि कुर्यात् स तामसः॥

विषयानभिसंधाय यश ऐश्वर्यमेव वा।
अर्चादावर्चयेद् यो मां पृथग्भाव स राजसः॥

कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्।
यजेद् यष्टव्यमिति वा पृथग्भावः स सात्त्विकः॥ (भा. पु.– ३/२९/८–१०) इति।

सगुणा भक्तिः निर्गुणभक्त्याः स्वरूपतया पृथगेव। निर्गुणभक्त्याः स्वरूपवर्णनप्रसङ्गे श्रीकपिलदेवेन प्रोक्तम्–

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥

लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे॥ (भा. पु.– ३/२९/११–१२) इति।

निर्गुणभक्तिप्रसङ्गे *श्रीमद्भागवतस्य* अधोक्ते श्लोके कर्म–ज्ञान–योगाद्यपेक्षया भक्तियोगस्य श्रेष्ठत्वमुक्तम्–

देवानां गुणलिङ्गानामानुश्रविककर्मणाम्।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या॥

अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी।
जरयत्याशु या कोशं निगीर्नमनसो यथा॥ (भा. पु.– ३/२५/३२–३३)

इति।

ज्ञानापेक्षया भक्त्या उत्कर्षत्वं वैष्णवदर्शने स्वीकृतम्। तत्र *श्रीमद्भागवते* यश्च ज्ञानेन भगवदैश्वर्यविचारप्रयासमपास्य सदा परमेश्वरचिन्तया आत्मानं निमग्नस्तिष्ठति स ईश्वरमधिगच्छतीति विधृतम्–

ज्ञाने प्रयासमुदपास्य नमन्त एव
जीवन्ति सम्मुखरितां भवदीयवार्ताम्।

स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभि
र्ये प्रायशोऽजितजितोऽप्यसि तैस्त्रिलोक्याम्॥ (भा. पु.– १०/१४/३)

इति।

*श्रीचैतन्यचरितामृते* राय–रामानन्दस्य अनुरूपोक्तिः समवेक्ष्यते–

प्रभु कहे– एहो बाह्य आगे कह आर।
राय कहे– ज्ञानशून्या भक्ति साध्य सार॥

प्रभु कहे– एहो हय, आगे कह आर।
राय कहे– प्रेमभक्ति सर्व साध्य सार॥ (चै. च., मध्य.– ८/५८–५९)

इति।

ज्ञानं भक्तिश्चेति भगवत्साधनायाः मार्गद्वयमुच्यते। ज्ञेयः प्रेमास्पदभूतः श्रीभगवानेव मार्गद्वयस्याश्रयस्थलरूपः। अतो द्वयोर्मध्ये कस्य प्रधान्यमस्तीति प्रश्नोऽयं समायाति। ज्ञानेन वस्तुस्वरूपः प्रकाश्यते; भक्त्या तु वस्तुनः ज्ञानं न लभते परं वस्तुना सह अच्छेद्यसंबन्धः समुद्भवति। द्वयोः आन्तरवृत्तिः भिन्ना, कार्यस्तथा गतिरपि स्वतन्त्रा। ज्ञानस्य विषयः सत्यभूतम्; व्यक्तिसाम्यविशिष्टपदार्थस्तु भक्त्याः विषयत्वेन भजते। मोदकखण्डमेकं ज्ञानस्य विषयो भवितुमर्हति; परं व्यक्तिनिरपेक्षा भक्तिर्नोपलभ्यते। चैतन्यस्य पर्यवसानं ज्ञाने एव भवति। चित्तस्य रसस्वरूपधर्मस्य व्यापारविशेष एव भक्तिः। एवं द्वयोर्भिन्नत्वमवज्ञेयम्।

यश्च परमेश्वरस्वरूपं ज्ञानमार्गेण ज्ञातुमिच्छति क्रमेण तत्स्वरूपं कुज्झटिकाच्छन्नमधिगच्छति। उपनिषद्यपि ऋषिणा गीतम्–

यस्यामतं तस्य मतं मतं यस्य न वेद सः।
अविज्ञातं विजानतां विज्ञातमविजानताम्॥ (केन. उ.– २/३) इति।

जीवसविधे परमेश्वरस्वरूपस्य अनायासबोधनार्थं ऋषिणा उक्तं यत्, आत्मा श्यामाकादेरणुतरः पृथिव्यादेः महत्तरः ब्रह्मादिस्तम्बपर्यन्तप्राणिजातस्य हृदये स्थितः–

अणोरणीयान् महतो महीयान्
आत्मास्य जन्तोर्निहितो गुहायाम्॥ (कठ. उ– २/२०) इति।

विषयोऽयं तदा दुर्बोध्यरूपेण प्रतीयते। परं यदा गीयते– *तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा* [2] इत्यत्र आत्मतत्त्वं पुत्रात् प्रियतरं हिरण्यरत्नादेः वित्तात् प्रियत्वेन प्रसिद्धम्, यद् यल्लोके प्रियत्वेन प्रसिद्धं सर्वस्मात् प्रियतरं प्राणपिण्डसमुदायात्मकाभ्यन्तराद् अन्तरतरमपि। अत्र परमात्मा अनिर्वचनीया महिमात्यागपूर्वकेण परमानन्दघनमूर्तिं प्रकटयतीति मन्यते। परमेश्वरो न केवलं ज्ञानस्वरूपस्तथा सच्चिदानन्दविग्रहरूपोऽपि। परमप्रीत्या स ज्ञायते, ज्ञानवर्तिकया त्वस्य अर्धस्वरूपम्

अज्ञातस्तिष्ठति। प्रेमवशः परमेश्वरः केवलं भक्त्या पूर्णतया अवज्ञायत इति। श्रीरूपगोस्वामिनापि भणितम्–

कृत्वा हरिं प्रेमभाजं प्रियवर्गसमन्वितम्।

भक्तिर्वशी करोतीति श्रीकृष्णाकर्षिणी मता॥ (भ. र. सि.– १/२२) इति।

पूर्णानन्दमयश्रीभगवतः चिन्मयस्वरूपं भक्तसकाशे भक्तिरेव प्रकटयतीति माठरश्रुतौ सम्यगेवोक्तम्–

भक्तिरेव एनं नयति, भक्तिरेव एनं दर्शयति।

भक्तिवशः पुरुषः, भक्तिरेव गरीयसी॥ इति।

*श्रीमद्भगवद्गीता*यां मार्गत्रयमध्ये भक्तिमार्गस्य सर्वोत्तमत्वं श्रीभगवता स्वयमेव प्रोक्तम्–

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।

एवं मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ (श्री. म. गी.– १८/५५) इति।

भक्त्या समुपलभ्यस्य आनन्दस्य ब्रह्मानन्दापेक्षया परमोत्कृष्टत्वं *भक्तिरसामृतसिन्धा*वपि निरूपितम्–

ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः।

नैति भक्तिसुखाम्भोधेः परमाणुतुलायामपि॥ (भ. र. सि.– १/२१) इति।

यस्य ऐश्वर्यमयी सत्ता सर्वत्रैव विद्यमाना, अवाङ्मानसगोचरो यस्य उपलब्ध्यर्थं विपश्चितस्य शास्त्रज्ञानमपि व्यर्थतामुपयाति, स परमानन्दमहायोगेश्वरो नन्दगृहे क्रीडति, गोपीवृन्देन सह कदम्बकुञ्जे लीलाविलासे निमज्जति। यतो षडैश्वर्यमयः श्रीभगवान् प्रेमवशः। भागवती भक्तिः निर्विशेषप्रेमस्वरूपत्वात् कर्मादीनां नापेक्षते। भक्तेः स्वकीयफलदायकत्वं *भक्तिसन्दर्भे* विधृतम्– *भक्तिश्च फलोत्पादने विधिसापेक्षापि न स्यात्, दाहादिकर्मणि वह्न्यादिवत्* इति। *श्रीमद्भागवत*स्य प्रथमस्कन्धान्तर्गतस्य 'अहैतुक्यप्रतिहता यथात्मा सुप्रसीदति' (भा. पु.–

१/२/६) इत्यस्मिन् श्लोकस्य 'अहैतुकी'पदेन भक्त्या अकारणत्वमेव व्यञ्जितम्। तथा चोक्तं *भक्तिसन्दर्भे– तस्य भगवत इव तद्रूपाया भक्तेरपि स्वप्रकाशतासिद्ध्यर्थमेव हेतुत्वानपेक्षता। तथा हि 'यतो भक्तिरधोक्षजे अहैतुक्यप्रतिहता' इत्यादौ हेतुं विनैवाविर्भवतीति तत्रार्थः* इति।

अत्रोल्लेख्यम्, स्वाध्यायेन संयमेन श्रेयःकर्मणा च श्रीकृष्णे या भक्तिः साध्यते तत्तु ज्ञानाङ्गभूतायाः सात्त्विक्याः भक्त्याः न तु प्रेमाङ्गभूता निर्गुणभक्तिपक्षे प्रयोक्तव्या। साधूक्तं श्रीजीवगोस्वामिकृते *भक्तिसन्दर्भे– दान–व्रत–तपो–होम–जप–स्वाध्याय–संयमैः / श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते॥ (भा. पु.– १०/४७/२४) इति यद्धेतुत्वं श्रूयते तत् खलु ज्ञानाङ्गभूतायाः सात्त्विक्या एव भक्तेर्न तु निर्गुणायाः प्रेमाङ्गभूतायाः* इति। भक्तिव्यतिरेकेण ज्ञानयोगस्तथा कर्मयोगोऽपि अनुकूलफलं न लभते। स्वतन्त्रा भक्तिः न केनापि साध्यते बाध्यते वा। ज्ञानसाध्यमोक्षापेक्षया भक्त्याः परमोत्कर्षत्वं सर्वैः स्वीक्रियन्ते। यत्र भक्त्यपेक्षया ज्ञानप्राधान्यमुक्तं तत्र ज्ञानपोषकत्वमेवाभिप्रेतम्। यथा वामनावतारे स्वयम् उपेन्द्ररूपेण इन्द्रप्राधान्यस्वीकरणात् श्रीभगवत अपकर्षत्वं न संसूचितम्। एवं ज्ञानप्रशंसापरवाक्येन भक्तिमहिमा द्योतिता। भक्त्याः फलं प्रेमरूपेति कारणात् तस्याः पुरुषार्थमौलिरूपत्वमप्यवधेयम्। भक्त्याः ज्ञानादिनिरपेक्षत्वं श्रीमज्जीवगोस्वामिना *भक्तिरसामृतसिन्धु*–ग्रन्थस्य *दुर्गमसङ्गमिनी* टीकायामुक्तम्– *भक्तिर्हि स्वतः प्रवलत्वादन्यनिरपेक्षा न तु ज्ञानादिवत् सम्यग्वैराग्यादिसापेक्षा कर्मनिर्वेदापेक्षा* इति। ज्ञानादिनिरपेक्षा अपि ह्लादिनीसंविदोः स्वरूपभूतयोः सारत्वेन भक्तिजन्यसुखं ब्रह्मानन्दापेक्षया श्रेष्ठम्। *श्रीमद्भागवते*ऽपि भक्त्याः अन्यनिरपेक्षत्वं श्रेष्ठत्वं च प्रतिष्ठितम्। तपः–ज्ञान–वैराग्य–योग–दानधर्मादिना यत् फलं प्राप्यते केवलं भक्त्या एव तत्फलं लभते। तथा चोक्तम्–

यत् कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्।
योगेन दानधर्मेण श्रेयोभिरितरैरपि॥

सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा।

स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वाञ्छति॥ (भा. पु.– ११/२०/३२–३३) इति।

एवं कर्म–भक्ति–ज्ञानयोगानां दुर्ज्ञेयतत्त्वमिदं शास्त्रेषु बहुधा आलोचितम्। अद्वैतवेदान्त–दर्शनालोकेन योगत्रयं *गूढार्थदीपिकायां* केन प्रकारेणैव प्रतिपादितं तदेव शोधकार्येऽस्मिन् प्रपञ्चितमित्यलमति–विस्तरेणेति शम्।

[1] पा. धा.– ९९८
[2] बृह. उ.– १/४/८

# शब्दसंकेतः

गू.दी. – गूढार्थदीपिका

श्री. म. गी. – श्रीमद्भगवद्गीता

मनु. – मनुसंहिता

मी. द. – मीमांसादर्शनम्

बृह. उ.– बृहदारण्यकोपनिषद्

पा. धा. – पाणिनीयधातुपाठः

यो. सू. – योगसूत्रम्

रा. भा. – रामानुजभाष्यम्

ब्र. सू. – ब्रह्मसूत्रम्

तै. आ. – तैत्तिरीय–आरण्यकम्

श्वे. उ. – श्वेताश्वतरोपनिषद्

कै. उ. – कैवल्योपनिषद्

ना. भ. सू. – नारदभक्तिसूत्रम्

शा. सू. – शाण्डिल्यसूत्रम्

शा. सू. भा. – शाण्डिल्यसूत्रभाष्यम्

पा. सू. – पातञ्जलसूत्रम्

प. स. – परमसंहिता

भा. पु. – भागवतपुराणम्

कै. दी. टी. – कैवल्यदीपिका टीका

वि. भा. पु. – विष्णुभागवतपुराणम्

वि. चू. – विवेकचूडामणिः

श्री. भा. – श्रीभाष्यम्

प. प. सं. – पञ्चरात्रपरमसंहिता

भ. र. सि. – भक्तिरसामृतसिन्धुः

भ. र. – भक्तिरसायनम्

ना. शा. – नाट्यशास्त्रम्

तै. उ. – तैत्तिरीयोपनिषद्

भ. र. टी. – भक्तिरसायनटीका

ऋ. सं. – ऋग्वेदसंहिता

मु. उ. – मुण्डकोपनिषद्

म. भा. – महाभारतम्

कू. पु. – कूर्मपुराणम्

ब्र. वै. पु. – ब्रह्मवैवर्तपुराणम्

प. पु. – पद्मपुराणम्

ग. पु. – गरूडपुराणम्

अ. वु स. – अहिर्वुध्न्यसंहिता

बृ. ब. स. – बृहद्ब्रह्मसंहिता

ना. प. रा. – नारदपञ्चरात्रम्

सा. सं. – सात्त्वतसंहिता

शा. भा. – शारीरकभाष्यम्

छा. उ. – छान्दोग्योपनिषद्

कठ. उ. – कठोपनिषद्

ष. स. – षट्सन्दर्भः

ऐ. आ. – ऐतरेय–आरण्यकम्

मा. उ. – माण्डूक्योपनिषद्

सं. शा. – संक्षेपशारीरकम्

नै. सि. – नैष्कर्म्यसिद्धिः

वे. प. – वेदान्तपरिभाषा

अ. सि. – अद्वैतसिद्धिः

ईश. उ. – ईशोपनिषद्

सा. प्र. भा. – सांख्यप्रवचनभाष्यम्

कौ. उ. – कौषितकि उपनिषद्

बृह. सं. वा. – बृहदारण्यकसंबन्धवार्तिकम्

वे. क. ल. – वेदान्तकल्पलतिका

भा. ता. – भागवततात्पर्यम्

चै. च. – चैतन्यचरितामृतम्

केन. उ.– केनोपनिषद्

**********

# सन्दर्भग्रन्थानां पञ्जिः (Reference Bibliography)


Bandyopadhyay, Bijoybhuṣaṇa. *Bhāratīyadarśane muktivāda*. Kolkata: Dasgupta and Co. Li., 1361 BY.

Bādarāyaṇa. *Brahmasūtra*. Ed. Chidghanananda Puri, Ananda Jha. *Vedāntadarśana.* With *Śārīrakabhāṣya* of Śaṃkarācārya. With Beng. Trans. Svāmī Viśvarūpānanda. Calcutta (now Kolkata): Udbodhana Karyalaya, 2014.

*Bhagavadgītā*. With Sans. Comm. *Gūḍhārthadīpikā* of Madhusūdana-Sarasvatī & Eng. Trans. Swami Gambhirananda. Kolkata: Advaita Ashrama, 2007 (2nd ed.) (1st ed. 1998).

—. With Sans. Comm. of Rāmānuja & Beng. Trans. Sri Yatindra Ramanujadasa. Khardaha: Sri Valarama Dharmasopana, 1368 BY.

Bhandarkar, Ramkrishna Gopal. *Vaiṣṇavism, Śaivism And Minor Religious Systems*. Ed. by Narayan Bapuji Utgikar. Poona: Bhandarkar Oriental Research Institute, 1928. (Government Oriental Series- Class B, No.IV).

Bhattacharya, Asutosh. *Vedānadarśana – Advaitavāda; Vedāntacintāra Kramavikāśa*. (Vol.1, II & III). Calcutta (now Kolkata): University of Calcutta, 1961. (Bharatiya Darsana Granthamala).

Bhattacharya, Srimohan & Dinesh Chandra Bhattacharya. *Bhāratīya Darśana Koṣa (Vedanta)*. Vol. III, 1st & 2nd Part. Calcutta (now Kolkata): Sanskrit College, 1981. [Calcutta Sanskrit College Research Series No. CXXI].

Chakrabarti, Tapan Kumar. *Vedānte Mahāvākyārtha Vicār*. Kolkata: Elaid Publishers in association with Jadavpur University, 2000. [Jadavpur Darsana Granthamala: Dvitiya Series].

Chatterjee, Chinmayi. *Bhaktiraser Vivartan*. Calcutta (now Kolkata): Sanskrit College, 1972. (Calcutta Sanskrit College Research Series No. LXXVII).

Choudhuri, Rama. *Vedāntadarśana.* Pub. by Sri Pulinbihari Sen. Santiniketan: Visvabharati Granthalaya, 1356 B.Y. (1St Pub. 1351 B.Y.).

Das Gupta, Shashibhusan. *Bhārater Śakti-Sādhanā O Śākta Sāhitya.* Kolkata: Sahitya Samsada, 1416 BY (1st ed. 1367 BY).

—. *Obscure Religious Cults.* Calcutta (now Kolkata): Firma K. L. Mukhopadhyay, 1969.

Dasgupta, Surendranath. *A History of Indian Philosophy*. (Vol. IV). Delhi: Motilal Banarsidass, 2015 (1st ed. 1975).

De, Sushil Kumar. *Early History of the Vaiṣṇava Faith and Movement in Bengal*. Calcutta (now Kolkata): General Printers and Publishers Limited, 1942.

Dharmarājādvarīndra. *Vedāntaparibhāṣā.* Ed. Panchanan Bhattacharya. With Beng. Trans. and Exp. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 1377 BY.

Kar, Minati. *Advaita Vedānte Jñāna*. Calcutta (now Kolkata): Adityamoy,1998.

—. *Jīvanmukti (Tattva, Pramāṇa o Sādhana)*. Calcutta (now Kolkata): Adityamoy,2000.

Madhusūdana-Sarasvatī. *Advaitasiddhi*. Ed. N.S. Ananta Krishna Sastri. With Sans. Comm. *Gauḍabrahmānandī*, *Viṭṭhaleśopādhyāyī*, *Siddhivyākhyā* of Balabhadra And Critical Summary Called Caturgranthi by Ananta

Krishna Sastri. Delhi- Ahmedabad: Oriental Publishers & Book Sellers, 1982. (Parimal Sanskrit Series No. 7).

—. *Bhaktirasāyanam*. Ed. & Beng. Trans. by Durgacaranasamkhyavedanta-tirtha. Kolkata: Sanskrit Pustak Bhandar, 1404 BY.

—. *Siddhāntabindu*. Being Madhusūdana's Commentary on the *Daśaślokī* of Śrī Śaṃkaracarya. Ed. P.M. Modi. Allahabad: Vohra Publishers and Distributors, 1929.

—. *Śrībhagavadbhaktirasāyana.* Ed. & Hindi Trans. by Sri Janardanasastri Pandeya. Varanasi: Parvatiya Mudranalaya, 2018.

—. *Vedāntakalpalatikā.* Ed. & Eng. Trans. by R. D. Karmarkar. Poona: Bhandarkar Oriental Research Institute, 1962. (BHANDARKAR ORIENTAL RESEARCH INSTITUTE, Post-Graduate and Research Department Series No. 3).

*Manusaṃhitā*. Ed. & Beng. Trans. by Manavendu Bandapadhyay. Kolkata: Sanskrit Pustak Bhandar, 2012.

Patañjali. *Yogasūtra.* Ed. Purna Chandra Sharma. *Patañjal Darshan*. With *Vyāsabhāṣya* by Vedavyāsa. Kolkata: West Bengal State Book Board, 2005.

Potter, Karl H. *Encyclopedia of Indian Philosophies.* Bibliography (Vol. I). Delhi: Motilal Banarsidass, 1983(1st ed.).

Prajñānānanda-sarasvatī. *Karmattva*. Kolkata: Sanskrit Book Depot Pvt. Ltd., 1377 BY.

Radhakrishnan, S. *Indian Philosophy*. Vol. I and II. New Delhi: Oxford University Press, 1999. (1st Pub. 1923; 1st Indian ed. 1940).

Roy, Sankaranatha. *Bhārater Sādhaka*. Vol. II. Kolkata: Karuna Prakasani, 1356 BY.

Sadānanda-Yogīndra. *Vedāntasāra.* Ed. & Beng. Trans. Brahmacari Medhacaitanya. With Sans. Comm. *Subodhinī* of Nṛsiṃhasarasvatī, *Bālabodhinī* of Āpodeva and *Vidvanmanorañjaṇī* of Rāmatīrtha. Kolkata: Sanskrit Pustak Bhandar, 1424 BY.

Sarvajñātmamuni. *Saṃkṣepaśārīrakam*. Ed. Harinarayana Apte. With Sans. Comm. *Subodhinī* of Puruṣottamamiśra and *Anvayārthaprakāśikā* of Rāmatīrtha. Anandasrama Mudranalaya,1918. (Anandasrama Sanskrit Granthavali, Granthanka 83)

*Śrīmadbhagavadgītā*. Ed. Nalinikanta Brahma. With Sans. Comm. *Gūḍhārtha-dīpikā* of Madhusūdana-Sarasvatī & Beng. Trans. Bhutanatha –saptatirtha. Calcutta (now Kolkata): Krishna Brothers, 1345 BY.

*Śrīmadbhāgavatam.* Ed. Jagadishlal Sastri. With Sans. Comm. *Bhāvārthabodhinī* of Śrīdharaswāmī. Delhi: Motilal Banarsidass, 1983.

Śrīrūpa-Goswāmī. *Bhaktirasāmṛtasindhu*. Ed. A. C. Bhaktivedanta swami With Hindi Trans. Rajib Gupta. Bombay (Now Mumbai): Bhaktivedanta Book Trust, 1980 (1st ed. 1979).

Śrīśaṃkarācārya. *Vivekacūḍāmaṇi*. Eng. Trans. by Swami Madhavananda. Mayavati: The Advaita Ashrama, 1921. (Himalayan Seriez No. XLIII).

Tarkavachaspati, Taranatha. *Vāchaspatyam (A Comprehensive Sanskrit Dictionary)*. Vol. VI. Varanasi: Chowkhamba Sanskrit Series Office, 1970. [The Chowkhamba Sanskrit Series Work no. 94].

*Ten Principal Upaniṣads With Śāṃkarabhāṣya*. Ed. Govindan Shastri With notes. Delhi, Chennai etc.: MLBD, 2000. (Rpt. 1st ed. 1964).

*Upaniṣad-Granthāvalī* (Pt. 1, 2, 3). Ed. Svami Gambhirananda. Kolkata: Udbodhana Karyalaya, 2014.

Venkatkrishna, Anand. *Mīmāṃsā, Vedānta and the Bhakti Movement.* Submitted in partial fulfillment of the requirements for the degree of Doctor of Philosophy in the Graduate School of Arts and Sciences. Columbia University, 2015.

Vidyavinoda, Srimatsundarananda. *Gauḍīya Vaiṣṇava darśaner itihāsa o vaiśiṣṭya*. Kolkata: Gaudiya Mission (Registered), 1953.

⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂